# सांख्यं योगं च

## Course Code: M23SN09DC

Discipline Core Course
Postgraduate Programme in
Sanskrit Language and Literature
Self Learning Material



SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

SGOU

# सांख्यं योगं च

Course Code: M23SN09DC

Semester - III

## Discipline Core Course
## Postgraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SGOU

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

SREENARAYANAGURU
OPEN UNIVERSITY

# सांख्यं योगं च

Course Code: M23SN09DC
Semester- III
Discipline Core Course
MA Sanskrit Language and Literature


**Academic Committee**

Dr. Shyla C.A.
Prof. C.S. Sasikumar
Prof. M. S. Muraleedharan Pillai
Dr. K. M. Sangameshan
Dr. J.P. Prajith
Dr. Sreejith T.G.
Dr. N.K. Sundareswaran
Dr. K. Unnikrishnan
Dr. Chandrashekaran Nair

**Development of the Content**

Chitra Baskar
Anju J.

**Review and Edit**

Dr. K. K. Sundaresan

**Linguistics**

Dr. K. K. Sundaresan

**Scrutiny**

Dr. Vijayarajan K.U.
Dr. Jothilekshmi M.
Dr. Vijayarajan K.U.
Chitra Baskar
Anju J.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

Director, MDDC :
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.


Scan this QR Code for reading the SLM on a digital device.


**Edition:**
January 2025



**Copyright:**
© Sreenarayanaguru Open University



ISBN 978-81-985080-8-9
9 788198 508089



All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.


www.sgou.ac.m

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. The postgraduate programme in Sanskrit offers a special mix of language and literature studies. While the programme covers various aspects of Sanskrit literature and provides the necessary credits, its main goal is to help learners better understand how different types of literature connect with society. We have also made sure to introduce learners to the newest developments in Sanskrit literature. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P. 01-01-2025

# Contents


| | |
|---|---|
| **Block- 1 भारतीयदर्शनेषु सांख्ययोगयोः परिचयः** | **2** |
| **Unit-1**भारतीयदर्शनानां सामान्यपरिचयः | **3** |
| **Unit-2** सांख्यकारिकायाः योगसूत्रस्य च विशेषपरिचयः | **16** |
| **Unit-3** सांख्यकारिकायाः अवतरणश्लोकाः तत्वसंख्या च | **24** |
| **Unit-4** सांख्यमतरीत्या प्रमाणनिरूपणम् | **31** |
| **Block- 2 सांख्यमते तत्त्वनिरूपणम् (9-38 कारिकाः)** | **39** |
| **Unit-1** प्रकृतितत्त्वस्य निरूपणम् | **40** |
| **Unit-2** पुरुषतत्त्वस्य निरूपणम् | **54** |
| **Unit-3** सृष्टिनिरूपणं त्रिगुणनिरूपणं च | **62** |
| **Unit-4** इन्द्रियाणां निरूपणम् | **69** |
| **Block- 3 सांख्यमते कैवल्यप्रक्रिया** | **81** |
| **Unit-1** सांख्यमते लिङ्गसर्गः | **82** |
| **Unit-2** सांख्यमते भावानां निरूपणम् | **87** |
| **Unit-3** सांख्यमते संसारनिरूपणम् | **95** |
| **Unit-4** सांख्यमते कैवल्यस्य निरूपणम् | **100** |
| **Block- 4** योगदर्शनम् | **110** |
| **Unit-1** योगसूत्रे प्रथमोऽध्यायः१-३२ सूत्राणि | **111** |
| **Unit-2** योगसूत्रे प्रथमोऽध्यायः३३-५१ सूत्राणि, द्वितीयोऽध्यायः१-११ सूत्राणि | **138** |
| **Unit-3** योगसूत्रेद्वितीयोऽध्यायः१२ -३९सूत्राणि | **162** |
| **Unit-4** योगसूत्रेद्वितीयोऽध्यायः४० -५५सूत्राणि, तृतीयोऽध्यायः१-१५सूत्राणि | **189** |
| **Model Question Paper SET – A** | **210** |
| **Model Question Paper SET – B** | **212** |




SGOU

# भारतीयदर्शनेषु सांख्ययोगयोः परिचयः

## BLOCK- 01

SGOU

UNIT 1

# भारतीयदर्शनानां सामान्यपरिचयः

## Learning Outcomes

- भारतीय दर्शनपद्धतेः सामान्यावगमनम्।
- सांख्ययोगयोः विशेषांशानाम् अवगमनम्।
- सांख्यकारिकायाः सांख्यसिद्धान्तस्य च अवगमनम्।
- योगदर्शनप्रक्रियायाः विशेषांशानाम् च अवगमनम्।

## Background

भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते। यदेव किंचित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शनजगति रत्नवद् बहुमूल्यानि आकल्यन्ते। भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अतएव अनेके दर्शनकाराः समाजसुधाकररूपेण प्रथिताः सन्ति । विदितं हि सर्वैः लोकेऽस्मिन् यत् प्राणिनः सर्वे सुखाय दुःखमोक्षाय च यतन्ते सर्वथा सर्वदा च इति। पण्डिताः सकलं जगत् सारहीनं मत्वा किं सत्यमिति विज्ञातुम् इच्छन्तः सन्तः जीवः जगद् ब्रह्म च अधिकृत्य विचारम् अनवरतमकुर्वन्। एवं जिज्ञासुभिः पण्डितकृतेभ्यः प्रयत्नेभ्यः विवधदर्शनानाम् आविर्भावः।



SGOU

## Keywords

सांख्यं, योगं, न्यायं, वैशेषिकं, पूर्वमीमांसा, उत्तरमीमांसा, चार्वाकं, बौद्धं, जैनं, आस्तिकदर्शनं, नास्तिकदर्शनं, जीवात्मा, परमात्मा, कैवल्यं, भेदाभेदं, द्वैतं, विशिष्टाद्वैतं, द्वैताद्वैतं, शुद्धाद्वैतम्।

## Discussion

### दर्शनभेदाः

भारतीयदर्शनानि सामान्यतः आस्तिकदर्शनम् नास्तिकदर्शनम् इति द्विधा विभज्यन्ते। वेदाः खलु भारतीयचिन्ताः अत्यधिकं प्रभावितवन्तः। यानि दर्शनानि वेदानां परमप्रामाण्यम् अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि। यानि वेदानां प्रामाण्यं नाङ्गीकुर्वन्ति तानि नास्तिकदर्शनानि च। आस्तिकदर्शनानि षड् सन्ति । तानि च सांख्य- योग- न्याय- वैशेषिक- पूर्वमीमांसा- उत्तरमीमांसा (वेदान्तः) च। चार्वाक- बौद्ध- जैनानि नास्तिकदर्शनानि।

### 1.1आस्तिकदर्शनानि

प्रधानतया आस्तिकदर्शनानि षट्। आस्तिकदर्शनानि वेदस्य प्रामाण्यमङ्गीकुर्वन्ति। अतः वैदिकदर्शनानि इति नामान्तरम्। प्रायेण वैदिकदर्शनानि ईश्वरस्य सद्भावमङ्गीकुर्वन्ति ।

१. सांख्यदर्शनम्- कपिलमहर्षिः ।

२. योगदर्शनम्- पतञ्जलिमहर्षिः ।

३. न्यायदर्शनम्- गौतममहर्षिः ।

४. वैशेषिकदर्शनम्- कणादमहर्षिः ।

५. पूर्वमीमांसादर्शनम्- जैमिनिमहर्षिः ।

६.वेदान्तदर्शनम् (उत्तरमीमांसादर्शनम्)- बादरायणः (व्यासमहर्षिः)।

एतदतिरिक्तानि अद्वैतदर्शनं, विशिष्टाद्वैतदर्शनम् इत्यादीनि च सन्ति। तानि वेदान्तदर्शनस्य भेदाः। दर्शनानां प्रमाणानि प्रतिपाद्यन्ते-

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ ।
भासर्वज्ञश्चसाङ्ख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति ।।
प्राहुः प्राभाकराद्याः पञ्चकमपि वयं तेपि वेदान्तविज्ञाः ।
पौराणिकास्त्वष्टकमभिदधिरे सम्भववैतिह्ययोगात् ।।

**1.1.1 सांख्यदर्शनम् (कपिलाचार्यः)** - सङ्ख्यायते सम्यक् ज्ञायते तत्त्वं येनेति सांख्यम्। संख्याशब्दस्यगणना, प्रसिद्धिः इत्यर्थद्वयं वर्तते। पञ्चविंशतितत्त्वानां विशदीकरणम् आचार्येण कपिलमुनिना प्रोक्तम्। एका मूलप्रकृतिः, मूलप्रकृतेः विकृतयः सप्त, केवला विकृतयः षोडश, एकः पुरुषश्च इति पञ्चविंशतिः तत्त्वानि । प्रकृतेः पुरुषस्य च महत्त्वप्रतिपादनरूपो बोधः इति। प्रत्यक्षम्, अनुमानम्, आगमः च इति त्रीणि प्रमाणानि। अतिपुरातनं दर्शनं भवति संख्यदर्शनम्।

संख्याशब्दस्यगणना, प्रसिद्धिः इत्यर्थद्वयं वर्तते।

**1.1.2 पतञ्जलिमहर्षेः योगदर्शनम्-** सेश्वरसांख्यदर्शनमेव योगदर्शनम्। युज्यते अनेन इति योगः। योगो चित्तवृत्तिनिरोधः। चित्तवृत्तिनिरोधेन चेतसः समाहितत्वम्। योगस्य अष्टौ अङ्गानि। तानि यम-नियम-आसन- प्राणायाम- प्रत्याहार-धारणा-ध्यान-समाधिभेदाः। तत्र अहिंसा- सत्य- अस्तेय- ब्रह्मचर्य- अपरिग्रहाः यमाः । यमः आत्मनियन्त्रणम्। विषयेभ्यो इन्द्रियाणां नियन्त्रणं यमः। जीवसन्धारणाय अनुष्ठातुं योग्याः नियमाः। शौच सन्तोष-तपः स्वाध्याय-

सेश्वरसांख्यदर्शनमेव योगदर्शनम्।

ईश्वरप्रणिधानानि नियमाः। स्थिरसुखम् आसनम्। श्वासप्रश्वासनिरोधः प्राणायामः। शरीरायावश्यकम् ऊर्जदायक-रूपेण श्वासोच्छ्वासक्रमः साध्यः। मनः आकर्षकेभ्यः विषयेभ्यः इन्द्रियाणां नियन्त्रणं प्रत्याहारः। चित्तस्य एकाग्रता धारणा। मायातः जीवात्मनः मोक्षः- समाधिः- कैवल्यप्राप्तिः (मोक्षप्राप्तिः) एव सांख्यानुसारं जीवितलक्ष्यम्। अभ्यासेन वैराग्येण च योगसिद्धिः जायते। योगदर्शनं प्रत्यक्षम्, अनुमानं, शब्दः (आगमः) इति प्रमाणत्रयमङ्गीकरोति।

**1.1.3 वैशेषिकदर्शनम्। (कणाददर्शनम्)** - कणादमहर्षिः तपसा परमेश्वरं ध्यात्वा, सन्तुष्टेन परमेश्वरेण उलूकरूपं धृत्वा समुपदिष्टत्वात् अस्य वैशेषिकदर्शनस्य औलूक्यमिति नामान्तरमस्ति। विशेषसंज्ञकस्य पदार्थस्यापूर्वतया स्वीकारादस्य वैशेषिकमिति नाम। द्रव्यगुणकर्मसामान्यविशेष-समवायाः षट् पदार्थाः इति ते कथयन्ति। चत्वारि प्रमाणानि। प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः इति।

वैशेषिकदर्शनम् औलूक्यमिति नामान्तरमस्ति।

**1.1.4 गौतममहर्षेः न्यायदर्शनम्-** मानवस्य उत्कृष्टतमं दर्शनमेव न्यायदर्शनम् । प्रमाणैः अर्थपरीक्षणं न्यायः। नीयन्ते विवक्षितार्थः येनेति न्यायः। षोडशपदार्थज्ञानेन निश्रेयससिद्धिः (मोक्षसिद्धिः) इति नैयायिकाः। प्रमाण- प्रमेय- संशय- प्रयोजन- दृष्टान्त- सिद्धान्त – अवयव- तर्क- निर्णय- वाद- जल्प- वितण्डा हेत्वाभास- च्छल- जाति- निग्रहस्थानानां तत्त्वज्ञानात् निश्रेयसाधिगमः। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।

नीयन्ते विवक्षितार्थः येनेति न्यायः।

**1.1.4.1 नव्यन्यायदर्शनम्-** भारते दशमे एकादशशतके च बौद्धदर्शनस्य प्राधान्यं प्रायेण विनष्टमभूत्। सामाजिक-धार्मिकभेदाः दर्शनवैभिन्यस्य प्रेरकाः अभवन्। यद्यपि न्याय-वैशेषिकदर्शने भिन्ने, तथापि कानिचन समानकार्याणि द्रष्टुं शक्यते। यथा-

१. कार्यकारणभावः तदनुकूला चिन्ताधारा ।

२. लक्ष्ये समानता ।

३. उभयोः प्रयोजनं मोक्षप्राप्तिरेव ।

वैशेषिकदर्शनं प्रमेये प्राधान्यं कल्पयति। न्यायदर्शनं तु प्रमाणेषु।

वैशेषिकदर्शनं प्रमेये प्राधान्यं कल्पयति। न्यायदर्शनं तु प्रमाणेषु। तर्कस्य, युक्तेः, परीक्षायाः, परीक्षानिरीक्षणस्य च प्राधान्यं न्यायदर्शने वर्तते। अतः उभयोः प्राधान्यं स्वीकृत्य नूतना काचन सरणिराविर्भूता। सा सरणिः भवति नव्यन्यायः अथवा कणादन्यायसिद्धान्तः। तर्कसिद्धान्तमिति अपरं नाम च लब्धम्।

अस्य सिद्धान्तस्य प्रवर्तकः आसीत् गङ्गेशोपाध्यायः। सः द्वादशे शतके तत्त्वचिन्तामणिः इति ग्रन्थं रचितवान्। तस्मिन् चत्वारः अध्यायाः सन्ति। प्रत्यक्षानुमानोपमानशब्दान् प्रमाणानि अस्मिन् विशदयति। द्वादशशतकादारभ्य इदम्पर्यन्तं नव्यन्यायदर्शने अनेके ग्रन्थाः संजाताः। बह्वयः टीकाः च जाताः। तेषु भेदे उपकारप्रदः ग्रन्थः भवति 'तर्कसंग्रहः'। तस्य ग्रन्थस्य कर्ता आसीत् सप्तदशशतके आन्ध्राराज्ये आर्काड्प्रविश्यायां लब्धजन्मा अन्नम्भट्टमहाशयः। अयं ग्रन्थः न्यायवैशेषिकदर्शनयोः प्रामाणिकग्रन्थः। अस्य ग्रन्थस्य चतुस्त्रिंशत् टीकाः संस्कृते संजाताः।

**1.1.5 मीमांसादर्शनम्-** आस्तिकदर्शनेषु मीमांसादर्शनं नितरां प्राधान्यमर्हति। पूर्वमीमांसादर्शनम् इत्यपि अस्य नामान्तरम्।

मिमांसादर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव।

अस्य दर्शनस्य लक्ष्यं तु धर्मविषयप्रतिपादनमेव। मीमांसकाः कर्मवादिनः। कर्मणैव हि अभ्युदयमोक्षप्राप्तिः। भगवता जैमिनिना द्वादशभिः अध्यायैः रचितः ग्रन्थः भवति द्वादशलक्षणी। पूर्वमीमांसादर्शने केरलदेशस्य योगदानं महदेव । केरले जातं शाबरभाष्यं महान् स्थानं वहति। शबरस्वामिना रचितं भाष्यमेव शाबरभाष्यम्। मीमांसादर्शनस्य प्रधानतया भागद्वयं वर्तते। कुमारिलभट्टस्य भाट्टमतम्, तथा प्रभाकरस्य

प्राभाकरमतञ्च। भाट्टमतानुसारं षट् प्रमाणानि सन्ति। तानि प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तिः, अनुपलब्धिश्च। किन्तु प्राभाकरमते अनुपलब्धिः न प्रमाणम् ।

### 1.1.6 वेदान्तदर्शनम्-

वेदान्तो नाम वेदज्ञानार्थ प्रतिपादकः।

वेदस्योत्तरभाग प्रतिपादनात् उत्तरमीमांसादर्शनमिति नाम वर्तते। वेदान्तो नाम वेदानामवसानभागः। अन्तशब्दस्य आत्यन्तिकार्थस्वीकारे वेदान्तस्य आत्यन्तिकज्ञानं (परमार्थज्ञानम्) अथवा ब्रह्मज्ञानमित्यर्थः लभ्यते। अतः वेदान्तो नाम वेदज्ञानार्थप्रतिपादकः। वेदान्ते प्रस्थानत्रयं प्रसिद्धमेव। प्रस्थानत्रये उपनिषदः, भगवद्गीता, ब्रह्मसूत्रं चान्तर्भवन्ति। ब्रह्मसूत्रप्रणेता बादरायणः (पाराशरः-वेदव्यासः) वेदान्तदर्शनस्य उपज्ञाता भवति। ब्रह्मसूत्रे चत्वारो अध्यायाः। प्रत्यध्यायं चत्वारः पादाः। ब्रह्मसूत्रोऽयं ग्रन्थः चतुरध्यायी, चतुर्लक्षणी इत्यादिभिः नामभिः प्रख्यातः। वेदान्ते प्रधानतया पञ्च विभागाः सन्ति। ते अद्वैतः, विशिष्टाद्वैतः, द्वैतः, शुद्धाद्वैतः, द्वैताद्वैतश्च। वेदान्तिनः षट् प्रमाणानि अङ्गीकुर्वन्ति। तानि प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तिः, अनुपलब्धिः च।

#### 1.1.6.1 भेदाभेदमतम् (भास्कराचार्यः) -

जीवात्मपरमात्मनोः स्वभावतः तु अभेदत्वम्, तयोः केवलमुपाधिकारणेन एव भेदम।

मतेऽस्मिन् ब्रह्मणः सदा सगुणत्वमेव न तु निर्गुणत्वम्। जीवात्मपरमात्मनोः स्वभावतस्त्वभेदत्वम्, तयोः केवलमुपाधिकारणेनैव भेदः। समुच्चिताभ्यां ज्ञानकर्मभ्यामेव अविद्यानिवृत्तिरतोऽपवर्ग सिद्धिर्नान्यतरेण। तेनासौ भेदाभेदविचारः ज्ञानकर्मसमुच्चयवाद एव। भास्कराचार्यस्तु विक्रमानन्तरं ८७७ मितवत्सरमभितः स्थितिवानित्यैतिहासिका वदन्ति ।

#### 1.1.6.2 विशिष्टाद्वैतमतम् (रामानुजाचार्यः) -

ईश्वरस्य चिदचिद्विशिष्टत्वे विश्वस्तमिदं मतं भोक्तृभोग्यनियामकभेदेन

व्यवस्थितान्त्रिविधान् पदार्थान् मन्यते। तत्र चितो जीवाः परमात्मनः सकाशाद्भिन्नाः, नित्याः अणुपरिमाणाश्च। अचिच्छब्दवाच्यं दृश्यं जडं जगत् त्रिविधं भोग्य-भोगोपकरण-भोगायतनभेदात्। तत्र पूर्वपूर्वमूर्त्युपासनया पुरुषार्थप्रतिपन्थि-दुरितनिचयक्षये सति उत्तरोत्तरमूर्त्युपासनायामधिकारः सम्पद्यते।

ईश्वरस्य चिदचिद्विशिष्टत्वे विश्वस्तं विशिष्टाद्वैतं मतं।

उपासनञ्च पञ्चविधम्- अभिगमनमुपादानमिज्या स्वाध्यायो योग इति। यत्राभिगमनं देवतास्थानमार्गादेः सम्मार्जनोपलेपनादि, उपादानं गन्धपुष्पादिपूजा साहित्य-सम्पादनम्, इच्छेति देवतापूजनं, स्वाध्यायो नाम सङ्कीर्तन तत्त्वप्रतिपादकशास्त्रजपः, देवताऽनुसन्धानं योग इति।

प्रमाणं त्रिविधं प्रत्यक्षमनुमानं शब्दश्च। केनाऽपि प्रमाणेन परमाण्वादीनां जगत्कारणत्वं न सिध्यति। इच्छैवावताराणां हेतुः। फलञ्च तस्य साधुरक्षणदुष्टनाशन धर्मसंस्थापनानि। जीवब्रह्मणः विशेषणविशेष्यभावरूपः सम्बन्धः। तयोरंशांशिभावः।

### 1.1.6.3 द्वैतमतम् (मध्वाचार्यः)

- द्वैतमतं हि जीवपरमेश्वरयोः सेवकसेव्य भावेन द्वैततां स्वीकरोति न तु अद्वैतताम्। मतेऽस्मिन् जीवः परमेश्वराद्भिन्नः। तयोः कदापि न एकत्वम्। तयोश्च सेवकसेव्यभावसम्बन्धः। अत्र हि प्रत्यक्षं शब्दश्चेति प्रमाणद्वयमेव मतम्। ब्रह्मणोऽपि प्रमाणविषयता सिध्यति। तस्यास्तित्वे शब्दः प्रमाणम्। माध्वमतस्य सारांशश्चेत्थम्।

द्वैतमतं हि जीवपरमेश्वरयोः सेवकसेव्यभावेन द्वैततां स्वीकरोति

तत्र द्रव्यादि दशपदार्थाः सन्ति। द्रव्यं विंशतिः, गुणाश्च चतुर्विंशतिव्यतिरिक्ताः शम-दम-कृपा-तितिक्षा-सौन्दर्यादयः च। कर्म च विहित- निषिद्धो- दासीनभेदात् त्रिविधम्। तत्रोदासीनस्य उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनादिभेदाः। सामान्यं द्विविधं जात्युपाधिभेदेन नित्यानित्यभेदेन च।

विशेषास्त्वनन्ता यतो भेदाभावेऽपि भेदव्यवहारनिर्वाहका विशेषा अनन्ता एव। विशेषसद्भावस्तु परमात्मन्यपि। शक्तिश्चतुर्विधा अचिन्त्याधेयसहजपदभेदात्।

**1.1.6.4 द्वैताद्वैतमतम् (निम्बार्काचार्यः)-** व्यवहारकाले जीवेश्वरयोर्द्रष्टृभोक्तृरूपेण द्वैविध्यं; तच्च वास्तविकं पारमार्थिक दशायां तयोरैक्यं; तच्चौपचारिकमिति विचारकं मतं द्वैताद्वैतत्वेन प्रसिद्धम्। मतस्यास्य बीजं तु श्रुतिषु अपि उपलभ्यते। तत्र तत्र जीवेश्वरयोः द्वैतत्वाद्वैतत्वे उभे एवं सम्मते। तदेवं सङ्गृह्य निम्बार्काचार्येण द्वैताद्वैतमतं प्रवर्तितम्। मतेऽस्मिन् कृष्ण एव परमेश्वरः। स एव ब्रह्म । एतन्मतानुसारेण जीव-ब्रह्मणोरवस्थाविशेषेण भिन्नत्वाभिन्नत्वे। संसारदशायां नानात्मकस्य जीवस्य एकात्मब्रह्मणश्च नितान्तभेदेऽपि मुक्तदशायां चैतन्यात्मकतया जीवब्रह्मणोरभेद एव। तेन हि कारणात्मना जीवब्रह्मणोरैक्यं कार्यात्मना तयोर्भेदः। ईश्वरः चिदचिद्विशिष्टः, जीवस्तु चिल्लक्षणः; इन्द्रियनिरपेक्षमेव तत्तज्ज्ञानाधिगमसमर्थः। जीवा हि प्रकृताप्रकृतकालभेदेन त्रिधा भिद्यते।

व्यवहारकाले जीव ईश्वरयोर्द्रष्टृभोक्तृरूपेण द्वैविध्यं पारमार्थिकदशायां तयोरैक्यं।

जगति यदपि दृश्यमदृश्यं वा तत्सर्वमेव ब्रह्मव्याप्यम् । प्रतिपत्त्या भगवत्साक्षात्कारस्ततश्च मुक्तिरिति द्वैताद्वैतवादिनां मतम्। अथ मतस्यास्य समर्थका आचार्यास्तत्कृतयश्चात्र सङ्क्षेपेणोपस्थाप्यन्ते। श्रुतौ दृष्टमपि द्वैताद्वैतबीजकतिपयै राचार्येरुन्नीतम्। तेषु निम्बार्काचार्यः, श्रीनिवासः, केशवाचार्यः, पुरुषोत्तमाचार्यश्च सुप्रसिद्धाः।

**1.1.6.5 शुद्धाद्वैतम् (वल्लभाचार्यः)-** शुद्धाद्वैतमतं हि मायावादविरहितम् अद्वैतमतमेव। मायावादरहितत्वं एवास्य शुद्धत्वे हेतुः। शुद्धाद्वैतस्याऽपि बीजं श्रुतिष्वेव लभ्यते 'यो देवानां नामधा एक एव', 'एकं सत् विप्रा बहुधा कल्पयन्ति'

इत्यादिवाक्येषु किन्तु मतमिदं सिद्धान्तत्वेन प्रथमं श्रीमता विष्णुस्वामिना प्रपञ्चितं विलुप्तञ्च यद् वल्लभाचार्येण पुनरुन्नीतम्। पुष्टिमार्गसमर्थकं मतमिदं भक्तिरेव मोक्षसाधनं, कृष्ण एव परमेश्वर इति वैशिष्ट्यं भजते। बल्लभमते फलरूपा साधनरूपा च द्विविधा सेवा। वह्निविस्फुलिङ्गयोरिव शुद्धयोरेव जीवात्म परमात्मनोरैक्यम्।। सर्वं हि जगद् ब्रह्ममयम्। कार्यस्य ब्रह्मरूपस्य ब्रह्मैव कारणं नेतरत्। ब्रह्म हि साकारं सर्वशक्त्यैकं सर्वज्ञं सर्वकर्तृ सच्चिदानन्दरूपं च। तस्मादेवेदं जगत् प्रवर्तते।

शुद्धाद्वैतमतं हि मायावादविरहितम्अद्वैतमतमेव।

मतस्यास्याचार्याः वल्लभाचार्य- विट्ठलनाथ- कृष्णचन्द्र गिरिधराचार्य- हरिदासाचार्य- व्रजनाथ-विज्ञानभिक्षुप्रभृतयः। उल्लेखनीयग्रन्थाश्च वल्लभाचार्यस्य ब्रह्मसूत्रोपरि अणुभाष्यं, विट्ठलनाथस्य विद्वन्मण्डनं, कृष्णचन्द्रस्य भावप्रकाशिका, पुरुषोत्तमस्य अमृततरङ्गिणी, गिरिधरस्य शुद्धाद्वैतमार्तण्डः, बालकृष्णस्य प्रमेयरत्नार्णवश्च ।

### 1.1.2. नास्तिकदर्शनानि। (अवैदिकदर्शनानि)

नास्तिकाः वेदानां प्रामाण्यं नाङ्गीकुर्वन्ति । वेदाः मानवरचिताः अथवा मानवसृष्टारः इति ते विचारयन्ति। प्रधानतया नास्तिकदर्शनानि त्रिधा। तानि चार्वाकदर्शनं, बौद्धदर्शनं, जैनदर्शनं च भवन्ति ।

**1.1.2.1 चार्वाकदर्शनम्-** चारु वाकः चार्वाकः। चारु इत्यस्याकर्षकमित्यर्थः। वाक् इत्यस्य वाणी इत्यर्थः। अस्य दर्शनस्य सिद्धान्ताः आकर्षकाः तथा सन्तोषदायकाः च। अस्यापरं नाम भवति लोकायतदर्शनमिति। जनानां मध्ये प्रचुरप्रचारत्त्वादेव एतन्नाम। लोकः जनः। आयतः इत्यस्य विस्तृतः इत्यर्थः। इदं 'शुद्धबुद्धिवादः', 'भूतचैतन्यवादः',

चार्वाकदर्शनस्य सिद्धान्ताः आकर्षकाः तथा सन्तोषदायकाः च।

'भौतिकवादः', 'शुखवादः' इत्यपि शब्द्यन्ते। इदं चार्वाकनाम्ना प्रसिद्धं प्रथमं नास्तिकदर्शनम्। चार्वाकस्तु कः आसीदितिविषये पण्डिता बेभिद्यन्ते। केचित् बृहस्पतिं मन्यन्ते । अन्ये केचन बृहस्पतेः शिष्यः इति मन्यन्ते।

सर्वेभ्यः दर्शनेभ्यः प्राचीनतममपि अस्य दर्शनस्य प्रामाणिको ग्रन्थः न दृश्यते । चार्वाकमते चत्वारि तत्त्वानि। तानि पृथिव्यप्तेजोवायुरूपाणि। कामः एवैकः पुरुषार्थः। मरणमेव मोक्षः। प्रत्यक्षमेव प्रमाणम्। धर्मचिन्ता न वर्तते। सुखं दुःखं च स्वभावेनैव भवतः। तत्र धर्माधर्मौ न कारणम् ।

बौद्धदर्शने दुःखं, दुःखसमुदायः, दुःखनिरोधः, दुःखनिरोधगामिनी प्रतिपत् चेति चत्वारि सत्यानि।

**1.1.2.2 बौद्धदर्शनम्-** बौद्धदर्शनस्योपज्ञाता भवति गौतमबुद्धः। सोऽयं क्रिस्तोः पूर्वं पञ्चमे शतके जीवितमधारयत्। सहस्रवर्षकालं भारते प्रचुरप्रचारस्य अस्य दर्शनस्य महती प्रसक्तिरवर्तत। अस्य दर्शनस्य अनेके ग्रन्थाः सन्ति। किन्तु भगवता बुद्धेन रचितः ग्रन्थः न दृश्यते। बौद्धदर्शने दुःखं, दुःखसमुदायः, दुःखनिरोधः, दुःखनिरोधगामिनी प्रतिपत् चेति चत्वारि सत्यानि सन्ति । दुःखं तु सार्वत्रिकः क्लेशः। निखिलस्य दुःखस्य कारणमविद्यैव। अविद्यावशंगतः जीवः लोके अहर्निशं भ्रमति। बौद्धनये जीवः जगत् च अनित्यं तथा प्रतिक्षणं परिणामविधेये च। प्रत्यक्षम्, अनुमानम् इति प्रमाणद्वयं बौद्धेनाङ्गीकृतमेव ।

जैनदर्शने रत्नत्रयसम्पादनेन आत्मोन्नतिः जायते।

**1.1.2.3 जैनदर्शनम्-** जैनदर्शनस्योपज्ञाता वर्धमानमहावीरः भवति । तस्यापरं नाम भवति जिनः इति । अस्य दर्शनस्य अपरं नाम आर्हतमतम् इति। बौद्धदर्शनमिव वेदानां प्रामाण्यं न स्वीकरोति। तथापि दर्शनस्यास्य बीजं वेदेष्वेवं दृश्यते। रत्नत्रयसम्पादनेन आत्मोन्नतिः जायते। सम्यग्दर्शनं, सम्यग्ज्ञानं, सम्यक् चारित्र्यं च रत्नत्रयम्। आचार्याणामुपदेशानुसरणं सम्यक् ज्ञानम्। आचार्यवचनेषु विश्वासः सम्यग्दर्शनम् । तदनुसारं

जीवितवृत्तिकरणं सम्यक् चारित्र्यम्। जैनदर्शने त्रीणि प्रमाणानि प्रत्यक्षम्, अनुमानम्, आगमः चेति।

## Summarised Overview

सांख्य, योग, न्याय, वैशेषिक, पूर्वमीमांसा, उत्तरमीमांसा एते आस्तिकदर्शनानि (वेदप्रामाणिकाः)। सांख्ये पञ्चविंशतिः तत्त्वानि- एका मूलप्रकृतिः, मूलप्रकृतेः विकृतयः सप्त, केवला विकृतयः षोडश, एकः पुरुषश्च इति पञ्चविंशतिः तत्त्वानि । योगस्य अष्टौ अङ्गा नि। तानि यम-नियम-आसन- प्राणायाम- प्रत्याहार- धारणा- ध्यान- समाधिभेदाः। द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्थाः इति वैशेषिकाः कथयन्ति । चत्वारि प्रमाणानि। उत्कृष्टतमं दर्शनमेव न्यायदर्शनम् । प्रमाणैः अर्थपरीक्षणं न्यायः।

मीमांसादर्शनस्य प्रधानतया भागद्वयं वर्तते । कुमारिलभट्टस्य भाट्टमतम्, तथा प्रभाकरस्य प्राभाकरमतञ्च ।वेदान्तो नाम वेदज्ञानार्थप्रतिपादकः। ब्रह्मसूत्रप्रणेता बादरायणः वेदान्तदर्शनस्य उपज्ञाता भवति। द्वैतमतं हि जीवपरमेश्वरयोः सेवकसेव्यभावेन द्वैततां स्वीकरोति।व्यवहारकाले जीवेश्वरयोर्द्रष्टृभोक्तृरूपेण द्वैविध्यं तच्च वास्तविकं पारमार्थिकदशायां तयोरैक्यं तच्चौपचारिकमिति विचारकं मतं द्वैताद्वैतत्वेन प्रसिद्धम्। मायावादरहितत्वमेवास्य शुद्धत्वे हेतुः। मायासम्बन्धरहितं शुद्धं ब्रह्म तेन कार्यकारणरूपं शुद्धमेव ब्रह्म न तु मायिकम् । जीवब्रह्मणोः कार्यरूपेणेव भेदो न तु कारणात्मना ।

व्यवहारकाले जीवेश्वरयोर्द्रष्टृभोक्तृरूपेण द्वैविध्यं तच्च वास्तविकं पारमार्थिकदशायां तयोरैक्यं तच्चौपचारिकमिति विचारकं मतं द्वैताद्वैतत्वेन प्रसिद्धम्। ईश्वरस्य चिदचिद्विशिष्टत्वे विश्वस्तमिदं मतं भोक्तृभोग्यनियामकभेदेन व्यवस्थितां त्रिविधान् पदार्थात् मन्यते। जीवात्मपरमात्मनोः स्वभावतस्त्वभेदत्वम्, तयोः केवलमुपाधिकारणेनैव भेदः। चार्वाक, जैन, बौद्ध एते नास्तिकदर्शनानि (वेदाप्रामाणिकाः)। बौद्धदर्शने दुःखं, दुःखसमुदायः, दुःखनिरोधः, दुःखनिरोधमार्गः प्रतिपत् चेति चत्वारि सत्यानि सन्ति। जैनदर्शनस्य अपरं नाम आर्हतमतम् इति। रत्नत्रयसम्पादनेन आत्मोन्नतिः जायते।

चार्वाकदर्शनस्य सिद्धान्ताः आकर्षकाः तथा सन्तोषदायकाः च। अस्यापरं नाम भवति लोकायतदर्शनमिति ।

## Assignments

1. भारतीयदर्शनं संक्षेपेण विशदयत।
2. अद्वैतदर्शनस्य प्रमुखभेदाः के, विशदयत ।
3. भारतीयदर्शनानां प्रमाणानि विशदयत।
4. भारतीयदर्शनानां पदार्थाः विशदयत ।
5. आस्तिकनास्तिकदर्शनयोः भेदाभेदाः निरूपयत ।

## Suggested Readings

1. संस्कृतसाहित्येतिहासः, आचार्य लोहमणि दाहलाः, चौखम्बा कृष्णदास अकादमि वारणासि,1998
2. सर्वदर्शनसंग्रहः,श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, चौखम्बा विद्याभवन्, वारणासि ।

## References

1. History of Indian Philosophy, Surendranath Das Guptha , Vol -III, MLBD, Varanasi
2. Indian Philosophy - Dr.S. Radhakrishnan, Vol- I & II, Varanasi, Delhi.
3. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal Banarsidass Publishers PrivateLimited, Delhi, 2000
4. Outlines of Indian Philosophy - Jadunath Sinha , New Central Book agency, Culcutta, 1992.

Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# सांख्यकारिकायाः योगसूत्रस्य च विशेषपरिचयः

Unit-2 सांख्यकारिकायाः योगसूत्रस्य च विशेषपरिचयः

## Learning Outcomes

- भारतीयदर्शनपद्धतेः सामान्यावगमनम्।
- सांख्ययोगयोः विशेषांशानाम् अवगमनम्।
- सांख्यकारिकायाः सांख्यसिद्धान्तस्य च अवगमनम्।
- योगदर्शनप्रक्रियायाः विशेषांशानाम् च अवगमनम्।

## Background

भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते। यदेव किंचित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शनजगति रत्नवद् बहुमूल्यानि आकल्यन्ते। भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अतएव अनेके दर्शनकाराः समाजसुधाकररूपेण प्रथिताः सन्ति । विदितं हि सर्वैः लोकेऽस्मिन् यत् प्राणिनः सर्वे सुखाय दुःखमोक्षाय च यतन्ते सर्वथा सर्वदा च इति। पण्डिताः सकलं जगत् सारहीनं मत्वा किं सत्यमिति विज्ञातुम् इच्छन्तः सन्तः जीवः जगद् ब्रह्म च अधिकृत्य विचारम् अनवरतमकुर्वन्। एवं जिज्ञासुभिः पण्डितकृतेभ्यः प्रयत्नेभ्यः विविधदर्शनानाम् आविर्भावः। अतीते एकके दर्शनान्यधिकृत्य सामान्यस्वरूपमस्माभिः पठितम्। अस्मिन्नेकके


SGOU

सांख्यकारिकायाः योगसूत्रस्य विशेषपरिचयः कार्यः। तदत्र प्रविश्यामः।

## Keywords

सांख्यं- कपिलाचार्यः, योगं- पतञ्जलिमहर्षिः, दर्शनं, त्रिविधदुःखानि, आध्यात्मिकम्, आधिभौतिकं, आधिदैविकं,ब्रह्म, जगत्, जीवात्मा, परमात्मा, प्रकृतिः, ईश्वरः।

## Discussion

संख्याशब्दो गणना, प्रसिद्धिःइत्यर्थद्वयं वर्तते।

**1.2.1 सांख्यदर्शनम् (कपिलाचार्यः)** - सङ्ख्यायते सम्यक् ज्ञायते तत्त्वं येनेति सांख्यम्। संख्याशब्दस्य गणना, प्रसिद्धिः इत्यर्थद्वयं वर्तते। सांख्यशब्दस्य निष्पत्तिः सम् उपसर्गपूर्वकं ख्या धातोः सञ्जाता। अस्य अर्थोऽस्ति सम्यग्विचाराणाम् उपस्थापकं शास्त्रम्। पञ्चविंशतितत्त्वानां विशदीकरणम् आचार्येण कपिलमुनिना प्रोक्तम्। अस्मिन्नेव शास्त्रे सर्वप्रथमं तत्वानां संख्या परिभाषिता अस्ति। अतः एव अस्य नाम सांख्यमित्यस्ति इत्यपि केचन प्रतिपादयन्ति। तथापि एषा व्युत्पतिः न स्वीकार्या। यतो हि एतद्विपरीतस्य प्रकृतिपुरुषयोर्भेदरूपस्य विवेकस्य ज्ञापकं शास्त्रं सांख्यशास्त्रमस्ति। प्रकृतेः पुरुषस्य च महत्वप्रतिपादनरूपो बोधः इति। द्वितीये प्रकृतिपुरुषान्यता-ख्यातिरूपः अवबोध संख्यायत इति च।

कपिलः, आसुरिः, पञ्चशिखाचार्यः, विज्ञानभिक्षुः, ईश्वरकृष्णः इत्येते सांख्यदर्शने प्रसिद्धाः आचार्याः। एषु ईश्वरकृष्णेन विरचिता सांख्यकारिका अद्य सर्वप्रमाणतया

स्वीक्रियते। आधिभौतिकाधिदैविकाध्यात्मिकम् इति दुःखत्रयात् मोचनं, प्रकृतिपुरुषविवेकपरिज्ञानात् सम्पद्यते। इदमेव कैवल्यपदेन व्यवह्रियते। प्रकृतिपुरुषादि पञ्चविंशतिः तत्वानि दर्शनेऽस्मिन् प्रतिपादितानि। प्रकृतिः, महत्, अहङ्कारः, एकादशेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चभूतानि ,पुरुषः चेति चतुर्विंशति तत्वानि। एतैः चतुर्विंशतितत्वैः सह पुरुषोऽपि मिलित्वा आहत्य पञ्चविंशतिः तत्वानि सन्ति। तानि च तत्वानि एवं निर्दिशति।

ईश्वरकृष्णेन विरचिता सांख्यकारिका सर्वप्रमाणतया स्वीक्रियते।

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकाराः न प्रकृतिर्न विकृतिः पुरुषः।।**

(सां. का **3**)

सांख्यदर्शनानुसारं संपूर्णं विश्वं सत्वरजस्तमोगुणानां परिणामः अस्ति। एषां त्रयाणां गुणानां तारतम्येन जायते यत् वस्तुनः स्वरूपं उत्पद्यते विनश्यति च सांख्यमते कार्यकारणसम्बन्धः सत्कार्यवाद इति प्रसिद्धः। अयमेव परिणामवादः, विकारवादः इत्यादिनामभिः च व्यवह्रियते। उक्तं च-

सत्कार्यवादं ,पुरुषास्तित्वं , पुरुषबहुत्वम् एतानि विषयाणि अत्रप्रतिपादयन्ति। प्रतिपादयन्ति ।

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ।।**

(सां. का **9**) ।

सत्वरजःतमोगुणानां साम्यावस्था प्रकृतिः। सत्कार्यवादं, पुरुषास्तित्वं, पुरुषबहुत्वम् एतानि विषयाणि अत्र

प्रतिपादयन्ति। प्रत्यक्षम्, अनुमानम्, शब्दः इति त्रीणि प्रमाणानि सांख्ये प्रसिद्धानि भवन्ति।

पञ्चविंशतिस्तत्वानि, सृष्टिक्रमः,सृष्टिहेतुः, गुणत्रयं,मेक्षः प्रतिपादयन्ति।

प्रथमे पञ्चविंशतितत्त्वानि एका मूलप्रकृतिः, मूलप्रकृतेः विकृतयः सप्त, केवला विकृतयः षोडश, एकः पुरुषश्च इति पञ्चविंशतिः तत्त्वानि। तत्र महाभूतानि पञ्च पृथिव्यप्तेजो-वाय्वाकाशानि पञ्चतन्मात्रा गन्धरसरूपस्पर्शशब्दाः, इन्द्रियाणि बाह्यानि दश श्रोत्रत्वक्रसनानासिकाख्यानि पञ्च ज्ञानसाधनानि; वाक्-पाणि-पाद-पायु-उपस्थाख्यानि पञ्च कर्मसम्बन्धा-ख्यानीति कृत्वा, अन्तरात्मकं चतुर्विधं मनोबुद्ध्यहङ्कार-चित्तभेदं, तद्भिन्नस्वभावः पुरुष इति पञ्चविंशतिस्तत्वानि। मूलप्रकृतिरव्यक्तं, अव्यक्तात्महत्तत्त्वं तस्मात्पञ्चतन्मात्राणि ततश्च पञ्चमहाभूतानि ततश्च शरीरमिति सृष्टिक्रमः। सगुणा प्रकृतिरेव सृष्टेर्बीजम्। गुणानां साम्यावस्था प्रकृतिर्वैषम्यावस्था च तेषां सृष्टिहेतुः। तत्र सत्वबहुलरज स्तमोभ्यां महत्तत्त्वं, रजोबहुलसत्त्वतमोभ्यां अहङ्कारं, तमोबहुलसत्त्वरजोभ्यां पञ्चतन्मात्राः, यदुद्भूतानि पञ्चमहा- भूतानि, दशेन्द्रियाणि मनश्चेति सृष्टिक्रमः। तत्राहङ्कारो वैकारिक तैजस तामसभेदात् त्रिविधः। वैकारिकान्मनस्तत्त्वं तैजसाद्बुद्धितत्त्वमिन्द्रियाणि च तामसात्पञ्चतन्मात्राः इति। प्रकृतिः प्रधानं, प्रधानपुरुष-योरन्यताख्यातिग्रहस्त्रिविधदुःखात्यन्तनिवृत्तिरूपो मोक्षः। तत्र प्रत्यक्षानुमानागमाः प्रमाणानि। जीवेश्वरयोर्भेदेन तयोर्द्वैतत्वम् एव। वेदाश्चापौरुषेया अतस्तेषां स्वतः प्रामाण्यम्। प्रकृतौ पुरुषाकारापत्त्या बन्धस्तयोरन्यताबुद्धिर्मोक्ष इति सङ्क्षेपतः ।

अतिप्राचीनत्वेन सांख्यमतस्य साहित्यमपि सुविपुलम् । तस्यात्र सङ्क्षेपेण परिचयः प्रस्तूयते ।

### 1.2.2 पतञ्जलिमहर्षेः योगदर्शनम् - सेश्वरसांख्यदर्शनमेव

योगदर्शनस्य प्रथम नामः। आस्तिकदर्शनक्रमे द्वितीयं स्थानम् योगदर्शनम्। युज्यते अनेन इति योगः। सांख्यप्रोक्तः पञ्चविंशतितत्वैः सहैव ईश्वरस्यापि प्रतिपादनात् दर्शनमिदम् सेश्वरसांख्यम् इत्यपि उच्यते। पतञ्जलिमहर्षिप्रणीतानि योगसूत्राणि अस्य प्रामाणिकं शास्त्रम्। योगसूत्राणामुपरि व्यासविरचितभाष्यमपि प्रधानमेव। श्रीवाचस्पतिमिश्रः योगभाष्योपरि तत्ववैशारदी इति नामिकां टीकां रचितवान्। अत्र भाष्यं अवश्यमेव विशदीकृतं समभूत्।

चित्तवृत्तीनां सर्वतोभावेन निरोधः एव योगः।

चित्तवृत्तीनां सर्वतोभावेन निरोधः एव योगः। योगश्चित्तवृत्तिनिरोधः (यो.सू.1.2) इति योगलक्षणम्। चित्तवृत्तिं निरूप्य निरोधोपायः उच्यतेअभ्यासवैराग्याभ्यां तन्निरोधः इति। अभ्यासो नाम तत्र स्थितो यत्नः। दृष्टानुश्रविकविषय-वितृष्णस्यवशीकारसंज्ञा वैराग्यम् इति वैराग्यलक्षणम्। (यो.सू.1.15) अत्र उपायान्तरत्वेन ईश्वरप्रणिधानमपि निर्दिशति। ईश्वरप्रणिधानात्वात् इति (यो.सू.।.23)। ईश्वरस्वरूपं उच्यते। क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुष-विशेषः ईश्वरः इति (यो.सू.1.24)। संसारानुभवः दृक्दृश्य-संयोगेन भवति दृक् इति पुरुषः, दृश्यं इति प्रधानादि जगत् च उच्यते। अनयोः संयोगेन अशुद्धिः भवति इति तन्निराकर्तुं योगाङ्गानुष्ठानाद- शुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः (यो.सू.2.28) इति योगाङ्गानां प्रस्तावः भवति।

यमादि योगस्य अष्टौ अङ्गानि प्रतिपादयत।

योगस्य अष्टौ अङ्गानि। तानि यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधि भेदाः। तत्र अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः यमाः। विषयेभ्यो इन्द्रियाणां नियन्त्रणं (आत्मनियन्त्रणं) यमः। जीवसन्धारणाय अनुष्ठातुं योग्याः नियमाः। शौच सन्तोष-तपः-स्वाध्याय-ईश्वर-प्रणिधानानि नियमाः। स्थिरसुखम् आसनम्। श्वासप्रश्वासनिरोधः प्राणायामः। शरीरायावश्यकम् ऊर्जदायकरूपेण श्वासोच्छ्वासक्रमः साध्यः। मनोऽऽकर्षकेभ्यः विषयेभ्यः इन्द्रियाणां नियन्त्रणं प्रत्याहारः। चित्तस्य एकाग्रता धारणा। योगदर्शनं प्रत्यक्षम्, अनुमानं, शब्दः (आगमः) इति प्रमाणत्रयं अङ्गीकरोति । मायातः जीवात्मनः मोक्षः समाधिः कैवल्यप्राप्तिः (मोक्षप्राप्तिः) एव सांख्यानुसारं जीवितलक्ष्यम्। अभ्यासेन वैराग्येण च योगसिद्धिः जायते।

## Summarised Overview

सांख्यशब्दस्य निष्पत्तिः सम् उपसर्गपूर्वकं ख्या धातोः सञ्जाता। अस्य अर्थोऽस्ति सम्यग्विचाराणाम् उपस्थापकं शास्त्रम्। अस्मिन्नेव शास्त्रे सर्वप्रथमं तत्वानां संख्या परिभाषिता अस्ति। प्रथमेपञ्चविंशतितत्त्वानि एका मूलप्रकृतिः, मूलप्रकृतेः विकृतयः सप्त, केवला विकृतयः षोडश, एकः पुरुषश्च इति पञ्चविंशतिः तत्त्वानि। सांख्यदर्शनानुसारं संपूर्णं विश्वं सत्वरजस्तमोगुणानां परिणामः अस्ति। सत्वरजःतमोगुणानां साम्यावस्थां प्रकृतिः। सत्कार्यवादं, पुरुषास्तित्वं, पुरुषबहुत्वम् एतानि विषयाणि अत्र प्रतिपादयन्ति। प्रत्यक्षम्, अनुमानम्, शब्दः इति त्रीणि प्रमाणानि सांख्ये प्रसिद्धानि भवन्ति। चित्तवृत्तीनां सर्वतोभावेन निरोधः एव योगः। ईश्वरप्रणिधानात्वात् इति सूत्रेण ईश्वरस्वरूपं उच्यते।

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः इति । योगस्य अष्टौ अङ्गानि- यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधि भेदाः। मायातः जीवात्मनः मोक्षः समाधिः। कैवल्यप्राप्तिः एव सांख्यानुसारं जीवितलक्ष्यम्। अभ्यासेन वैराग्येण च योगसिद्धिः जायते।

## Assignments

1. सांख्यमते प्रमाणानि कानि ? विशदयत।
2. सांख्यमते प्रकृतिः का?
3. सांख्यदर्शने पञ्चविंशतितत्वानि। विशदयत ।
4. सांख्यदर्शने पुरुषं प्रतिपादयत ।
5. योगदर्शनस्य अष्टाङ्गानि लिखत।

## Suggested Readings


1. SamkhykarikawithgoudapadacommentaryPt.Dhundhirajsastri,Chowkhamba Sanskrit Series Office, Varanasi.
2. Samkhyakarika of Isvarakrishna with the commentary of Gaudapada, Dr. T.G.Manikar, Oriental Book Agency Poona.
3. पातञ्जलयोगसूत्राणि, हरि नारायण आपटे, आनन्दाश्रमसंस्कृतग्रन्थावलिः,1904
4. आचार्य लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१६


## References


1. The Samkhykarika of Mahamuni Sri lwarakrishna, with the commentary sarabodhini of Pandit Sivanarayanasastri with Sankhyatattvakaumudi of Vachaspati misra.
2. Patanjali Yoga sutras: Sanskrit text with transliteration, translation & commentary by Swami Vivekananda.

Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# सांख्यकारिकायाः अवतरणश्लोकाः तत्त्वसंख्या च (1-3कारिकाः)

## Learning Outcomes

- भारतीय दर्शनपद्धतेः सामान्यावगमनं लभते।
- सांख्यकारिकायाः सांख्यसिद्धान्तस्य च अवगमनं लभते।
- दार्शनिकानां प्रमाणतत्त्वविचारविषयावगमनं जायते ।
- प्रकृतेः सिद्धिं जानाति।
- दुखः त्रयं जानाति।
- त्रिगुणानां स्वरूपकार्यप्रयोजनानि जानाति।

## Background

दर्शनेषु अतिप्राचीनदर्शनमस्ति सांख्यम्। संख्यायन्ते गण्यन्ते तत्वानि येन तत् सांख्यम्। महामुनिना ईश्वरकृष्णेन विरचिता भवति सांख्यकारिका। पञ्चविंशतितत्वानां विचार एवं सांख्यम्, तमधिकृत्य कृतो ग्रन्थः सांख्यकारिका। अर्थात् प्रकृत्तिपुरुषयोः पृथक् पृथक् संख्यानं एवं सांख्यम्।दर्शनेऽस्मिन् सृष्ट्याधाररूपेण द्वे तत्त्वे परिकल्प्यते- पुरुषः प्रकृतिः च। पुरुषः निर्विकारः सचेतनः किन्तु भेदाः अनेके। प्रकृतिः जडीभूता एका च विद्यते। जगतः उत्पत्तिः अनयोः संयोगादेव भवति। उत्पत्तिक्रियया तेषां आविर्भावः एव सञ्जायते। सांख्यदर्शनस्य अस्य सिद्धान्तः सत्कार्यरूपेण प्रसिद्धिमवाप्नोत्। सत्वादिगुणानां महदादिकारणानां प्रकृतिपुरुषयोश्च वर्णनं अत्र क्रियते।

## Keywords

दुःखत्रयम्, आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकम्,दृष्टम्, अनुमानम्, आप्तवचनं, प्रमेयसिद्धिः, प्रमाणाः, प्रतिविषयाध्यवसायः, लिङ्गलिङ्गिपूर्वकम् आप्तश्रुतिराप्तवचनम्, व्यक्ताव्यक्तज्ञाः।

## Discussion

**दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ।**

**दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततो भावात्।।**

सारांशः-

दुःखत्रयम् - आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकं चेति।

तत्र दुःखत्रयम् आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकञ्चेति। तत्र आध्यात्मिकं द्विविधं- शारीरं मानसं चेति। शारीरं वातपित्तश्लेष्मविपर्ययकृतं ज्वरातिसारादि। मानसं प्रियवियोगाप्रियसंयोगादि। आधिभौतिकं चतुर्विधभूतग्राम निमित्तं (जरायुजं, अण्डजं, उद्भिजं, स्वेदजम् इति चतुर्विध भूतसमुदायोत्थम्) मनुष्यपशुमृगपक्षिसरीसृपदंशमशकयूका-मत्कुणमत्स्यमकरग्राहस्थावरेभ्यो जरायुजाण्डजस्वेदजो-द्भिज्जेभ्यः सकाशादुपजायते। आधिदैविकं - देवानामिदं दैवम्, दिवा प्रभवतीति वा दैवं, तदधिकृत्य (तन्निमित्तीकृत्येत्यर्थः) यदुपजायते शीतोष्णवातवर्षाशनिपातादिकम्। तस्य दुःखत्रयस्य अभिघातको योऽसौ हेतुः तत्रेति। 'दृष्टे सापार्था चेत्, दृष्टे हेतौ दुःखत्रयाभिघातके सा जिज्ञासाऽपार्था चेद्, यदि तत्राध्यात्मिकस्य द्विविधस्यापि आयुर्वेदशास्त्रक्रियया

प्रियसमागमाप्रियपरिहारकटुतिक्तकषायक्काथादिभिर्दृष्ट एव आध्यात्मिकोपायः, आधिभौतिकस्य रसादिनाऽभिघातो दृष्टः, दृष्टे साऽपार्था चेदेवं मन्यसे; न, एकान्तात्यन्ततोऽभावात्। यत एकान्ततोऽवश्यम् अत्यन्ततो नित्यं दृष्टेन हेतुनाऽभिघातो न भवति, तस्मादन्यत्र एकान्तात्यन्ताभिघातके हेतौ जिज्ञासा विविदिषा कार्येति ।

**दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।।२॥**

सारांशः –

अस्यां कारिकायां पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञाः कथ्यन्ते।

'यदि दृष्टादन्यत्र जिज्ञासा कार्या, ततोऽपि नैव, यत आनुश्रविको हेतुः। दुःखत्रयाभिघातकः, आनुश्रविकः, स च आगमात् सिद्धः। दृष्टेन तुल्यो दृष्टवत्, योऽसौ आनुश्रविकः, कस्मात् स दृष्टवद्? यस्मादविशुद्धिक्षयातिशययुक्तः। एवमिन्द्रादिनाशात् क्षययुक्तः। तथाऽतिशयो विशेषस्तेन युक्तः। विशेषगुणदर्शनादितरस्य दुःखमस्यादिति। तद्विपरीतः श्रेयान्, ताभ्यां दृष्टानुश्रविकाभ्यां विपरीतः श्रेयान् प्रशस्यतर इति, अविशुद्धिक्षयातिशयायुक्तत्वात् । स कथमित्याह- व्यक्ताव्यक्तज्ञ विज्ञानात्। तत्र व्यक्तं महदादि बुद्धिरहङ्कारः, पञ्चतन्मात्राणि (शब्दः,स्पर्शः,रूपः,रसः,गन्धः), एकादश इन्द्रियाणि- (पञ्च ज्ञानेन्द्रियं- श्रोत्रं,त्वक्,चक्षुः,जिह्वा,घ्राणं), (पञ्च कर्मेन्द्रियं-

वाक्,पाणि,पादः,पायु,उपस्थं) मनस्, पञ्चमहाभूतानि (पृथ्वि, अप्, तेजः, वायुः, आकाशः), अव्यक्तं प्रधानम्, ज्ञः- पुरुषः एवमेतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञाः कथ्यन्ते, एतद्विज्ञानात् श्रेय इति। 'उक्तं च - 'पञ्चविंशतितत्त्वज्ञ' इत्यादि ।

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।**
**षोडशकस्तु विकारो न प्रकृतिर्नविकृतिः पुरुषः।।३।।**

सारांशः –

अत्र सप्त प्रकृति - विकृतयः, षोडशकस्तु विकारः च विशदयत।

'अथ व्यक्ताव्यक्तज्ञानां को विशेष इति'। मूलप्रकृतिः प्रधानम् उच्यते - प्रकृतिविकृतिसप्तकस्य मूलभूतत्वात्, मूलं च सा प्रकृतिश्च मूलप्रकृतिः, अविकृतिः- अन्यस्मात् न उत्पद्यते, तेन प्रकृतिः। कस्यचित् विकारो न भवति। महदाद्याः प्रकृतिविकृतयः सप्त। महान् बुद्धिः, बुद्ध्याद्याः सप्त-बुद्धिः, अंहङ्कारः, पञ्च तन्मात्राणि एताः सप्त प्रकृतिविकृतयः। तद् यथा - प्रधानाद् बुद्धिरुत्पद्यते तेन विकृतिः प्रधानस्य विकार इति, स एव अहङ्कारमुत्पादयति अतः प्रकृतिः। अहंङ्कारोऽपि बुद्धेरुत्पद्यत इति विकृतिः, स च पञ्च तन्मात्राण्युत्पादयति इति प्रकृतिः। तत्र शब्दतन्मात्र अहङ्कारादुत्पद्यत इति विकृतिः तस्मादाकाशमुत्पद्यत इति प्रकृतिः। तथा स्पर्शतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिः तदेव वायुमुत्पादयतीति प्रकृतिः। गन्धतन्मात्र अहङ्कारादुत्पद्यत इति विकृतिस्तदेव पृथिवीमुत्पादयतीति प्रकृतिः।

रूपतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेव तेज उत्पादयति इति प्रकृतिः। रसतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेव अप् उत्पादयतीति प्रकृतिः। एवं महदाद्याः सप्त प्रकृतयो विकृतयश्च। षोडशकस्तु विकारः; पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनः, पञ्च महाभूतानि एष षोडशको गणो विकृतिरेव, विकारो विकृति। न प्रकृतिर्न विकृतिः पुरुषः।

## Summarised Overview

दुःखत्रयम्- आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकञ्चेति। तत्र आध्यात्मिकं द्विविधं - शारीरं मानसं चेति। आधिभौतिकं चतुर्विधभूतग्रामनिमित्तं मनुष्यपशुमृगपक्षि सरीसृपदंशमशकयूकामत्कुणमत्स्यमकरग्राहस्थावरेभ्यो जरायुजाण्डजस्वेदजोद्भिज्जेभ्य सकाशादुपजायत। आधिदैविकं - देवानामिदं दैवम्, दिवा प्रभवतीति वा दैवं, तदधिकृत्य (तन्निमित्तीकृत्येत्यर्थः) यदुपजायते शीतोष्णवातवर्षाशनिपातादिकम्।तत्र व्यक्तं महदादिबुद्धिरहङ्कारः, पञ्चतन्मात्राणि, एकादशेन्द्रियाणि (मनस्), पञ्चमहाभूतानि, अव्यक्तं- प्रधानम्, ज्ञः- पुरुषः एवमेतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञाः कथ्यन्ते, एतद्विज्ञानात् श्रेय इति। 'उक्तं च - 'पञ्चविंशतितत्त्वज्ञ' इत्यादि ।महदाद्याःप्रकृतिविकृतयः सप्त। बुद्धिः, अंहङ्कारः पञ्च तन्मात्राणि एताः सप्त प्रकृतिविकृतयः।षोडशकस्तु विकारः; पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनः, पञ्च महाभूतानि एष षोडशको गणो विकृतिरेव विकारो विकृति।

## Assignments

1. दुखःत्रयं प्रतिपादयत।
2. आध्यात्मिकं दुःखं किम्?
3. आधिभौतिकं दुःखं विशदयत।
4. किं नाम व्यक्तम् ?
5. सांख्यकारिकायां पञ्चविंशतितत्वानि विशदयत।
6. 'व्यक्ताव्यक्तज्ञाः' विशदयत।
7. प्रकृतिविकृतयः कानि?
8. विकारो नाम किम्?

## Suggested Readings


1. Samkhykarika with Goudapada commentary Pt.Dhundhirajsastri, Chowkhamba Sanskrit Series Office, Varanasi.
2. Samkhyakarika of Isvarakrishna with the commentary of Gaudapada , Dr. T.G.Manikar , Oriental Book Agency Poona
3. Samkhyakarika with Samkhya TattvaKaumudi 1917.


## References


1. The Samkhykarika of Mahamuni Sri lwarakrishna, with the commentary sarabodhini of Pandit Sivanarayanasastri with Sankhyatattvakaumudi of Vachaspati misra.
2. SamkhykarikaIswarakrishnaPoshtacharya
3. SamkhykarikaIswarakrishnaP.Aravindhapisharadi
4. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4

Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# सांख्यमतरीत्या प्रमाणनिरूपणम्

## Learning Outcomes

- भारतीयदर्शनपद्धतेः सामान्यावगमनं लभते।
- सांख्यकारिकायाः सांख्यसिद्धान्तस्य च अवगमनं लभते।
- सांख्यकारिकायाः प्रमाणज्ञानस्य अवगमनं जायते।

## Background

भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते। यदेव किंचित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शनजगति रत्नवद् बहुमूल्यानि आकल्यन्ते। भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अतएव अनेके दर्शनकाराः समाजसुधाकररूपेण प्रथिताः सन्ति । अस्मिन्नेकके सांख्यदर्शनोक्तानि प्रमाणानि निरूपयति। तदत्र प्रविश्यामः।

## Keywords

प्रमेयं, प्रमाणं, दृष्टं,अनुमानं, आप्तवचनं, बुद्धीन्द्रियाणि, पञ्चतन्मात्राणि, पूर्ववत्, शेषवत्, सामान्यतोदृष्दं, लिङ्गपूर्वकं, अतीन्द्रियाणाम्, अतिदूरात्, उपलब्धिः, सामीप्यात्।

SGOU

## Discussion

**दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।**

**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि।।४।।**

सारांशः -

प्रमाणत्रये दृष्टं प्रतिपादयत।

एवमेषां व्यक्ताव्यक्तज्ञानां त्रयाणां पदार्थानां कैः कियद्भिः प्रमाणैः केन कस्य वा प्रमाणेन सिद्धिर्भवति इति पठामः। इह लोके प्रमेयवस्तु प्रमाणेन साध्यते, यथा प्रस्थादिभिः व्रीहयस्तुलया चन्दनादि, तस्मात् प्रमाणमभिधेयम्। दृष्टं तथा श्रोत्रं, त्वक्, चक्षु, जिह्वा, घ्राणमिति पञ्च बुद्धीन्द्रियाणि, शब्द-स्पर्श-रूप-रस-गन्धा इति पञ्चतन्मात्राणि, एषां पञ्चानां पञ्चैव विषया यथासंख्यम्, शब्दं श्रोत्रं गृह्णाति, त्वक् स्पर्शं गृह्णाति, चक्षुः रूपं गृह्णाति, जिह्वा रसं गृह्णाति, घ्राणं गन्धमिति, एतद् दृष्टमित्युच्यते प्रमाणम्। प्रत्यक्षेणानुमानेन वा योऽर्थो न गृह्यते स आप्तवचनाद् ग्राह्यः। प्रत्यक्षानुमानाग्राह्यम् अपि आप्तवचनाद् गृह्यते।

पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञा इत्युच्यन्ते।

एतेषु प्रमाणेषु सर्वप्रमाणानि सिद्धानि भवन्ति। तत्र अनुमाने तावदर्थापत्तिरन्तर्भूता, सम्भवाभावप्रतिभा ऐतिह्योपमा आवाप्तवचने। तस्मात् त्रिष्वेव सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं, तदाह- तेन त्रिविधेन प्रमाणेन प्रमाणसिद्धिः भवतीति (दृष्टादि त्रिविध प्रमाणेऽर्थापत्यादि

प्रमाणान्तर्भावो भवतीत्यर्थः) वाक्यशेषः। प्रमेयसिद्धिः प्रमाणाद्धि। प्रमेयं प्रधानं बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि पुरुष इति, एतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञा इत्युच्यन्ते, तत्र किंचित् प्रत्यक्षेण साध्यं किंचिदनुमानेन किंचिदागमेनेति त्रिविधं प्रमाणमुक्तम् ।। ४ ।।

**प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।**
**तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनम् तु ।।५।।**

सारांशः-

प्रतिविषयेषु श्रोत्रादीनां शब्दादि- विषयेषु अध्यवसायोदृष्टमित्यर्थः।

प्रमाणस्य किं लक्षणम् एतद् इति- प्रतिविषयेषु श्रोत्रादीनां शब्दादिविषयेषु अध्यवसायो (बुद्धिव्यापारः) दृष्टं, प्रत्यक्षमित्यर्थः। त्रिविधमनुमानमाख्यातं- पूर्ववत्, शेषवत्, सामान्यतोदृष्टं चेति। पूर्ववद्, यथा- मेघोन्नत्या वृष्टिं साधयति पूर्वदृष्टत्वात्। शेषवत् यथा - समुद्रादेकं जलपलं, लवणमासाद्य शेषस्याप्यस्ति लवणभाव इति। सामान्यतो दृष्टम्- देशान्तराद्देशान्तरं प्राप्तं दृष्टम् गतिमच्चन्द्रतारकं चैत्रवत्, यथा चैत्रनामानं देशान्तराद्देशान्तरं प्राप्तमवलोक्य गतिमानयमिति तद्वच्चन्द्रतारकमिति, एतत् सामान्यतो दृष्टम्। किञ्च तल्लिङ्गलिङ्गिपूर्वकमिति, तदनुमानं लिङ्गपूर्वकं, यत्र लिङ्गेन लिङ्गी अनुमीयते। यथा- दण्डेन यतिः। लिङ्गिपूर्वकं च, यत्र लिङ्गिना लिङ्गमनुमीयते। कार्यदर्शनेन

कारणानुमानमिति यावत्, यथा नद्यां जलोपप्लवदर्शनेन पर्वतेषु वृष्टिपातस्य अनुमानम्। आप्तश्रुतिराप्तवचनं च । आप्ता आचार्या ब्रह्मादयः, श्रुतिर्वेदः, आप्ताश्च श्रुतिश्च आप्तश्रुतिः, तदुक्तम् आप्तवचनमिति। एवं त्रिविधं प्रमाणमुक्तम् ।

**सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।**

**तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥ ६ ॥**

सारांशः-

सामान्यतो दृष्टाद् अनुमानाद् अतीन्द्रियाणाम् इन्द्रियाण्यतीत्य वर्तमानानां सिद्धिः ।

तत्र केन प्रमाणेन किं साध्यम् इति- सामान्यतो दृष्टाद् अनुमानाद् अतीन्द्रियाणाम् इन्द्रियाण्यतीत्य वर्तमानानां सिद्धिः। प्रधानपुरुषावतीन्द्रियौ सामान्यतोदृष्टेनानुमानेन साध्येते,- यस्मान्महदादिलिङ्गं त्रिगुणं, यस्येदं त्रिगुणं कार्यं तत् प्रधानमिति, यतश्चाचेतनं चेतनमिवाभाति अतोऽन्योऽधिष्ठाता पुरुष इति। व्यक्तं प्रत्यक्षसाम्यम्, तस्मादपि चासिद्ध परोक्षम् आप्तागमात् सिद्धम्।

अत्र कश्चिदाह- प्रधानं पुरुषो वा नोपलभ्यते यच्चनोपलभ्यते लोके तन्नास्ति तस्मात् तावपि न स्तः, यथा द्वितीयं शिरस्तृतीयो बाहुरिति।

**अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्।**

**सौक्ष्म्याद् व्यवधानाभिभवात् समानाभिहाराच्च।।७।।**

सारांशः-

अत्र सतामप्यर्थानामष्टधोपलब्धिर्न भवति। तद् यथा इह सतामप्यर्थानामतिदूरात् अनुपलब्धिदृष्टा यथा- देशान्तरस्थानां चैत्रमैत्रविष्णुमित्राणाम्। सामीप्यात्- यथा चक्षुषोऽञ्जना-नुपलब्धिः। इन्द्रियाभिघाताद् यथा- बधिरान्धयो शब्दरूपा-नुपलब्धिः। मनोऽनवस्थानाद् यथा- व्यग्रचित्तः सम्यक्कथितमपि नावधारयति। सौक्ष्म्याद् यथा- धूमोष्मजलनीहारपरमाणवो गगनगता नोपलभ्यन्ते। व्यवधानाद् यथा कुड्येनापिहितं वस्तु नोपलभ्यते। अभिभवाद् यथा सूर्यतेजसाऽभिभूताः ग्रहनक्षत्र तारकादयः नोपलभ्यन्ते। समानाभिहाराद्यथा-मुद्गराशौ मुद्गः क्षिप्तः, कुवलयामलकमध्ये कुवलयामलके क्षिप्ते, कपोतमध्ये कपोतो नोपलभ्यते समानद्रव्यमध्याहृतत्वात् एवमष्टधा अनुपलब्धिः सतामर्थानामिह दृष्टा ।

समानद्रव्यमध्याहृतत्वात् एवमष्टधा अनुपलब्धिः सतामर्थानामिहदृष्टा

**सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः ।**
**महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च ॥ ८ ॥**

सारांशः-

एवं चास्ति किमभ्युपगम्यते प्रधानपुरुषयोरप्येतयो-र्वाऽनुपलब्धिः केन हेतुना, केन च उपलब्धिः। तदुच्यते-सौक्ष्म्यात् तदनुपलब्धिः, प्रधानस्येत्यर्थः, प्रधानं सौक्ष्म्यात् नोपलभ्यते यथाकाशे धूमोष्मजलनीहारपरमाणवः, सन्तोऽपि नोपलभ्यन्ते। कथं तर्हि तदुपलब्धिः? कार्यतस्तदुपलब्धिः। कार्यं दृष्ट्वा कारणमनुमीयते। अस्ति प्रधानं कारणं यस्येदं कार्यम्, बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि

सौक्ष्म्यात् तदनुपलब्धिः , प्रधानस्येत्यर्थः

पञ्चमहाभूतान्येव तत्कार्यम्। तच्च कार्यं प्रकृतिविरूपम् - प्रकृतिः प्रधानं तस्य विरूपं प्रकृतेरसदृशम्, सरूपं च समानरूपं च, यथा लोकेऽपि पितुस्तुल्य इव पुत्रो भवत्यतुल्यश्च। येन हेतुना तुल्यमतुल्यं तदुपरिष्टाद्वक्ष्यामः।

## Summarised Overview

दृष्टं तथा पञ्च बुद्धीन्द्रियाणि, पञ्चतन्मात्राणि इति। प्रत्यक्षानुमानाग्राह्यं अपि आप्तवचनात् गृह्यते। एतेषु प्रमाणेषु सर्वप्रमाणानि सिद्धानि भवन्ति। प्रमेयसिद्धिः प्रमाणाद्धि। प्रमेयं प्रधानं बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि पुरुष इति, एतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञा इत्युच्यन्ते, तत्र किंचित् प्रत्यक्षेण साध्यं किंचिदनुमानेन किंचिदागमेनेति त्रिविधं प्रमाणमुक्तम्। तल्लिङ्गलिङ्गिपूर्वकमिति, तदनुमानं लिङ्गपूर्वकं, यत्र लिङ्गेन लिङ्गी अनुमीयते। आप्तश्रुतिराप्तवचनं च । आप्ता आचार्या ब्रह्मादयः, श्रुतिर्वेदः,तदुक्तमाप्तवचनमिति। एवं त्रिविधं प्रमाणमुक्तम्। प्रधानपुरुषावतीन्द्रियौ सामान्यतो दृष्टेनानुमानेन साध्येते, यस्मान्महदादिलिङ्गं त्रिगुणं, यस्येदं त्रिगुणं कार्ये तत् प्रधानमिति, यतश्चाचेतनं चेतनमिवाभाति अतोऽन्योधिष्ठाता पुरुष इति।पदार्थानां अनुपलब्धेः कारणानि अतिदूरात् अतिसामीप्यात्, इन्द्रियपातात्, मनोनवस्थानात् ।प्रधानस्य सौक्ष्म्यात् अनुपलब्धिः। यधा आकाशे धूमोष्मजलनीहारपरिमाणवः। कार्यतः तदुपलब्धिः। कार्यं दृष्ट्वा कारणमनुमीयते।

## Assignments

1. सांख्यमते प्रमाणानि कानि? विशदयत।
2. सांख्यमते प्रकृतिं प्रतिपादयत ।

## Suggested Readings

1. SamkhykarikawithgoudapadacommentaryPt.Dhundhirajsastri,Chowkhamba Sanskrit Series Office, Varanasi. Series Office, Varanasi.
2. Samkhyakarika of Isvarakrishna with the commentary of Gaudapada , Dr. T.G.Manikar , Oriental Book Agency Poona
3. Samkhyakarika with Samkhya TattvaKaumudi 1917.

## References

1. The Samkhykarika of Mahamuni Sri lwarakrishna, with the commentary sarabodhini of Pandit Sivanarayanasastri with Sankhyatattvakaumudi of Vachaspati misra.
2. SamkhykarikaIswarakrishnaPoshtacharya
3. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4

Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# सांख्यमते तत्त्वनिरूपणम्
# (9-38 कारिकाः)

# BLOCK- 02

SGOU

UNIT 1

# प्रकृतितत्त्वस्य निरूपणम्

## Learning Outcomes

- भारतीय दर्शनपद्धतेः सामान्यावगमनं लभते।
- सांख्यमतस्य तत्त्वनिरूपणंजानाति।
- सांख्ययोगयोः विशेषांशानाम् अवगमनं लभते ।
- सांख्यप्रक्रिययाः सांख्यसिद्धान्तस्य च अवगमनं लभते ।
- सांख्यमतस्य सत्कार्यवादः ग्राह्यते।

## Background

दर्शनेषु अतिप्राचीनं दर्शनमस्ति सांख्यम्। संख्यायन्ते गण्यन्ते तत्त्वानि येन तत् सांख्यम्। महामुनिना ईश्वरकृष्णेन विरचिता भवति सांख्यकारिका । पञ्चविंशतितत्वानां विचार एव सांख्यम्, तमधिकृत्य कृतो ग्रन्थः सांख्यकारिका। दर्शनेऽस्मिन् सृष्ट्याद्याकाररूपेण द्वे तत्त्वे परिकल्प्यते- पुरुषः प्रकृतिः च। पुरुषः निर्विकारः सचेतनः किन्तु भेदाः अनेके। प्रकृतिः जडीभूता एकाच विद्यते। जगतः उत्पत्तिः अनयोः संयोगादेव भवति। उत्पत्तिक्रियया तेषां आविर्भावः एवं सञ्जायते। सांख्यदर्शनस्य सिद्धान्तः सत्कार्यरूपेण प्रसिद्धिमवाप्नोत्। सत्त्वादिगुणानां महदादिकारणानां प्रकृतिपुरुषयोश्च वर्णानम् अत्र क्रियते। साख्यमतानुसारं कैवल्यप्राप्तिः कथं इति विशदयति।

## Keywords

असदकरणात्, सत्कार्यम्, सर्वसम्भवाभावात्, उपादानग्रहणात्, शक्तस्य शक्यकरणात्, कारणभावात्, प्रधानं, व्यक्तम्, अव्यक्तम्, सत्त्वं लघु,कारणगुणात्मकत्वात्।

## Discussion

यदिदं महदादिकार्यं तत् किं प्रधाने सदुताहोस्विदत्वात् आचार्यविप्रतिपत्तेरयं संशयः। यतोऽत्र सांख्यदर्शने सत्कार्यं, बौद्धादीनामसत्कार्यं, यदि सदसदभक्त्यासत्सन्न भवतीति विप्रतिषेधः ।

सत्कार्यवादः-

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥ ९ ॥**

सारांशः-

सत्कार्यवाद-समर्थनम्

असदकरणात्- न सद् असत् असतो अकारणं तस्मात्सत्कार्यम्, इह लोकेऽसत्कारणं नास्ति, यथा सिकताभ्यस्तैलोत्पत्तिः, तस्मात् सतः करणावस्ति प्रागुत्पत्तेः प्रधाने व्यक्तम्, अतः सत्कार्यम्। उपादानग्रहणात्- उपादानं कारणं तस्य ग्रहणात्, इह लोके यो येनार्थी स तदुपादानग्रहणं करोति दध्यर्थी क्षीरस्य न तु जलस्य तस्मात् सत्कार्यम्। इतश्च सर्वसम्भवाभावात्, सर्वस्य सर्वत्र सम्भवो नास्ति, यथा सुवर्णस्य रजतादौ तृणपांशुसिकतासु। तस्मात्

सर्वसम्भवाभावात् सत् कार्यम्। इतश्च शक्तस्य शक्यकरणात् इह कुलालः शक्तो मृद्दण्डचक्रचीवररज्जुनीरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डादुत्पादयति, तस्मात् सत्कार्यम्। कारणभावाच्च सत्कार्यम्- कारणं यल्लक्षणं तल्लक्षणमेव कार्यमपि, यथा यवेभ्यो यवाः, व्रीहिभ्यो व्रीहयः स्यात्। एवं पञ्चभिर्हेतुभिः प्रधाने महदादिलिङ्गमस्ति, तस्मात् असतः उत्पत्तिर्नास्ति इति ।

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।**

**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥**

**सारांशः-**

प्रकृतिविरूपं सरूपं च यदुक्तं तत् कथमिति उच्यते- व्यक्तं महदादिकार्यम्।

हेतुरस्यास्ति हेतुमत्, उपादानं, हेतुः कारणं निमित्तमितिपर्यायाः, व्यक्तस्य प्रधानं हेतुरस्ति, अतो हेतुमत्। व्यक्तं भूतपर्यन्तम्, हेतुमद्बुद्धितत्त्वं प्रधानेन हेतुमानहङ्कारो बुद्ध्या, पञ्चतन्मात्राणि एकादशेन्द्रियाणि हेतुमन्त्यहङ्कारेण, आकाशं शब्दतन्मात्रेण हेतुमत्, वायुःस्पर्शतन्मात्रेण हेतुमान्, तेजोरूपतन्मात्रेण हेतुमद्, आपो रसतन्मात्रेण हेतुमत्यः, पृथिवी गन्धतन्मात्रेण हेतुमती एवं भूतपर्यन्तं व्यक्तं हेतुमत्। किञ्चान्यत् अनित्यं, यस्मादन्यस्मादुत्पद्यते यथा मृत्पिण्डादुत्पद्यते घटः स च अनित्यः। यथा प्रधानपुरुषौ सर्वगतौ नैवं व्यक्तम्। किञ्चान्यत्

परतन्त्रं परायत्तं व्याख्यातं व्यक्तम्।

सक्रियं, संसारकाले संसरति- त्रयोदशविधेन करणेन सयुक्तं सूक्ष्मशरीरमाश्रित्य संसरति, तस्मात् सक्रियम्। अनेकं, बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि चेति। किञ्चान्यत् आश्रितम्, स्वकारणमाश्रयते, प्रधानाश्रिता बुद्धिः, बुद्धिमाश्रितोऽहङ्कारः अहङ्काराश्रितानि एकादशेन्द्रियाणि पञ्चतन्मात्राणि, पञ्चतन्मात्राश्रितानि पञ्चमहाभूतानीति। किञ्च लिङ्गं लययुक्तं, लयकाले पञ्चमहाभूतानि तन्मात्रेषु लीयन्ते तान्येकादशेन्द्रियैः सहाहङ्कारे स च बुद्धौ सा प्रधाने लयं यातीति। तथा सावयवम्, अवयवाः शब्दस्पर्शरसरूपगन्धाः। किञ्च परतन्त्रं, नात्मनः प्रभवति यथा प्रधानतन्त्रो बुद्धितन्त्रोऽहङ्कारः अहङ्कारतन्त्राणि तन्मात्राणीन्द्रियाणि न तन्मात्रतन्त्राणि पञ्च महाभूतानि च। एवं परतन्त्रं परायत्तं व्याख्यातं व्यक्तम् ।

अथोऽव्यक्तं व्याख्यास्यामः- विपरीतमव्यक्तम्। एतैरेव गुणैर्यथोक्तैर्विपरीतमव्यक्तम्, हेतुमद् व्यक्तमुक्तम्, न हि प्रधानाद् वरं किञ्चिदस्ति इह प्रधानस्यानुत्पत्तिः, तस्माद् हेतुमदव्यक्तम्। तथाऽनित्यं च व्यक्तं नित्यमव्यक्तम् अनुत्पाद्यत्वात् न हि भूतानीव कुतश्चिदुत्पद्यत इत्यव्यक्तं, प्रधानम्। किञ्चाव्यापि व्यक्तं,व्यापि प्रधानं सर्वगतत्वात्। सक्रियं व्यक्तमक्रियमव्यक्तं सर्वगतत्वादेव तथाऽनेकं व्यक्तमनेकं प्रधानं

स्वतन्त्रं अव्यक्तं प्रभवत्यात्मनः।

कारणत्वात्, त्रयाणां लोकानां प्रधानमेकं कारणं तस्मादेकं प्रधानम्। तथाश्रितं व्यक्तमनाश्रितमव्यक्तमकार्यत्वात्, न हि प्रधानात्किञ्चिदस्ति परं यस्य प्रधानं कार्यं स्यात्। तथा व्यक्तं लिङ्गम्, अलिङ्गमव्यक्तं नित्यत्वात्, महदादिलिङ्गं प्रलयकाले परस्परं प्रलीयते नैवं प्रधानं, तस्मादलिङ्गं प्रधानम्। तथा सावयवं व्यक्तं, निरवयवमव्यक्तं, न हि शब्दस्पर्शरस रूपगन्धाः प्रधाने सन्ति। तथा परतन्त्रं व्यक्तं, स्वतन्त्रमव्यक्तं प्रभवत्यात्मनः।

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्।।११।।**

सारांशः –

त्रिगुणं, अविवेकि, विषयः, सामान्यं, अचेतनं, प्रसवधर्मि च व्यक्तं भवति।

एवं व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं, साधर्म्यमुच्यते। त्रिगुणं व्यक्तं, सत्वरजस्तमांसि त्रयोगुणा यस्येति। अविवेकि व्यक्तं न विवेकोऽस्यास्तिति, इदं व्यक्तमिमे गुणा इति न विवेकं कर्तुं याति अयं गौरयमश्व इति यथा ये गुणाः तदव्यक्तं यद् व्यक्तं ते च गुणा इति। तथा विषयो व्यक्तं, भोग्यमित्यर्थः,सर्वपुरुषाणां विषयभूतत्वात्। सामान्यं व्यक्तं, मूल्यदासीवत् सर्वसाधारण-त्वात्। अचेतनं व्यक्तं, सुखदुःखमोहान् न चेतयतीत्यर्थः। तथा प्रसवधर्मि व्यक्तं, तद् यथा- बुद्धेरहङ्कारः प्रसूयते तस्मात्

पञ्चतन्मात्राणि एकादशेन्द्रियाणि च प्रसूयन्ते तन्मात्रेभ्यः पञ्चमहाभूतानि। एवमेते व्यक्तधर्माः प्रसवधर्मान्ता उक्तः। एवमेभिरव्यक्तं सरूपं, यथा व्यक्तं तथा प्रधानमिति। तत्र त्रिगुणं व्यक्तमव्यक्तमपि त्रिगुणं यस्य तन्महदादिकार्यं त्रिगुणम्, इह यदात्मकं कारणं तदात्मकं कार्यमिति, यथा कृष्णतन्तुकृतः कृष्ण एव पटो भवति। तथा विवेकि व्यक्तं, प्रधानमपि गुणैर्न भिद्यते अन्ये गुणाः अन्यत् प्रधानमेवं विवेक्तुं न यांति तदविवेकि प्रधानम्। तथा विषयो व्यक्तं प्रधानमपि सर्वपुरुषविषयभूतत्वात् विषय इति। तथा सामान्यं व्यक्तं प्रधानमपि, सर्वसाधारणत्वात् । तथाऽचेतनं व्यक्तं प्रधानमपि सुखदुःखमोहान् न चेतयतीति, कथम्? अनुमीयते- इह ह्यचेतनान्मृत्पिण्डादचेतनो घट उत्पद्यते। तथा प्रसवधर्मि व्यक्तं प्रधानमपि प्रसवधर्मि, यतः प्रधानात् बुद्धिरुत्पद्यते। एवं प्रधानमपि व्याख्यातम्।

इदानीं तद्विपरीतस्तथा च पुमानित्येतद् व्याख्यायते। तद्विपरीतः ताभ्यां व्यक्ताव्यक्ताभ्यां विपरीतः पुमान्। तद् यथा- त्रिगुणं व्यक्ताव्यक्तञ्च, अगुणः पुरुषः। अविवेकि व्यक्ताव्यक्तं च विवेकि पुरुषः। तथा विषयो व्यक्ताव्यक्तं च,अविषयः पुरुषः। तथा सामान्यं व्यक्तमव्यक्तं च, असामान्यः पुरुषः। अचेतनं व्यक्ताव्यक्तं च चेतनः पुरुषः, सुखदुःखमोहांश्चेतयति सञ्जानीते

तस्माच्चेतनः पुरुषः इति। प्रसवधर्मि व्यक्तं प्रधानं च, अप्रसवधर्मी पुरुषः,न हि किंचित् पुरुषात् प्रसूयते। तस्मादुक्तं तद्विपरीतः पुमानिति । तत् पूर्वस्यामार्यायां प्रधानमहेतुमत् यथा व्याख्यातं तथा च पुमान्, तद् यथा हेतुमदनित्यमित्यादि व्यक्तं,तद्विपरीतमव्यक्तं, तत्र हेतुमत् व्यक्तम् अहेतुमद्प्रधानं तथा च पूमानहेतुमान् अनुत्पाद्यत्वात् । अनित्यं व्यक्तं नित्यं प्रधानं , तथा च नित्यः पुमान्। अव्यापि व्यक्तं व्यापि प्रधानम्, तथा च व्यापि पुमान्,सर्वगतत्वात्। सक्रियं व्यक्तमक्रियं प्रधानम्,तथा च पुमानक्रियः, सर्वगतत्वादेव। अनेकं व्यक्तमेकं अव्यक्तं,तथा च पूमानप्येकः। आश्रितं व्यक्तमनाश्रितमव्यक्तं, तथा च पुमानाश्रितः। लिङ्गं व्यक्तमलिङ्गं प्रधानं तथा च पूमानप्यलिङ्गः इति। सावयवं व्यक्तं निरवयवव्यक्तं तथा च पुमान् निरवयवः, न हि पुरुषे शब्दादयोऽवयवाः सन्ति । किंच परतन्त्रं व्यक्तं,स्वतन्त्रमव्यक्तं,तथा च पुमानपि स्वतन्त्रः,आत्मनः प्रभवतीत्यर्थः।

व्यक्ताव्यक्तयोर्साधर्म्यं वैधर्म्यं च उच्यते।

**प्रीत्यप्रीतिर्विषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ।।१२।।**

सारांशः –

यत्र यदुक्तं 'त्रिगुणमिति व्यक्तमव्यक्तं च' तत् के ते गुणा इति तत्स्वरूपप्रतिपादनायेदमाह - प्रीत्यात्मका अप्रीत्यात्मका

प्रीत्यात्मका अप्रीत्यात्मका विषादात्मकाश्च इतिसत्त्वरजस्तमांसि इत्यर्थः।

विषादात्मकाश्च इति, गुणाः सत्त्वरजस्तमांसीत्यर्थः। तत्र प्रीत्यात्मकं सत्त्वं, प्रीतिः सुखं तदात्मकमिति। अप्रीत्यात्मकं रजः, अप्रीतिर्दुःखम्। विषादात्मकं तमः, विषादो मोहः। तथा प्रकाशप्रवृत्तिनियमार्थाः। अर्थशब्दः सामर्थ्यवाची, प्रकाशार्थं सत्त्वं, प्रकाशसमर्थमित्यर्थः। प्रवृत्त्यर्थं रजः, प्रवृत्तिसमर्थं इत्यर्थः। नियमार्थं तमः स्थितौ समर्थमित्यर्थः। प्रकाश क्रियास्थितिशीला गुणा इति। अन्योन्याभिभवाः अन्योन्याश्रयाः अन्योन्यजननाः अन्योऽन्यामिथुनाः अन्योन्यवृत्तयश्च ते तथोक्ताः। अन्योऽन्याभिभवा इति अन्योऽन्यं परस्परम् अभिभवन्तीति, प्रीत्यप्रीत्यादिभिर्धर्मैराविर्भवन्ति, यथा यदा सत्त्वमुत्कटं भवति तदा रजस्तमसी अभिभूय स्वगुणेन प्रीतिप्रकाशात्मकेनावतिष्ठते यदा रजस्तदा सत्त्वतमसी अप्रीतिप्रवृत्त्यात्मना धर्मेण, यदा तमस्तदा सत्त्वरजसी विषादस्थित्यात्मकेन इति। तथाऽन्योन्याश्रयाश्च द्व्यणुकवद् गुणाः। अन्योन्यजननाः- यथा मृत्पिण्डो घटं जनयति। तथाऽयोन्यमिथुनाश्च यथा स्त्रीपुंसौ अन्योन्यमिथुनाः तथा गुणाः ।

**सत्त्वं लघु प्रकाशकमिष्टमुष्टम्भकं चलञ्च रजः ।**
**गुरु वरणक्रमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥१३॥**

सारांशः-

यदा सत्त्वमुत्कटं भवति तदा लघून्यङ्गानि प्रकाशकानि भवन्ति। इन्द्रियाणि प्रसन्नतां प्राप्नुवन्ति। उपष्टम्भकं चलं च रजः। रजः उद्योतकं भवति । तथा रजश्च चलं दृष्टम्। रजोवृत्ति चलचितो भवति । गुरु वरणकमेव यदा तमः उत्कटं भवति तदा गुरूण्यङ्गानि आवृतेन्द्रियाणि भवन्ति। 'यदि गुणाः परस्परं विरुद्धाः स्वमते नैव कमर्थं निष्पादयन्ति तर्हि कथं प्रदीपवच्चार्थतो वृत्तिः जायते।

यदा सत्त्वमुत्कटं भवति तदा लघून्यङ्गानि प्रकाशकानि भवन्ति।

सत्त्वगुणः लघु तथा प्रकाशः च। सत्वगुणतः कार्योत्पत्तिः। रजोगुणः उपष्टम्भकः अथवा प्रवर्त्तकः चलनयुक्तः सक्रियश्च। तमोगुणः भारतयुक्तः प्रतिबन्धकः। यद्यपि ते परस्परं विरुद्धाः तथापि परस्परं मिलित्वा एककार्थं साधयन्ति। यथा तैलः वर्तिः च विरूद्धौ सत्यपि परस्परं मिलित्वा प्रतीपवत् अन्धकारनाशौ इव वर्तेते। तद्वत् ते विरुद्धाः गुणाः मिलित्वा भोगापवर्ग पुरुषार्थाय प्रवर्त्तन्ते।

**अविवेक्यादिः सिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात्।**

**कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ।।१४।।**

सारांशः-

योऽयम् अविवेक्यादिर्गुणैः सः त्रैगुण्यात्। महदादौ व्यक्तेनायं सिद्ध्यति। अत्रोच्यते तद्विपर्ययाभावात्। यत्र कर्तास्ति तस्य परिमाणं दृष्टं यथा कुलालः परिमितेः मृत्पिण्डैः परिमितानेव घटान् करोति। एवं महदपि महदादिलिङ्गं परिमितं भेदतः। प्रधानकार्यमेका बुद्धिरेकोऽहङ्कारः पञ्च

प्रधानकार्यमेका बुद्धिरेकोऽह ङ्कारः पञ्च तन्मात्राणि एकादशे- न्द्रियाणि पञ्चमहाभूतान्येवं भेदानां परिणामादस्ति प्रधानं कारणं यद् व्यक्तं परिमितमुत्पादयति।

तन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतान्येवं भेदानां परिणामादस्ति प्रधानं कारणं यद् व्यक्तं परिमितमुत्पादयति। यदि प्रधानं न स्यात्, तदा निष्पत्तिपरिणाममिदं व्यक्तमपि न स्यात् । परिणामाच्च भेदानामस्ति प्रधानं यस्माद् व्यक्तमुत्पन्नम्।

**भेदानां परिणामात्समन्वयाच्छक्तितः प्रवृत्तेश्च।**

**कारणकार्यविभागादविभागाद् वैश्वरूपस्य।।१५।**

सारांशः-

समन्वयात् इह लोके प्रसिद्धिर्दृष्टा । यथा व्रतधारिणं वटुं दृष्ट्वा समन्वयति-न्यूनमस्य पितरौ ब्राह्मणाविति। एवमिदं त्रिगुणं महदादिलिङ्गं दृष्ट्वा साधयामः अस्य कारणं भविष्यतीति, अतः समन्ययादस्ति प्रधानम्। तथा शक्तिः प्रवृत्तेश्च- इह यो यस्मिन् शक्तः सः तस्मिन्नेवार्थे प्रवर्तते। यथाकुलालो घटस्य कारणे समर्थो घटमेव करोति, न पटं रथं वा। तथा अस्ति प्रधानं कारणम्। कुतः? कारणकार्यविभागात्। करोतीति कारणम्। क्रियते इति कार्यम्। इतश्च अविभागात् विश्वरूपस्य भावः वैश्वरूपम्। तस्याविभागात् अस्ति प्रधानम्। यस्मात् त्रैलोक्यस्य पञ्चानां पृथिव्यादीनां महाभूतानां परस्परं विभागो नास्ति। महाभूतेष्वन्तर्भूताः त्रयो लोकाः इति। पृथिव्यप्तेजोवायुराकाशमिति एतानि पञ्चभूतानि प्रलयकाले सृष्चटक्रमेणैवाविभागं यान्ति। तस्मादविभागात् क्षीरदधिवत् व्यक्ताव्यक्तयोरस्त्यव्यक्तं कारणम्। यथा तत्रैव तन्तवः पटस्य । अन्ये तन्तवोऽन्यः पटः न। कुतः ? तद्विपर्ययाभावात्। एवं व्यक्ताव्यक्तम्। दूरं प्रधानमासन्नं व्यक्तं, यो व्यक्तं पश्यति सः

कारणकार्यविभागात् प्रधानं कारणम् अस्ति।

प्रधानमपि पश्यति, तद्विपर्ययाभावात्। इतश्चाव्यक्तं सिद्धं कारणगुणात्मकत्वात् कार्यस्य। लोके यदात्मकं कारणं तदात्मकं कार्यमपि। यथा कृष्णेभ्यः तन्तुभ्यः कृष्णो पटोभवति। एवं महदादिलिङ्गमविवेकि विषयः सामान्यमचेतनं प्रसनधर्मि यदात्मकमव्यक्तमपि सिद्धम्।

**कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदायाच्च।**

**परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ।।१६**

सारांशः-

सत्वगुणरजसां साम्यावस्था प्रकृतिः। प्रधानमपि सत्वगुणरजसां साम्यावस्था एव । यथा समुदायात् यथा गङ्गस्रोतांसि त्रीणि, रुद्रमूर्धनि पतितानि एकं स्रतो जनयन्ति। एवमव्यक्तं गुणसमुदायात् महदादि जनयतीति त्रिगुणतः समुदायात् च व्यक्तं जगत्प्रवर्तते । यस्मादेकस्मात् प्रधानात् व्यक्तः तस्मादेकरूपेण प्रवर्तितव्यम् इति न दोषः। परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् । एकस्मात् प्रधानात् त्रयो लोकाः समुत्पन्नः तुल्यभावः न भवन्ति । देवाः सुखेन युक्ताः मनुष्याः दुःखेन, तिर्यञ्चो मोहेन एकस्मात् प्रधानात् प्रवृत्तं व्यक्तं प्रतिप्रतिगुणाश्रयविशेषात्। परिणामतः सलिलवद्भवति।

सत्वगुणरजसां साम्यावस्था प्रकृतिः। प्रधानमपि सत्वगुणरजसां साम्यावस्था एव ।

## Summarised Overview

कारणभावाच्च सत्कार्यम्- कारणं यल्लक्षणं तल्लक्षणमेव कार्यमपि, यथा यवेभ्यो यवाः, व्रीहिभ्यो व्रीहयः, यदा स्यात्। उपादानं हेतुः कारणं निमित्तमितिपर्यायाः, व्यक्तस्य प्रधानं हेतुरस्ति। परतन्त्रं, नात्मनः प्रभवति यथा प्रधानतन्त्रो बुद्धितन्त्रोऽहङ्कारः अहङ्कारतन्त्राणि तन्मात्राणीन्द्रियाणि न तन्मात्रतन्त्राणि पञ्च महाभूतानि च। एवं परतन्त्रं परायत्तं व्याख्यातं व्यक्तम् । विपरीतमव्यक्तम्। तथा विषयो व्यक्ताव्यक्तं च,अविषयः पुरुषः। अचेतनं व्यक्ताव्यक्तं च चेतनः पुरुषः, सुखदुःखमोहांश्चेतयति सञ्जानीते तस्माच्चेतनः पुरुषः इति। प्रसवधर्मि व्यक्तं प्रधानं च, अप्रसवधर्मी पुरुषः,न हि किंचित् पुरुषात् प्रसूयते। प्रीत्यात्मका अप्रीत्यात्मका विषादात्मकाश्च इति, गुणाः सत्त्वरजस्तमांसि इत्यर्थः। सत्वं लघुप्रकाशकम्। रजोगुणः प्रवर्तकः चलनयुक्तः सत्क्रियश्च। तमोगुणः भारतयुक्तः प्रतिबन्धकः। अविवेक्यादि गुणः त्रैगुण्यात्। दूरं प्रधानमासन्नं व्यक्तम्। महदादिलिङ्गमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि अव्यक्तम्। भेदानां परिणामाद् प्रधानं कारणमस्ति। क्षीरदधिवत् व्यक्ताव्तक्तयोः अव्यक्तं कारणम्। अव्यक्तं गुणसमुदायगत् महदादि जनयति।

## Assignments

1. सत्कार्यवादं विशदयत।
2. प्रकृतिविरूपं सरूपं च उच्यते कथम्? विशदयत।
3. व्यक्तमव्यक्तम् व्याख्यात।
4. व्यक्ताव्यक्तयोर्वैधर्म्यं साधर्म्यं च निरूपयत।
5. साख्यकारिकायां प्रकृतितत्वं निरूपयत।
6. कार्यकारणविभागात् प्रधानं कारणम् अस्ति। कुतः?

## Suggested Readings


1. SamkhykarikawithgoudapadacommentaryPt.Dhundhirajsastri,Chowkhamba Sanskrit Series Office, Varanasi. Series Office, Varanasi.
2. Samkhyakarika of Isvarakrishna with the commentary of Gaudapada , Dr. T.G.Manikar , Oriental Book Agency Poona
3. Samkhyakarika with Samkhya TattvaKaumudi 1917


## References


1. The Samkhykarika of Mahamuni Sri lwarakrishna, with the commentary sarabodhini of Pandit Sivanarayanasastri with Sankhyatattvakaumudi of Vachaspati misra.
2. Samkhykarika Iswarakrishna Poshtacharya
3. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4


Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# पुरुषतत्त्वस्य निरूपणम्

## Learning Outcomes

1. भारतीयदर्शनपद्धतेः सामान्यावगमनम्।
2. सांख्यकारिकायाः सांख्यसिद्धान्तस्य च अवगमनम्।
3. सांख्यमते प्रमाणज्ञानावगमनम्।
4. पुरुषतत्त्वमवगच्छति।

## Background

भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते। यदेव किञ्चित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शनजगति रत्नवद् बहुमूल्यानि आकल्यन्ते। भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अत एव अनेके दर्शनकाराः समाजसुधाकररूपेण प्रथिताः सन्ति एकके विशदयन्ति। तदत्र पश्यामः।

## Keywords

सङ्घातपरार्थत्वात्, अचेतनं, पुरुषार्थं, कैवल्यार्थं, त्रिगुणात्, त्रैगुण्यविपर्ययात्,विपर्यासात्, पङ्ग्वन्धवत्, तत्कृतः सर्गः।

## Discussion

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।।17।।

सारांशः –

सङ्घातपरार्थत्वात्त्रिगुणादिविपर्ययात्पुरुषास्तित्व प्रतिपादनम्

एवमार्याद्वयेन प्रधानस्यास्तित्वमवगम्यते, इतः च उत्तरं पुरुषास्तित्वप्रतिपादनार्थमाह। यदुक्तं 'व्यक्ताव्यक्तज्ञविज्ञानात् मोक्षः' प्राप्यत इति, तत्र व्यक्तादनन्तरमव्यक्तं पञ्चभिः कारणैः अधिगतम्। व्यक्तवत्, पुरुषोऽपि सूक्ष्मस्तस्याधुनाऽनुमितास्तित्वं प्रतिक्रियते अस्ति पुरुषः, कस्मात्? सङ्घातपरार्थत्वात्- योऽयं महदादिसङ्घातः स पुरुषार्थं इत्यनुमीयते, अचेतनत्वात् पर्यङ्कवत्। इदं शरीरं पञ्चानां महाभूतानां सङ्घातो वर्तते, अस्ति पुरुषो यस्येदं भोग्यं शरीरं भोग्यमहदादि सङ्घातरूपं समुत्पन्नमिति। त्रिगुणादिविपर्ययात्- यदुक्तं पूर्वस्यामार्यायां "त्रिगुणमविवेकि विषय" इत्याभाति, तस्माद्विपर्ययात्, येनोक्तं तद्विपरीतस्तथा च पुमान्। अधिष्ठानात्, य़थेह लङ्घनप्लवन-धावनसमर्थैरश्वैर्युक्तो रथः सारथिनाऽधिष्ठितः प्रवर्तते तथात्माऽधिष्ठानाच्छरीरमिति। षष्टितन्त्रे पुरुषाधिष्ठितं प्रधानं प्रवर्तते। अतः अस्ति आत्माभोक्तृत्वात्- य़था मधुराम्ललवणकटुतिक्तकषायः षड् रसोपबृंहितस्य संयुक्तस्य

अन्नस्य साध्यते ,एवं  महदादिलिङ्गस्य भोक्तृत्वाभावादस्ति स आत्मा यस्येदं भोग्ये शरीरमिति।

कैवल्यार्थं प्रवृत्तेश्च- यतः सर्वो विद्वानविद्वांश्च संसारसन्तानक्षयमिच्छति। एवमेभिर्हेतुभिरस्त्यात्मा शरीराद् व्यतिरिक्तः।

**जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृतेश्च ।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ।। १८ ॥**

सारांशः –

जन्ममरणकारणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धम् ।

'अथ स किम् एकः सर्वशरीरेऽधिष्ठाता मणिरसनात्मकसूत्रवत् आहोस्विद् बहव आत्मानः प्रतिशरीरमधिष्ठातार' इत्यत्रोच्यते- जन्ममरणकरणानि तेषां प्रतिनियमात्, प्रत्येकनियमादित्यर्थः। यद्येक एव आत्मा स्यात् तत् एकस्य जन्मनि सर्व एव जायेरन्, एकस्य मरणे सर्वेऽपि म्रियेरन्, एकस्य करणवैकल्ये सर्वेऽपि बधिरान्धमूकाः स्युः, न चैवं भवति, तस्माज्जन्ममरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धम्।

त्रैगुण्यविपर्ययाच्चैव त्रिगुणभावविपर्ययाच्च पुरुषबहुत्वं सिद्धम्।

इतश्च अयुगपत्प्रवृत्तेश्च युगपदेककालं न युगपदयुगपत् प्रवर्तनं, एके धर्मे प्रवृत्ता अन्येऽधर्मे वैराग्येऽन्ये ज्ञानेऽन्ये प्रवृत्ताः, तस्मादयुगपत्प्रवृतेश्च बहव इति सिद्धम्। किञ्चान्यत् त्रैगुण्यविपर्ययाच्चैव त्रिगुणभावविपर्ययाच्च पुरुषबहुत्वं सिद्धम्। यथा सामान्ये जन्मनि एकः सात्त्विकः सुखो, अन्यो राजसो

दुःखो, अन्यस्तामसो मोहवान्। एवं त्रैगुण्यविविपर्ययाद्बहुत्वं सिद्धिमिति।

**तस्माच्चविपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य ।**

**कैवल्यं माध्यस्थ्यं द्रष्टत्वमकर्तृभावश्च ॥ १९ ॥**

सारांशः –

तस्माच्च विपर्यासात्, साक्षित्वं, कैवल्यं, माध्यस्थ्यं, द्रष्टत्वं कर्तृभावः एवं पुरुषास्तित्वं सिद्धम् ।

अकर्ता पुरुष इत्येतदुच्यते - तस्माच्च विपर्यासात्, तस्माच्च यथोक्तत्रैगुण्यविपर्यासाद्विपर्ययात्-निर्गुणः पुरुषो विवेकी भोक्तेत्यादिगुणानां पुरुषस्य यो विपर्यास उक्तस्तस्मात्, सत्त्वरजस्तमः कर्तृभूतेषु साक्षित्त्वं सिद्धं पुरुषस्येति योऽयमधिकृतो बहुत्वं प्रति गुणा एव कर्तारः प्रवर्तन्ते, साक्षी न प्रवर्तते नापि निवर्तत एव। किञ्चान्यत् कैवल्यं केवलभावः, कैवल्यमन्यत्त्वमित्यर्थः, त्रिगुणेभ्यः केवलोऽन्यः। माध्यस्थ्यं मध्यस्थभावः, परिव्राजकवत् मध्यस्थः पुरुषः। तस्मात् द्रष्टत्वमकर्तृभावश्च, यस्मान्मध्यस्थतस्माद्द्रष्टा तस्मादकर्ता पुरुषस्तेषां कर्मणामिति सत्त्वरजस्तमांसि त्रयो गुणाः कर्मकर्तृभावेन प्रवर्तन्ते न पुरुषः, एवं पुरुषस्यास्तित्वं च सिद्धम्।

**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।**

**गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ २० ॥**

सारांशः –

'यस्मादकर्ता पुरुषस्तत्कथमध्यवसाय करोति धर्म करिष्याम्यधर्म न करिष्यामीत्यतः कर्ता भवति, न च कर्ता पुरुष एवमुभयथा दोषः स्यादिति'। अतः उच्यते-इह पुरुषश्चेतनावान् तेन चेतनावभाससंयुक्तं महदादिलिङ्ग चेतनावदिव भवति, यथा लोके घटः शीतसंयुक्तः शीतः उष्णसंयुक्तः उष्णः। एवं महदादि लिङ्गं तस्य संयोगात् पुरुषसंयोगाच्चेतनावदिव भवति, तस्माद् गुणा अध्यवसाय कुर्वन्ति न पुरुषः। यद्यपि लोके पुरुषः कर्ता, गन्तेत्यादि प्रयुज्यते तथाप्यकर्ता पुरुषः। कथम्? गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः। गुणानां कतृत्वे सति उदासीनोऽपि पुरुषः कर्तेव भवति न कर्ता। अत्र दृष्टान्तो भवति यथाऽचौरश्चौरौ सह गृहीतश्चौर इत्यवगम्यते। एवं त्रयो गुणाः कर्तारः तैः संयुक्तः पुरुषोऽकर्ताऽपि कर्ता भवति कर्तृसंयोगात्। एवं व्यक्ताव्यक्त ज्ञानां विभागो व्याख्यातः यद्विभागान्मोक्षप्राप्तिरिति ॥२०॥

महदादि लिङ्गंतस्य संयोगात् पुरुष-संयोगाच्चेतनावदिव भवति।

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।**

**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥२१॥**

सारांशः –

'अर्थतयोः प्रधानपुरुषयोः किं हेतुः सङ्घातः' उच्यते- पुरुषस्य प्रधानेन संयोगो दर्शनार्थं - प्रकृतिमहदादिकार्यं भूतपर्यन्तं पुरुषः पश्यति एतदर्थम्। प्रधानस्यापि पुरुषेण

संयोगः कैवल्यार्थम्। स च संयोगः पङ्ग्वन्धवदुभयोरपि द्रष्टव्यः। अन्धेन पङ्गुः स्कन्धमारोपितः, एवं शरीरारूढपङ्गुदर्शितेन मार्गेणान्धो याति पङ्गुश्चान्ध-स्कन्धारूढः, एवं पुरुषेणे दर्शनशक्तिरस्ति पङ्गुवन्न क्रिया प्रधाने क्रियाशक्तिरस्त्यन्धवन्न दर्शनशक्तिः। यथा वाऽनयोः पङ्ग्वन्धयोः कृतार्थयोर्विभागो भविष्यतीप्सित- स्थानप्राप्तयोः। एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा कर्ता निवर्तते पुरुषोऽपि प्रधानं दृष्ट्वा कैवल्यं गच्छति। तयोः कृतार्थयोर्विभागो भविष्यति। किञ्चान्यत् तत्कृतः सर्गः, तेन संयोगेन कृतस्तत्कृतः, सर्गः सृष्टिः, यथा स्त्रीपुरुषसंयोगात् सुतोत्पत्तिस्तथा प्रधानपुरुषसंयोगात् सर्गस्योत्पत्तिः।

## Summarised Overview

सङ्घातपरार्थत्वात्- योऽयं महदादिसङ्घातः स पुरुषार्थः इत्यनुमीयते, अचेतनत्वात् पर्यङ्कवत्। इदं शरीरं पञ्चानां महाभूतानां सङ्घातो वर्तते, अस्ति पुरुषो यस्येदं भोग्यं शरीरं भोग्यमहदादि सङ्घातरूपं समुत्पन्नमिति। कैवल्यार्थं प्रवृत्तेश्च- यतः सर्वे विद्वानविद्वांश्च संसारसन्तानक्षयमिच्छन्ति। यद्येक एव आत्मा स्यात् तत् एकस्य जन्मनि सर्व एव जायेरन्, एकस्य मरणे सर्वेऽपि म्रियेरन्, एकस्य करणवैकल्ये सर्वेऽपि बधिरान्धमूकाः स्युः, न चैवं भवति, तस्माज्जन्मरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धम्। पुरुषः अकर्ता। तदा अचेतनं चेतनावत् प्रवृत्तिरिति शङ्का न कार्या। पङ्ग्वन्धयोरिव पुरुषप्रकृत्योः संयोगः। स्त्रीपुरुषसंयोगात् सुतोत्पत्तिस्तथा प्रधानपुरुषसंयोगात् सृष्टिप्रकिया प्रचलति।

## Assignments

1. पुरुषास्तित्वं प्रतिपादयत।
2. पुरुषबहुत्वं प्रतिपादयत।

## Suggested Readings


1. SamkhykarikawithgoudapadacommentaryPt.Dhundhirajsastri,Chowkhamba Sanskrit Series Office, Varanasi. Series Office, Varanasi.
2. Samkhyakarika of Isvarakrishna with the commentary of Gaudapada, Dr. T.G.Manikar , Oriental Book Agency Poona
3. Samkhyakarika with Samkhya TattvaKaumudi 1917.


## References


1. The Samkhykarika of Mahamuni Sri lwarakrishna, with the commentary sarabodhini of Pandit Sivanarayanasastri with Sankhyatattvakaumudi of Vachaspati misra.
2. Samkhykarika Iswarakrishna Poshtacharya
3. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4

Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# सृष्टिनिरूपणं त्रिगुणनिरूपणं च

## Learning Outcomes

1. भारतीयदर्शनपद्धतेः सामान्यज्ञानं लभते।
2. सांख्यकारिकायाः पञ्चविंशतितत्त्वानां ज्ञानं लभते।
3. साख्यकारिकायां प्रकृतितत्वं पुरुषतत्वं च अवगच्छति।
4. सृष्टिनिरूपणं त्रिगुणनिरूपणं च जानाति।

## Background

भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते। यदेव किंचित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शनजगति रत्नवद् बहुमूल्यानि आकल्यन्ते। भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अत एव अनेके दर्शनकाराः समाजसुधारकरूपेण प्रथिताः सन्ति । प्रकृतिपुरुषयोः संयोग् सृष्टिप्रकिया जायते। पुरुषः अकर्ता सत्यपि पङ्ग्वन्धन्यायेन प्रकृतिपुरुषयोः सहवर्त्तित्वम्।

## Keywords

प्रकृति, प्रधानं, ब्रह्म, अव्यक्तं, माय, अलिङ्गस्य प्रकृत्तेः, षोडशकः, व्यक्ताव्यक्तविज्ञानान्मोक्षः, पञ्चकः, वैकृतिकः, निष्क्रियः।

## Discussion

**प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः ।**

**तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥ २२ ॥**

**सारांशः –**

पञ्चतन्मात्राणि, एकादशेन्द्रियाणि इति षोडशस्वरूपेण गण उत्पद्यते

इदानीं सर्वविभागदर्शनार्थमाह- प्रकृति प्रधानं ब्रह्म अव्यक्तं बहुधानकं मायेति पर्यायाः। अलिङ्गस्य प्रकृत्तेः सकाशान्महानुत्पद्यते- महान् बुद्धिरासुरी मतिः ख्यातिर्ज्ञानमिति प्रज्ञा पर्यायैरुत्पद्यते। तस्माच्च महतोऽहङ्कार उत्पद्यते। अहङ्कारो भूतादिर्वैकृतस्तैजसोऽभिमान इति पर्यायाः। तस्माद् गणश्च षोडशकः तस्मादहङ्कारात् षोडशकः षोडशस्वरूपेण गण उत्पद्यते। स यथा पञ्चतन्मात्राणि इति तन्मात्रासूक्ष्मपर्यायवाच्यानि। तत एकादशेन्द्रियाणि एष षोडशको गणोऽहङ्कारादुत्पद्यते। किञ्च पञ्चभ्यः पञ्चभूतानि, तस्मात् षोडशकाद्गणात् पञ्चभ्यस्तन्मात्रेभ्यः सकाशात् पञ्च महाभूतान्युत्पद्यन्ते। यदुक्तं- शब्दतन्मात्रादाकाशं, स्पर्शतन्मात्राद्वायुः, रूपतन्मात्रात्तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात् पृथिवी। एवं पञ्चभ्यः पञ्च महाभूतान्युत्पद्यन्ते।

यदुक्तं 'व्यक्ताव्यक्तविज्ञानान्मोक्ष' इति, तत्र महदादि पञ्चभूतान्तं त्रयोर्विंशति भेदं व्यक्तं व्याख्यातम्, अव्यक्तमपि

भेदानां परिमाणात् इत्यादिना व्याख्यातः। पुरुषोऽपि सङ्घात-परार्थत्वात् इत्यादिभिर्हेतुभिर्व्याख्यातः ।

**अध्यवसायो बुद्धिर्धमो ज्ञानं विराग ऐश्वर्यम्**

**सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥२३॥**

सारांशः –

यथा- प्रकृतिः पुरुषो बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि इत्येतानि पञ्चविंशति तत्त्वानि तत्रोक्तप्रकृतेर्महानुत्पद्यते, तस्य महदः किं लक्षणमित्ये-तदाह - अध्यवसायः बुद्धिलक्षणम्। अध्यवसानम् अध्यवसायः, यथा बीजे भविष्यद्वृत्तिकोऽङ्कुरस्तद्वदध्यवसायोऽयं घटोऽयं पट इत्येवम् अध्यवस्यति या सा बुद्धिरिति लक्ष्यते। सा च बुद्धिरष्टाङ्गिका सात्विकतामसरूपभेदात् । तत्र बुद्धेः, सात्त्विकं रूपं चतुर्विधं भवति धर्मो ज्ञानं वैराग्यमैश्वर्यं चेति । तत्र घर्मो नाम दयादानयमनियमलक्षणः। ज्ञानं प्रकाशोऽवगमः, भानमिति पर्यायः तच्च द्विविधं बाह्यमाभ्यन्तरं चेति। तत्र बाह्यं नाम वेदाः, वेदाङ्गाः, पुराणानि न्यायमीमांसाधर्मशास्त्राणि चेति। आभ्यन्तरं प्रकृतिपुरुषज्ञानम्। इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्थाऽयं पुरुषः सिद्धो निर्गुणो व्यापी चेन्न इति। तत्र बाह्यज्ञानेन लोकपङ्क्तिर्लोकानुराग इत्यर्थः। आभ्यन्तरेण ज्ञानेन मोक्ष इत्यर्थः। वैराग्यमपि द्विविधं, बाह्यमाम्यन्तरं च। बाह्यं दृष्टविषयवैतृष्ण्यमर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनाद्

तत्र बुद्धेः, सात्त्विकं रूपं चतुर्विधं- धर्मं, ज्ञानं ,वैराग्यम्, ऐश्वर्यं चेति ।

विरक्तस्य, मोक्षेप्सोर्यदुत्पद्यते तदभ्यन्तरं वैराग्यम्। ऐश्वर्यमीश्वरभावः, तच्चाष्टगुणम् अणिमा इत्यादि। चत्वारि एतानि बुद्धेः सात्त्विकानि रूपाणि। यदा सत्त्वेन रजस्तमसी अभिभूते तदा पुमान् बुद्धिगुणान् धर्मादीनाप्नोति। किंचान्यत् तामसमस्माद्विपर्यस्तम्, अस्माद्धर्मादिविपरीतं तामसं बुद्धिरूपम्। तत्र धर्माद्विपरीतोऽधर्मः' एवमज्ञानमवैराग्यमनैश्वर्यमिति। एवं सात्विकैस्तामसैः स्वरूपैरष्टाङ्गा बुद्धिस्त्रिगुणात् अव्यक्तादुत्पद्यते ॥२३॥

**अभिमानोऽहङ्कारस्तस्माद्द्विविधः प्रवर्तते सर्गः।**

**एकादशकश्च गणस्तत्मात्रापञ्चकस्येव ।। २४ ।।**

सारांशः –

एवं बुद्धिलक्षणमुक्तम्, अहङ्कारलक्षणमुच्यते एकादशकश्च गणः- एकादशेन्द्रियाणि तथा तन्मात्रो गणः, पञ्चकः पञ्चलक्षणोपेतः शब्दतन्मात्रा स्पर्शतन्मात्रारूपतन्मात्रा रसतन्मात्रागन्धतन्मात्रा लक्षणोपेतः ।

**सात्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।**

**भूतादस्तन्मात्रः स तामसस्तैजसादुभयम् ॥२॥**

सारांशः –

किं लक्षणात् सर्गं इत्येतदाह- सत्त्वेनाभिभूते यदा रजस्तमसी भवतस्तदा सोऽहङ्कारः सात्त्विकः, तस्य च पूर्वाचार्यैः संज्ञा कृता वैकृत इति, तस्माद्वैकृतादहङ्कारा-

सात्त्विकोऽहंकारो वैकृतिको भूत्वा एकादशेन्द्रियाणि उत्पादयति।

देकादशक इन्द्रियगण उत्पद्यते, यस्मात् विशुद्धानीन्द्रियाणि स्वविषय समर्थानि, तस्मादुच्यते सात्विक एकादशक इति। किञ्चान्यत्- भूतादेस्तन्मात्रः स तामसः, तमसाभिभूते सत्व रजसी अहङ्कारे यदा भवतः, तदा सोऽहङ्कारस्तामस उच्यते तस्य पूर्वाचार्यकृता संज्ञा भूतादिः, तस्माद् भूतादेरहङ्कारात् तन्मात्रः पञ्चको गण उत्पद्यते। भूतानामादि भूतस्तमो बहुलस्तेनोक्तः स तामस इति तस्माद् भूतादेः पञ्चतन्मात्रको गणः। किञ्च तैजसादुभयम् यदा रजसाभिभूते सत्वतमसी अहङ्कारे भवतस्तदा तस्मात् सोऽहङ्कारस्तैजस इति संज्ञां लभते, तस्मात्तैजसादुभयमुत्पद्यते। उभयमिति - एकादशो गणस्तन्मात्रपञ्चकः । योऽयं सात्त्विकोऽहंकारो वैकृतिको भूत्वा एकादशेन्द्रियाण्युत्पादयति स तैजसमहङ्कारं सहायं गृह्णाति, सात्विको निष्क्रियः स तैजसयुक्त इन्द्रियोत्पत्तौ समर्थः तथा तामसोऽहङ्कारो भूतादिसंज्ञितो निष्क्रियत्वात् तैजसेनाहङ्कारेण क्रियावतायुक्तस्तन्मात्रान्युत्पादयति तेनोक्तं तैजसादुभयमिति।

एवं तैजसेनाहङ्कारेणेन्द्रियाण्येकादश पञ्चतन्मात्राणि कृतानि भवन्ति ॥ २॥

## Summarised Overview

प्रकृति प्रधानं ब्रह्म अव्यक्तं बहुधानकं मायेति पर्यायाः। तस्माच्च महतोऽहङ्कार उत्पद्यते अहङ्कारो भूतादिर्वैकृतस्तैजसोऽभिमान इति पर्यायाः। प्रकृतिः पुरुषो बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि इत्येतानि पञ्चविंशति तत्त्वानि तत्रोक्तप्रकृतेर्महानुत्पद्यते। एवं सात्विकैस्तामसैः स्वरूपैरष्टाङ्गा बुद्धिस्त्रिगुणादव्य-क्तादुत्पद्यते उभयमिति - एकादशो गणस्तन्मात्रापञ्चकः ।

## Assignments

1. सृष्टिप्रक्रियां निरूपयत।
2. त्रगुणात्मकं प्रकृतिं विशदयत।
3. बुद्धेः सात्त्विकरूपभेदान् लिखत।

## Suggested Readings


1. SamkhykarikawithgoudapadacommentaryPt.Dhundhirajsastri,Chowkhamba Sanskrit Series Office, Varanasi. Series Office, Varanasi.
2. Samkhyakarika of Isvarakrishna with the commentary of Gaudapada , Dr. T.G.Manikar , Oriental Book Agency Poona
3. Samkhyakarika with Samkhya TattvaKaumudi 1917.

## References

1. The Samkhykarika of Mahamuni Sri lwarakrishna, with the commentary sarabodhini of Pandit Sivanarayanasastri with Sankhyatattvakaumudi of Vachaspati misra.
2. SamkhykarikaIswarakrishnaPoshtacharya
3. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4
4.

Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# इन्द्रियाणां निरूपणम्

## Learning Outcomes

1. भारतीय दर्शनपद्धतेः सामान्यज्ञानं लभते।
2. सांख्यकारिकायाः सांख्यसिद्धान्तस्य च सामान्यज्ञानं लभते।
3. सांख्यकारिकायां इन्द्रियज्ञानं लभते।

## Background

भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते। यदेव किंचित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शनजगति रत्नवद् बहुमूल्यानि आकल्यन्ते। भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अत एव अनेके दर्शनकाराः समाजसुधाकररूपेण प्रथिताः सन्ति ।

## Keywords

बुद्धीन्द्रियाणि, कर्मेन्द्रियाणि, कर्मेन्द्रिय, सङ्कल्पो वृत्तिः,पञ्च वायवः, सामान्यकरणवृत्तिः।

## Discussion

**बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनस्पर्शनकानि।**

**वाक् पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः ॥२६॥**

सारांशाः-

यो वैकृतात् सात्त्विक एकादशकः सात्विकाहंकाराद् उत्पद्यते

सात्त्विक एकादश इत्युक्तः, यो वैकृतात् सात्त्विक एकादशकः सात्विकाहंकारादुत्पद्यते तस्य का संज्ञेत्याह- चक्षुरादीनि स्पर्शनपर्यन्तानि बुद्धीन्द्रियाण्युच्यन्ते, स्पर्शनं त्वगिन्द्रियं तद्वाची सिद्धः स्पर्शनशब्दोऽस्ति, तेनेदं पठ्यते- स्पर्शनकानीति। शब्दस्पर्शरूपरसगन्धान् पञ्चविषयान् अवगच्छन्तीति पञ्च बुद्धीन्द्रियाणि। वाक् पाणिपादपायूवस्थान् कर्मेन्द्रियाण्याहुः, कर्म कुर्वन्तीति कर्मेन्द्रियाणि।

**उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात्।**

**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥ २७ ॥**

सारांशाः-

इन्द्रियवर्गे, मन उभयात्मकं बुद्धीन्द्रियेषु बुद्धीन्द्रियवत् कर्मेन्द्रियेषु कर्मेन्द्रियवत्।

एवं बुद्धीन्द्रियकर्मेन्द्रिय भेदेन दशेन्द्रियाणि व्याख्यातानि मन एकादशकं किमात्मकं किंस्वरूपं चेत्ति तदुच्यते- अत्र इन्द्रियवर्गे, मन उभयात्मकं बुद्धीन्द्रियेषु बुद्धीन्द्रियवत् कर्मेन्द्रियेषु कर्मेन्द्रियवत्। कस्माद्? बुद्धीन्द्रियाणां प्रवृत्तिं कल्पयति कर्मेन्द्रियाणां च, तस्मादुभयात्मकं मनः, सङ्कल्पकम्। किञ्चान्यत् 'इन्द्रिय च साधर्म्यात्' समानधर्म-

भावात्, सात्विकाहङ्कारात् बुद्धीन्द्रियाणि कर्मेन्द्रियाणि मनसा सहोत्पद्यमानानि कर्मेन्द्रियं प्रति,तस्मात् साधर्म्यान् मनोऽपीन्द्रियम्। एवमेतान्येकादशेन्द्रियाणि सात्विकाद्वैकृताद् हङ्कारादुत्पन्नानि। तत्र मनसः का वृत्तिरिति? सङ्कल्पो वृत्तिः।

बुद्धीन्द्रियाणां शब्दादयो वृत्तयः कर्मेंद्रियाणां वचनादयः।

बुद्धीन्द्रियाणां शब्दादयो वृत्तयः कर्मेंद्रियाणां वचनादयः। इन्द्रियाणां स्वस्वविषयग्राहकत्वमीश्वरकृतं स्वाभाविकं वा, अत्रोच्यते गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च इमान्येकादशेन्द्रियाणि, शब्दस्पर्शरूपरसगन्धाः पञ्चानां वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां सङ्कल्पश्च मनसः, एवमेते भिन्नानामेवेन्द्रियाणामर्थाः गुण परिणामविशेषात् इन्द्रियाणां नानात्वं बाह्यार्थभेदाश्च । अथैतन्नानात्वं नेश्वरेण नाहङ्कारेण न बुद्धधा न प्रधानेन पुरुषेण स्वभावात् कृतगुणपरिणामेनेति ।

**रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।**
**वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ।।२८॥**

सारांशाः-

बुद्धीन्द्रियाणां वृत्तिःकर्मेन्द्रियाणां वृत्तिः च कथ्येते

अथेन्द्रियस्य कस्य का वृत्तिरित्युच्यते- मात्रशब्दो विशेषार्थः, अविशेषव्यावृत्यर्थो यथा- चक्षुषो रूपं, जिह्वाया रसः, घ्राणस्य गन्धः, श्रोत्रस्य शब्दः, त्वचः स्पर्शः, एवमेषां बुद्धीन्द्रियाणां वृत्तिः कथिता, कर्मेन्द्रियाणां वृत्तिः कथ्यते -

वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां कर्मेन्द्रियाणामित्यर्थः। वाचो वचनं हस्तयोरादानं, पादयोर्विहरणं पायोर्भुक्तस्याहारस्य परिणतमलोत्सर्गः, उपस्थस्यानन्दः सुतोत्पत्तिर्विषयो वृत्तिरिति सम्बन्धः ॥२८॥

**स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।**

**सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥२९॥**

सारांशाः-

त्रयस्य बुद्ध्य हङ्कारमनसां स्वालक्षण्या चसामान्या वृत्तिराख्यायते।

अधुना बुद्ध्यहङ्कारमनसामुच्यते- स्वलक्षणस्वभावा स्वलक्षण्या अध्यवसायो बुद्धिरिति लक्षणमुक्तं सैव बुद्धिवृत्तिः, तथाऽभिमानोऽहङ्कार इत्यभिमानलक्षणोऽभिमानवृत्तिश्च, सङ्कल्पकं मनसो वृत्तिः, त्रयस्य बुद्ध्यहङ्कारमनसां स्वालक्षण्या च वृत्तिरसामान्य बुद्धीन्द्रियाणां च वृत्तिः साऽप्यसामान्यैवेति। इदानीं सामान्या वृत्तिराख्यायते। सामान्यकरणवृत्तिः, प्राणाद्या वायवः पञ्च, सर्वेन्द्रियाणां सामान्या वृत्तिः,यतः प्राणो नाम वायुर्मुखनासिकान्तर्गोचरः, तस्य यत् स्पन्दनं कर्म तत् त्रयोदशविधस्यापि सामान्यवृत्तिः, सति प्राणे यस्मात् करणानामात्मलाभ इति, प्राणोऽपि पञ्जरशकुनिवत् सर्वस्य चलनं करोतीति, प्रणनात् प्राण इत्युच्यते। तथाऽपनयनादपानः, तत्र यत्र स्पन्दनं तदपि सामान्यवृत्तिरिन्द्रियस्य। तथा समानो मध्यदेशवर्ती य

पञ्च वायवः त्रयोदशविधस्यापि करणसामान्यवृत्तिः व्याख्याता

आहारादीनां समं नयनात् मानो वायुः, तत्र यत् स्पन्दनं तत् सामान्यकारणवृत्तिः। तथा ऊर्ध्वारोहणादुत्कर्षादुन्नयनाद्वा उदानो नाभिदेशमस्तकान्तर्गोचरः, तत्रोदाने यत् स्पन्दनं तत् सर्वेन्द्रियाणां सामान्या वृत्तिः। किञ्च शरीरव्याप्तिराभ्यन्तर-विभागश्च येन क्रियतेऽसौ शरीरव्याप्याकाशवत् व्यानः, तत्र यत् स्पन्दनं तत् करणजालस्य सामान्या वृत्तिरिति। एवमेते पञ्च वायवः सामान्यकरणवृत्तिरिति व्याख्याता, त्रयोदशविधस्यापि करणसामान्यवृत्तिरित्यर्थः।

**युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा।**

**दृष्टे, तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥३०॥**

सारांशः-

बुद्ध्यहङ्कारमनसामेकैकेन्द्रियसम्बन्धे सति चतुष्टयं भवति।

युगपच्चतुष्टयस्य, बुद्ध्यहङ्कारमनसामेकैकेन्द्रियसम्बन्धे सति चतुष्टयं भवति। चतुष्टयस्य दृष्टे प्रतिविषयाध्यवसाये युगपद्वृत्तिः, बुद्ध्यहङ्कारमनश्चक्षूंषि युगपदेककालं रूपं पश्यन्ति स्थाणुरयमिति। बुद्ध्यहङ्कारमनोजिह्वा युगपद्रसं गृह्णन्ति। बुद्ध्यहङ्कारमनोघ्राणानि युगपद्गन्धं गृह्णन्ति। तथा त्वक्श्रोत्रे अपि किञ्च क्रमशश्च तस्य निर्दिष्टा, तस्येति चतुष्टयस्य, क्रमशश्च वृत्तिर्भवति। यथा कश्चित् पथि गच्छन् दूरादेव दृष्ट्वा स्थाणुरयं पुरुषो वेति संशये सति तत्रोपरूढ तल्लिङ्गं पश्यति शकुनि वा, तत्तस्तस्य मनसा सङ्कल्पिते संशये व्यवच्छेदभूता बुद्धिर्भवति स्थाणुरयमिति, अतोऽह-ङ्कारश्च निश्चयार्थः, स्थाणुरेवेति, इत्येवं बुद्ध्यहङ्कारमन श्चक्षुषां क्रमशो वृत्तिर्दृष्टा, यथा रूपे तथा शब्दादिष्वपि

बोद्धव्या। दृष्टे दृष्टविषये। किञ्चान्यत् तथाऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः, अदृष्टेऽनागतेऽतीते च काले बुद्ध्यहङ्कार मनसां रूपे चक्षुःपूर्विका त्रयस्य वृत्तिः, स्पर्शे त्वक्पूर्विका, गन्धे घ्राणपूर्विका, रसे रमनपूर्विका, शब्दे श्रवणपूर्विका, बुद्धयहङ्कारमनसामनागते भविष्यति कालेऽतीते च तत्पूर्विका क्रमशो वृत्तिः, वर्त्तमाने युगपत् क्रमशश्चेति ।

**स्वां स्वां प्रतिपद्यन्ते परस्पराकूत हेतुकां वृत्तिम्।**

**पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम् ॥३१॥-**

सारांशः-

पुरुषार्थः कर्तव्य इत्येवमर्थ गुणानां प्रवृत्तिः, तस्मादेतानि करणानि पुरुषार्थं प्रकाशयन्ति

किञ्च- स्वां स्वामिति वीप्सा बुद्धिरहङ्कारमनांसि स्वां स्वां वृत्ति परस्पराकूतहेतुकाम् आकूतमादरसम्प्रम' इति प्रतिपद्यन्ते पुरुषार्थकरणाय बुद्ध्यहङ्कारादयः। बुद्धिरह ङ्काराकूतं ज्ञात्वा स्वविषयं प्रतिपद्यते। 'किमर्थमिति' चेत् पुरुषार्थ एव हेतुः, पुरुषार्थः कर्तव्य इत्येवमर्थ गुणानां प्रवृत्तिः, तस्मादेतानि करणानि पुरुषार्थं प्रकाशयन्ति,'यद्यचेतनानीति कथं स्वयं प्रवर्त्तन्ते' ? न केनचित् कार्यते करणम् पुरुषार्थ इवैकः कारवतीति वाक्यार्थः, न केनचित् ईश्वरेण पुरुषेण वा, कार्यते प्रबोध्यते करणम् ॥ ३१॥

**करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।**

**कार्यं च तस्य दशधा हार्यं धार्यं, प्रकाश्यञ्च ॥३२॥**

सारांशः-

त्रयोदशविधं करणम्- महदादित्रयं, पञ्च बुद्धीन्द्रियाणि, पञ्चकर्मेन्द्रियाणि च।

'बुद्ध्यादि कतिविधं तदित्युच्यते- करणं त्रयोदशविधं बोद्धव्यम्, महदादित्रयं, पञ्च बुद्धीन्द्रियाणि चक्षुरादीनि, पञ्चकर्मेन्द्रियाणि वागादीनीति, त्रयोदशविधं करणम्।

तदाहरणधारणप्रकाशकरम्- तत्राहरणं धारणं च कर्मेन्द्रियाणि कुर्वन्ति, प्रकाशं बुद्धीन्द्रियाणि। कतिविधं कार्यं

तस्येति तदुच्यते- कार्यं च तस्य दशधा तस्य करणस्य कार्यं कर्त्तव्यमिति दशधा दशप्रकारम्, शब्दस्पर्शरूपरसगन्धाख्यं बचनादानविहरणोत्सर्गानन्दाख्यमेतद्दशविधं कार्यं, बुद्धीन्द्रियैः प्रकाशितं कर्मेन्द्रियाण्याहरन्ति धारयन्ति चेति ॥३२॥

**अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।**

**साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥**

सारांशः-

बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च दशविधमेतत् करणं बाह्यम्

अन्तःकरणमिति- बुद्धहङ्कारमनांसि त्रिविधं महदादि भेदात्, दशधा बाह्यं च. बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च दशविधमेतत् करणं बाह्यम्,तत्त्रयस्यान्तःकरणस्य विषयाख्यं बुद्ध्हङ्कारमनसां भोग्यं साम्प्रतकालं श्रोत्रं वर्तमानमेव शब्दं शृणोति नातीतं न च भविष्यन्तं, चक्षुरपि वर्त्तमानं रूपं पश्यति नातीतं नानागतं, त्वग्वर्तमानं स्पर्शं, जिह्वा वर्तमानं रसं, नासिका वर्तमानं गन्धं नातीतानागतं चेति। एवं कर्मेन्द्रियाणि वाग्वर्तमानं शब्दमुच्चारयति नातीतं नानागतं, पाणी वर्तमानं घटमाददाते नातीतमनागतं च पादौ वर्तमानं पन्थानं विहरतो नातीतं नाप्यनागतं, पायूपस्थौ च वर्त्तमानावुत्सर्गानन्दौ कुरुतो नातीतौ नानागतौ, एवं बाह्यकरणं साम्प्रतकालमुक्तम्। त्रिकालमाभ्यन्तरं करणम् बुद्ध्यहङ्कारमनांसि त्रिकाल विषयाणि बुद्धिर्वर्तमानं घटं बुध्यते अतीतमनागतं चेति, अहङ्कारो वर्तमानेऽभिमानं करोत्यतीतेऽनागते च, तथा मनो वर्त्तमाने सङ्कल्पं कुरुतेऽतीतेऽनागते च एवं त्रिकालमाभ्यन्तरं करणमिति ॥ ३३ ॥

**बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि।**

**वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि॥ ३४॥**

सारांशः-

इदानीमिन्द्रियाणि कति सविशेषं विषयं गृह्यन्ति, कानि निर्विशेषमिति तदुच्यते - बुद्धीन्द्रियाणि तेषां सविशेषविषयं गृह्णन्ति, सविशेषविषयं मनुष्याणां, शब्दस्पर्शरूपरसगन्धान् सुखदुःखमोहविषययुक्तान् बुद्धीन्द्रियाणि प्रकाशयन्ति। देवानां निर्विशेषान् विषयान् प्रकाशयन्ति। तथा कर्मेन्द्रियाणां मध्ये वाग्भवति शब्दविषया, देवानां मानुषाणां च वाग्वदति श्लोकादीनुच्चारयति, तस्माद् देवानां मानुषाणां च वागिन्द्रियं तुल्यम्, शेषाण्यपि वाग्व्यतिरिक्तानि पाणिपादपायूपस्थ संज्ञितानि पञ्चविषयाणि, पञ्च विषयाः शब्दादयो तेषां तानि पञ्चविषयाणि शब्दस्पर्शरूपरसगन्धाः पाणौ सन्ति पञ्चशब्दादि लक्षणायां भुवि पादो विहरति, पाय्विन्द्रियं पश्चक्लृप्तमुत्सर्गे करोति,तथोपस्थेन्द्रियं पञ्चलक्षणं शुक्रमानन्दयति।

बुद्धीन्द्रियाणि कति सविशेषं विषयं गृह्यन्ति, कानि निर्विशेषं इति उच्यते

**सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।**
**तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥३५॥**

सारांशः-

सान्तःकरणा बुद्धिः, अहङ्कारमनः सहितेत्यर्थः, यस्मात् सर्वादीन्त्रिविषयमवगाहते गृह्णाति, त्रिष्वपि कालेषु शब्दादीन् गृह्णाति तस्मात् त्रिविधं करणं द्वारि, द्वाराणि शेषाणि करणानीति ॥३५॥

**एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः ।**
**कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥३६॥**

सारांशः-

यानि करणान्युक्तानि एते गुणविशेषाः, कि विशिष्टाः? प्रदीपकल्पाः प्रदीपवद्विषयप्रकाशकाः, परस्परविलक्षणा

प्रदीपकल्पाः परस्परविलक्षणा असदृशा भिन्नविषया इत्यर्थः।

असदृशा भिन्नविषया इत्यर्थः। गुणविशेषा इति। गुणविशेषा गुणेभ्यो जाताः। कृत्स्नं पुरुषार्थं बुद्धीन्द्रियाणि कर्मेन्द्रियाण्यहङ्कारो मनश्चैतानि स्वं स्वमर्थे पुरुषस्य प्रकाश्य बुद्धौ प्रयच्छन्ति बुद्धिस्थं कुर्वन्तीत्यर्थः, यतो बुद्धिस्थं सर्वे विषयसुखादिकं पुरुष उपलभ्यते ॥३६॥

**सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः।**

**सैवच विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम्।।३७॥**

सारांशः-

सर्वेन्द्रियगतं त्रिष्वपि कालेषु सर्वे प्रत्युपभोगमुपभोगं प्रति देवमनुष्यतिर्यग्बुद्धीन्द्रियद्वारेण सान्तःकरणा बुद्धिः सम्पादयति यस्मात् तस्मात् सैव च विशिनष्टि प्रधानपुरुषयोर्विषयविभागं करोति। प्रधानपुरुषान्तरं-नानात्वमित्यर्थः, सूक्ष्ममित्यनधिकृत-तपश्चरणैरप्राप्यम्,इयं प्रकृतिः सत्वरजस्तमसां साम्यावस्था इयं बुद्धिरयमहङ्कार एतानि पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्चमहाभूतान्ययमन्यः पुरुष एभ्यो व्यतिरिक्त इत्येवं बोधयति बुद्धिः यस्यावापादपवर्गो भवति ॥३७॥

प्रकृतिः सत्वरजस्तमसां साम्यावस्था

**तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।**

**ऐते स्मृताः विशेषाः शान्ता घोराश्च मूढाश्च ॥३८।।**

सारांशः-

पूर्वमुक्तं विशेषाविशेषविषयाणि तत् के?विषयास्तान् दर्शयति- यानि पञ्च तन्मात्राण्यहङ्कारादुत्पद्यन्ते ते-शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रम् एतान्यविशेषा उच्यन्ते देवानामेते सुखलक्षणा विषया दुःखमोहरहिताः, तेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पंचमहाभूतानि पृथिव्यप्तेजोवाय्वाकाशसंज्ञानि यान्युत्पद्यन्ते एते स्मृता विशेषाः, गन्धतन्मात्रात् पृथिवी; रसतन्मात्रादापः,

विशेषाविशेष विषयाणि व्याख्याता

रूपतन्मात्रात् तेजः, स्पर्शतन्मात्राद्वायुः शब्दतन्मात्रात् आकाशम्,इत्येवं उत्पन्नानि एतानि महाभूतान्येते विशेषा मानुषाणां विषयाः शान्ताः- सुखलक्षणाः, घोराः- दुःखलक्षणाः, मूढाः- मोहजनकाः यथाऽऽकाशं कस्यचिदनवकाशादन्तः गृहादेर्निर्गतस्य सुखात्मकं शान्तं भवति, तदेव शीतोष्णवात वर्षाभिभूतस्य दुःखात्मकं घोरं भवति तदोव पन्थानं गच्छति वनमार्गाद् भ्रष्टस्य दिङ्मोहान्मूढं भवति । एवं वायुर्धर्मार्त्तस्य शान्तो भवति शीतार्त्तस्य घोरो धूलिशर्कराविमिश्रोऽतिवान् मूढ इति । एवं तेज प्रभृतिषु द्रष्टव्यम् ।।३८।।

## Summarised Overview

शब्दस्पर्शरूपरसगन्धान् पञ्चविषयान् अवगच्छन्तीति पञ्च बुद्धीन्द्रियाणि। वाक् पाणिपादपायूवस्थान् कर्मेन्द्रियाण्याहुः, कर्म कुर्वन्तीति कर्मेन्द्रियाणि। प्रधानपुरुषान्तरं- नानात्वमित्यर्थः, सूक्ष्ममित्यनधिकृत-तपश्चरणैरप्राप्यम्,इयं प्रकृतिः सत्वरजस्तमसां साम्यावस्था इयं बुद्धिरयमहङ्कार एतानि पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्चमहाभूतान्ययमन्यः पुरुष एभ्यो व्यतिरिक्त इत्येवं बोधयति बुद्धिः यस्यावापादपवर्गो भवति अत्र इन्द्रियवर्गे, मन उभयात्मकं बुद्धीन्द्रियेषु तेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पंचमहाभूतानि बुद्धीन्द्रियवत् कर्मेन्द्रियेषु कर्मेन्द्रियवत्। यानि पञ्च तन्मात्राण्यहङ्कारादुत्पद्यन्ते।

## Assignments

1. इन्द्रियाणि कति सविशेषं विषयं गृह्णन्ति, कानि निर्विशेषमिति व्याख्यायत।
2. साख्यकारिकायाम् इन्द्रियाणां तत्वज्ञानं विशदयत।
3. सामान्यकरणवृत्तिः व्याख्यायत।
4. विशेषाविशेषविषयाणि के विशदयत।

5. त्रयोदशविधं करणं प्रतिपादयत।

## Suggested Readings


1. SamkhykarikawithgoudapadacommentaryPt.Dhundhirajsastri,Chowkhamba Sanskrit Series Office, Varanasi. Series Office, Varanasi.
2. Samkhyakarika of Isvarakrishna with the commentary of Gaudapada , Dr. T.G.Manikar , Oriental Book Agency Poona
3. Samkhyakarika with Samkhya TattvaKaumudi 1917.


## References


1. The Samkhykarika of Mahamuni Sri lwarakrishna, with the commentary sarabodhini of Pandit Sivanarayanasastri with Sankhyatattvakaumudi of Vachaspati misra.
2. SamkhykarikaIswarakrishnaPoshtacharya
3. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4

Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# सांख्यमते कैवल्यप्रक्रिया

# BLOCK - 3

SGOU

UNIT 1

# सांख्यमते लिङ्गसर्गः

## Learning Outcomes

- सूक्ष्मशरीरान् अधिकृत्य परिचिनोति।
- सूक्ष्मशरीर विभागान्जानाति।
- सूक्ष्मशरीरस्य आवश्यकत्वम् अवगन्तुं शक्नोति।

## Background

सांख्यदर्शने पुरुषः निष्क्रियः स्वीक्रियते। अतः अस्य लोकान्तरगमनं मोक्षोपलब्धिश्च कथं भविष्यति। यथा स्थूलशरीरस्तु अत्रैव भस्मसात्क्रियते, अतः तस्य स्थूलशरीरस्यापि परलोकगमनं न युज्यते। अत एव अष्टादशतत्त्वात्मकं सूक्ष्मशरीरं स्वीक्रियते सांख्यदर्शने। शरीरेऽस्मिन्बुद्धिः, अहङ्कारः, एकादश इन्द्रियाणि, पञ्चतन्मात्राणि च भवन्ति। एतेषामेव यावत्पर्यन्तं स्थूलशरीरे स्थितिः भवति, तावत्पर्यन्तं शरीराणां कृते प्राणवान् इति व्यवहारः भवति। यदा इमानि अष्टादशतत्त्वानि स्थूलशरीरं विहाय बहिः गच्छति तदा मृतः इति व्यवहारः भवति। इत्थं पुरुषस्य देहदेहान्तरं संसरणमेवात्र सूक्ष्मशरीरकल्पनायाः हेतुः यतः अनेन सूक्ष्मशरीरेण विना करणानामपि स्थितिः न संभवति। एवं सांख्यमतस्थं लिङ्गसर्गम् अस्मिन् एकके विशदयति।

## Keywords

सूक्ष्माः- मातापितृजाः- नियताः - निरुपभोगं- भावैः- अधिवासितम्- लिङ्गम्- स्थाण्वादि- यथाश्रयते - निराश्रयं- पुरुषार्थहेतुकम् – निमित्तनैमित्तिकप्रसङ्गेन।

## Discussion

**सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः।**

**सूक्ष्मास्तेषां नियताः मातापितृजाः निवर्तन्ते। ।३९। ।**

विशेषाणाम् अवान्तर-विशेषमाह

**अर्थः**- सूक्ष्मा आसर्गप्रलयान्नित्याः मातापितृजा निवर्तन्ते। सह प्रभूतैरिति वर्तते। केचित्तु प्रभूतग्रहणेन बाह्यानामेव विशेषाणां ग्रहणमिच्छन्ति। तेषाम् उद्भिज्जस्वेदजयोरग्रहणम्। तस्मादुभयथा प्रभूता इत्येतदनवद्यम्। आह, सूक्ष्माभिधानमप्रसिद्धत्वात्। मातापितृजाश्च प्रभूताश्च प्रसिद्धा युक्तो एषां परिग्रहः।

**पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।**

**संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्। ।४०। ।**

**अर्थः** - पूर्वम् आदिसर्गे प्रधानेन प्रतिपुरुषं पृथक्पृथक् उत्पादितं लिङ्गं सूक्ष्मशरीरं असक्तं अन्याहतं शिलायामपि प्रवेशनार्हम् आमोक्षावस्थायि च। एवं महदहङ्-कारमनोदशेन्द्रियपञ्चतन्मात्रारूपाष्टादशतत्त्वसमूहरूपं स्वतः स्थूलदेहं विना उपभोगासमर्थम्, धर्माधर्म-ज्ञानाज्ञान-वैराग्यावैराग्यऐश्वर्यानैश्वर्यरूपाणाम् अष्टभावानां वासनया युक्तं सत्संसरति – पूर्वपूर्वं स्थूलशरीरं परित्यज्य नवं नवं स्थूलशरीरं धारयितुं प्रभवति। ।४०। ।

सूक्ष्मशरीरस्य आवश्यकत्वप्रदर्शनम्

**चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया।**

**तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्। ।४१। ।**

**अर्थः** – यथा पटभित्त्यादिकेः आश्रयैर्विना चित्रं वा, स्थाण्वादिभिः प्रतियोगिभिर्विना तच्छायावानतिष्ठति, तद्वदेव विशेषधर्मविरहितैः सूक्ष्मैःशरीरैर्विना निराश्रयं बुद्ध्यादिकं लिङ्गं न तिष्ठतीति तदाधारं सूक्ष्मशरीरं आवश्यकमेव। ।४१।।

सूक्ष्मशरीरसंसरण-प्रकारः

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन।
प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम्। ।४२। ।

अर्थः - भोगापवर्गलक्षणपुरुषार्थोद्देशेन प्रवर्तित इदं च सूक्ष्मशरीरं धर्मादिनिमित्तसंबन्धेन स्थूलदेहादि नैमित्तिकसम्बन्धेन च अद्भुतेन प्रकृतिमहिम्नानटवत्व्यवतिष्ठते नटो यथा रङ्गे विविधामाश्चर्यमीं वेशरचनां परिगृह्य व्यवहरति, तत्तच्छरीरं च अहंत्वेनाभिमन्यते, तथा। ।४२। ।

## Summarised Overview

एकस्मिन्जन्मनि मुक्तिः सम्भवा नास्ति इति विचारेण सांख्यशास्त्रे एतादृशी विचारधारा विकसिता यत्चेतनो जीवात्मा अनेकानि जन्मानि गृह्णाति। तदा प्रकृतिः बुद्धेरष्टभिर्भावैः सह एकस्मात्शरीरात् अन्यस्मिन्शरीरे प्रविष्टा भवति। एषा प्रक्रिया स्थूलशरीरेण सम्भवा नास्ति, अतः शरीरान्तः स्थितं यत्सूक्ष्मशरीरं वर्तते तदेव शरीरान्निष्क्रमणं करोति। सूक्ष्मशरीरे पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चतन्मात्राः, मनः, बुद्धिः, अहङ्कारश्चेति अष्टादशतत्त्वानि सन्ति। इदमेव सूक्ष्मशरीरं पुरुषस्य भोगाय नानारूपाणि धारयति। स्थूलशरीरं विना सूक्ष्मशरीरं भोगाय न क्षमते। सः स्थूलशरीरस्याश्रयम् अवश्यमेव गृह्वाति। इदं सूक्ष्मशरीरम्अप्रतिहतगतिकं भवति।

सांख्यदर्शने पुरुषः निष्क्रियः स्वीक्रियते। अतः अस्य लोकान्तरगमनं मोक्षोपलब्धिश्च कथं भविष्यति। यतः स्थूलशरीरस्तु अत्रैव भस्मसात्क्रियते, अतः तस्य स्थूलशरीरस्यापि परलोकगमनं न युज्यते। अत एव अष्टादशतत्त्वात्मकं सूक्ष्मशरीरं स्वीक्रियते सांख्यदर्शने। शरीरेऽस्मिन्बुद्धिः, अहंकारः, एकादशेन्द्रियाणि, पंचतन्मात्राणि च भवन्ति एतेषामेव यावत्पर्यन्तम्स्थूलशरीरे स्थितिः भवति, तावत्पर्यन्तं शरीरिणां कृते प्राणवान् इति व्यवहारः भवति। यदा इमानि अष्टादशतत्त्वानि स्थूलशरीरं विहाय बहिः गच्छन्ति तदामृतः इति व्यवहारः भवति। इत्थं पुरुषस्य देहाद्देहान्तरसंसरणमेवात्र सूक्ष्मशरीरकल्पनायाः हेतुः। यतः अनेन सूक्ष्मशरीरेण विना करणानामपिस्थितिः न सम्भवति।

## Assignments

1. चतुर्विंशतितत्वानां मेलनेन त्रिधा विशेषवस्तूनि उत्पद्यन्ते कानि ?
2. सांख्यसम्मतं सूक्ष्मशरीरं संक्षेपेण निरूपयत।
3. संक्षेपेण सूक्ष्मशरीर-संसरणप्रक्रियाम् उपस्थापयतु।

## Suggested Readings

1. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4
2. Samkhyakarika with Gaudapadabhasyam, English translation by Dr. T.G Mainkar, Oriental Book Agency, Pune 1972.
3. संस्कृतसाहित्येतिहासः, आचार्यलोहमणिदाहलाः, चौखम्बाकृष्णदास् अकादमि वारणासि, 1998
4. सर्वदर्शनसंग्रहः, श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, चौखम्बा विद्याभवन्, वारणासि।

## References


1. संस्कृतमञ्जूषा - डा.उदयशंकरझा, चौखम्बासुरभारतीप्रकाशनवारणासि।
2. सांख्यतत्वकौमुदी - श्री.वाचस्पतिमिश्राचार्यः, Chowkhambasanskrit series office, Varanasi, 1971.
3. History of Indian Philosophy, Surendranath Das Guptha, Vol-III, MLBD, Varanasi
4. Indian Philosophy - Dr.S. Radhakrishnan, Vol- I & II, Varanasi, Delhi.
5. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal Banarsidass Publishers Private Limited, Delhi, 2000
6. Outlines of Indian Philosophy - Jadunath Sinha, New Central Book agency, Calcutta, 1992.

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# सांख्यमते भावानां निरूपणम्

## Learning Outcomes

- भावानधिकृत्य ज्ञानं लभते।
- त्रिविधबन्धानधिकृत्य परिचयं प्राप्नोति।
- विपर्ययभेदान्जानाति।
- उभयविधसर्गावश्यकत्वं अवगन्तुं शक्नोति।

## Background

पुरुषस्य देहादेहान्तरे संसरणमेव लिङ्गशरीरकल्पनायाः हेतुः। एतदेव पुरुषस्य संसरणम्, साक्षात्पुरुषसम्बद्धत्वात्। नटस्तु सामाजिकान्रसयितुं स्वयं वा धनयशाद्यावार्जनार्थं पात्रान्तरवेशं गृह्णाति, नहि सूक्ष्मशरीरस्य तथाविधं प्रयोजनम्युज्यते। तस्य प्रयोजनं तु पुरुषार्थ एव। पुरुषस्य भोगापवर्गात्मकप्रयोजनेन हेतुना प्रयुक्तम् इत्यर्थः। तत्र धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्यानि निमित्तानि।

इत्थं सुस्पष्टमिदं तथ्यं तत्बुद्धेः सात्विकादि स्वभाववशाद्धर्माधर्मादयो ये भावाः स्थूलशरीरं व्याप्नुवन्ति तद्वशात्स्थूलशरीरेण सम्पाद्यमानानं कर्मणां भोगाः अपरिहार्याः एव। पुरुषस्तु बुद्धिप्रतिबिम्बितत्वात्तानि स्वकीयानि इव मन्यते। अतो तेषां भोगाय तस्यासक्तिर्जायते। तद्वशात्पुरुषस्य भोगापवर्गात्मकं प्रयोजनं सम्पादयितुं सूक्ष्मशरीरं

देहान्तरं संसरति। तदधिकृत्य विस्तारतया पठामः।

## Keywords

सांसिद्धिकाः - प्राकृतिकाः- वैकृतिकाः- बन्धः - प्रकृतिलयः- प्रत्ययसर्गः- तुष्टिः - विपर्ययः - तामिस्रः- अन्धतामिस्रः- बुद्धिवधैः – सिद्धयः - आध्यात्मिक्यः- लिङ्गः - भावनिर्वृतिः।

## Discussion

के भावाः इत्याह -

**सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः।**

**दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः। ।४३।।**

**अर्थः** – निमित्तरूपाः धर्माद्याः अष्टोभावाः करणरूपबुद्ध्याश्रिताः सांसृतिमूलभूताः भवन्ति। एते च भावाः सांसिद्धिकाः असांसिद्धिकाः इति द्विविधाः। तत्र सांसिद्धिकाः स्वभावसिद्धाः प्राकृतिकाः इत्युच्यन्ते। असांसिद्धिकाः पुरुषप्रयत्नसाध्याः वैकृतिकाः इत्युच्यन्ते। तत्र भगवतः कपिलादेः धर्मज्ञानवैराग्यैश्वर्यरूपभावाः सांसिद्धिकाः। प्राचेतसादेस्तुतप आदिनिमित्तजन्याः वैकृतिकाः। एवम् अधर्मादयोऽपि केषांचित्सांसिद्धिकाः केषांचित्दुरभ्यासादि जन्याः। एवंनैमित्तिकरूपाः शरीररूपकार्याश्रयिणः गर्भनिष्ठाः कलल- बुद्बुद- मांस- पेशी- करण्ड-अङ्ग- प्रत्यङ्गव्यूहाः, गर्भविनिर्गतदेहनिष्ठाः बाल्य- कौमार- यौवन उक्तप्रकारेण विविधाः। ।४३।।

बन्धत्रैविध्यनिरूपणम्

**धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण।**
**ज्ञानेन चा पवर्गो विपर्ययादिष्यते बन्धः। ।४४। ।**

**अर्थः**- धर्मेण द्युप्रभृत्यूर्ध्वलोकगमनम् – अधर्मेण च नरकाद्यधोलोकगमनम्, ज्ञानेन विविक्तात्मसाक्षात्कारपूर्वकं भवबन्धविमोचनरूपो मोक्षः, अज्ञानात्बन्धश्च भवति। ।४४। ।

विपर्यादि बुद्धिसर्गस्य समासेन कथनम्

**वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात्।**
**ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः।।४५।।**

अर्थः- येषाम् आत्मज्ञानं न जातम्, ततः प्रागेव च इह परसुखेषु वितृष्णा च जाता, तेषां तादृशात्वैराग्यात्प्रकृतौ तत्कार्येषु महदादिषु वा लयः भवति। रजः कार्यात्कर्मफलाभिलाषात् तादृशकर्मफलभोगानुगुणः संसारः स्थूलशरीरपरिग्रहः जायते। अणिमाद्यैश्वर्यात् अप्रतिबन्धेन सर्वामप्यात्मन इच्छां पूरयितुं समर्थो भवति। अनैश्वर्याच्च सर्वत्र इच्छायाः विधातः एव भवति।।४५।।

**एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः।**
**गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत्।।४६।।**

पञ्चाशद्भेदान्गणयति

अर्थः - विपर्ययशक्तितुष्टिसिद्धयश्च बुद्धिसृष्टाः बुद्धिरूपा एव। तत्र-विपर्ययः अज्ञानम्। अशक्तिः पदार्थनिश्चयजनने क्रियाजनने च सामर्थ्याभावः अनैश्वर्यावैराग्य धर्मरूपः। तुष्टिः धर्मवैराग्यैश्वर्यरूपा। सिद्धिः ज्ञानम्। गुणानां न्यूनाधिकबलतया परस्परमभिभवात्तस्यैवास्य विपर्ययादि रूपस्य बुद्धिसर्गस्य पञ्चाशद् भेदाश्च भवन्ति।।४६।।

**पञ्चविपर्ययभेदा भवन्त्यशक्तिस्तु करणवैकल्यात्।**
**अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः।।४७।।**

अर्थः – ते च पञ्चाशद्भेदाः इत्थं विपर्ययभेदाः पञ्च (५) करणानामपाटवनिमित्तात् अशक्तिः अष्टविंशतिधा (२८) तुष्टिः नवधा (९) सिद्धिश्चाष्टधा (८) इति।।४८।।

**भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः।**
**तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः।।४८।।**

पञ्च क्लेशरूपविपर्ययस्य अष्टविधत्वम्

**अर्थः**- तत्र तमः, मोहः, महामोहः, तामिस्रः, अन्धतामिस्रः इति विपर्यय भेदाः पञ्च। तत्र अव्यक्ताद्यष्टसु आत्मताबुद्धिः तमः अष्टधा। अष्टैश्वर्येषु मोहः अष्टधा। दिव्यादिव्येषु शब्दादि पञ्चविषयेषु रागः महामोहः दशधा। दिव्यादिव्यभेदेन द्विविधेषु शब्दादि पञ्चविषयेषु तत्साधनेषु अणिमाद्यष्टैश्वर्येषु च अन्यतमास्वादनवेलायां, आपततः तदितरस्य एतद्रसानुभवविघातकतया द्वेषविषयत्वमेव भवतीति। एतादृशोद्वेषः तामिस्रः, एवं रूपः अभिनिवेशः अन्धतामिस्रश्च अष्टादशधा। ।४८। ।

तुष्टिः नवधा इत्युक्तं, ताः परिगणयति

**एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा।**
**सप्तदश वधाः बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम्। ।४९। ।**

**अर्थः**- मनसा सह दशानामपीन्द्रियाणां सौन्दर्यनाशकाः दोषाः एकादश (११)। वक्ष्यमाणानां नवविध तुष्टीनां अष्टविधसिद्धीनां च विपर्ययात्वैकल्यात्बुद्धेर्दोषाः सप्तदश (१७)। आहत्य अष्टविंशतिर्भेदाः अशक्तेः। ।४९। ।

**आध्यात्मिक्यश्चतस्रः, प्रकृत्युपादानकालभाग्याख्याः।**
**बाह्या।विषयोपरमात्पञ्चचनवतुष्टयोऽभिमताः। ।५०**

चतुर्विध आध्यात्मिक तुष्टिकथनम्

**अर्थः**- यः खलु प्रकृति विविक्तात्मास्तित्वोपदेश श्रवणमात्रेण कृतकृत्यताभिमानि विविक्तात्मसाक्षात्काराय नैव प्रतयते, तस्य काचन तुष्टिर्भवति किल, सैव आध्यात्मिकी तुष्टिः । यश्च आत्मव्यतिरिक्तानेव प्रकृत्यादीन् आत्मत्वेनाभिमन्यते, तस्यामेवावस्थायां बाह्यविषयेषु वैराग्यं च भवति चेत्, तस्य काचन तुष्टिर्भवति, सैव बाह्यातुष्टिः। तत्राद्याचतुर्विधाः प्रकृतितुष्टिः, उपादानतुष्टिः, कालतुष्टिः, भाग्यतुष्टिः इति।

द्वितीयातु पञ्चविधापारतुष्टिः, सुपारतुष्टिः, पारापरतुष्टिः, अनुत्तमाम्भस्तुष्टिः, उत्तमाम्भस्तुष्टिः इति ।।५०।।

**ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।**

**दानं च सिद्धयोऽष्टौसिद्धेः पूर्वाऽङ्कुशस्त्रिविधः। ।५१।।**

सिद्धिभेदाः

**अर्थः** – ऊहः जन्मान्तरसंस्कारेण तात्त्विकार्थानां तर्कणं, शब्दः परैः पठ्यमानात् शब्दादेवार्थज्ञानम्, अध्ययनं गुरुमुखात्शास्त्रार्थग्रहणम्, आध्यात्मिकादिदुःखत्रयनाशः सुहृत्प्राप्तिः तत्त्वज्ञमित्रमिलनम्, दानं ज्ञातार्थसंशोधनेन बुद्धेः स्वच्छप्रवहेऽवस्थापनं सर्वार्पणेन ज्ञानप्राप्तिर्वा इति अष्टौ सिद्धयः। तत्र पूर्वोक्त विपर्ययाशक्तितुष्टिरूपस्त्रिविधोऽपि सिद्धेः धातुकः। । ५१।।

**न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः।**

**लिङ्गाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्तते सर्गः।।५२।।**

उभयविधसर्गावश्यक-त्वम्

**अर्थः** – पुरुषार्थभोगरूपं भोगं प्रति भोग्य – भोगाधिकरण-भोगसाधनानीति त्रयमप्यपेक्षितं खलु। तत्र शब्दादिकं - भोग्यम्, भोगाधिकरणम् - शरीरं, स्थूलसूक्ष्मरूपेण द्विविधमपि, भोगसाधनानि च बाह्यान्तरकरणानि। भोग्यभोगाधिकरणयोः सम्पादनाय तन्मात्रकृतसर्गः सूक्ष्मशरीर- शब्ददिमहाभूत-स्थूलशरीरादिरूपः। भोगसाधनसम्पादनायप्रत्ययसर्गः धर्माद्यष्टभेदेन पञ्चाशद्भेदेन वा भिन्नः। तन्मात्रकृतसर्ग एव लिङ्गसृष्टिः प्रत्ययसर्ग एव भावसृष्टिः। तत्र भावसर्गैर्विना लिङ्गसर्गो न भवति, उत्तरोत्तरदेहादिलाभस्य पूर्वपूर्वसंस्कारादृष्टकारित्वात्। लिङ्गसर्गेण विना भावसर्गोन भवति, धर्मादेः स्थूलसूक्ष्मदेह साध्यत्वात्। तस्मात्लिङ्गाख्यो भावाख्यश्चेति द्विविधोऽपि सर्गः बुद्धितत्वात्प्रवर्तते। ।५२। ।

## Summarised Overview

प्रतीयतेऽनेन इति प्रत्ययोबुद्धिः तस्य सर्गः प्रत्ययसर्गः। तत्र धर्माधर्म ज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्यभेदादि स्वरूपारूपोपन्नाबुद्धिः। सैव अष्टरूपात्मिकाबुद्धिः एकरूपेण अवस्थिता सती समष्ट्याप्रत्ययसर्गेतिसंज्ञया बोध्यते। तदेव प्रत्ययसर्गः विपर्ययाशक्तितुष्टिसिद्धिभेदेन चतुर्विधः।

अर्थात्, सत्वरजस्तमसां गुणानां न्यूनाधिक्यात्प्रत्ययसर्गः पञ्चाशत्भेदवान्भवति, किन्तु मुख्यरूपेण सः चतुर्विधः एव (1) विपर्ययः (ii) अशक्तिः, (iii) तुष्टिः, (iv) सिद्धिश्च। तत्र विपर्ययो मिथ्याज्ञानम्, अतस्मिन् तद्बुद्धिः। पञ्चप्रकारकोऽयं विपर्ययः (1) तमः, (ii) मोहः, (iii) महामोहः, (iv) तामिस्रः, (v) अन्धतामिस्रश्च। करणवैकल्यहेतुका अशक्तिः अष्टाविंशतिधा भवति। यथा आन्ध्य- वाधिर्य- अजिघ्रत्व- मूकत्व- जडत्व- कुष्टित्व- पंगुत्च- कौण्या- क्लैब्य- उदावर्त- उन्माद (एकादशेन्द्रियवधरूपा) असुवर्णा- अज्ञानमलिना- मनोज्ञा- अदृष्टि- अपरा- सुपरा- असुनेत्रावसूनाडिका - अनुत्तमाम्भसिका (तुष्टिवधरूप) अप्रतार- असुतार - अतारतार - अरम्यकअसदामुदित- अप्रमोद- अमुदित- आमोदमानाः (सिद्धि-वधरूपाः)। तुष्टिर्नवधा प्रकृति-उपादान- काल- भाग्य- पार -सुपार- पारापार - अनुत्तमाम्भ –उत्तमाम्भरूपाः च। पुनश्च सिद्धिः अष्टविधाः अणिमा- महिमा- गरिमा- लधिमा - प्राप्ति - प्राकाम्य- वशित्व - ईशित्वरूपाः।

## Assignments

1. भावाःत्रिविधाः। के ?
2. सांख्यकारिकोक्तरीत्याप्रत्ययसर्गःनिरूपयत।
3. बन्धत्रैविध्यंलिखत।
4. उभयविधसर्गावश्यकत्वंविशदयत।
5. सिद्धिभेदाःके ?

## Suggested Readings


1. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4
2. Samkhyakarika with Gaudapadabhasyam, English translation by Dr. T.G Mainkar, Oriental Book Agency, Pune 1972.
3. संस्कृतसाहित्येतिहासः, आचार्यलोहमणिदाहलाः, चौखम्बाकृष्णदास् अकादमि वारणासि, 1998
4. सर्वदर्शनसंग्रहः, श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, चौखम्बाविद्याभवन्, वारणासि।


## References


1. संस्कृतमञ्जूषा - डा.उदयशंकरझा, चौखम्बासुरभारतीप्रकाशनवारणासि।
2. सांख्यतत्वकौमुदी - श्री.वाचस्पतिमिश्राचार्यः, Chowkhambasanskrit series office, Varanasi, 1971.
3. History of Indian Philosophy, Surendranath Das Guptha, Vol-III, MLBD, Varanasi
4. Indian Philosophy - Dr.S. Radhakrishnan, Vol- I & II, Varanasi, Delhi.
5. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal Banarsidass Publishers Private Limited, Delhi, 2000
6. Outlines of Indian Philosophy - Jadunath Sinha, New Central Book agency, Calcutta, 1992.

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# सांख्यमते संसारनिरूपणम्

## Learning Outcomes

- भौतिकसर्गान् जानाति।
- सर्गस्य दुःखहेतुमधिकृत्य ज्ञानं लभते।
- भौतिकसर्गस्यत्रैविध्यम्अवबुध्यते।

## Background

आकाश-वायु-तेज- जल- पृथिवीभ्यः सम्मिलितेभ्यः चराचरात्मकशरीराणि जायन्ते। तदेव भौतिकं सर्गमुच्यते। भौतिकसर्ग-कल्पनायाः हेतुरपि पुरुषार्थ एव। पुरषस्य भोगसिद्ध्यर्थं तस्यावश्यकत्वात्, यतः बुद्धेः भोग्यभूतस्य पञ्चतन्मात्रादि जातस्य तत्त्वस्य आवश्यकता भवत्येव। अतः पुरुषेण समं लिङ्गशरीरस्य स्थित्यैभूतसर्गस्य भौतिकशरीरस्य वा आवश्यकता अनिवार्यरूपेण अवलोक्यते। भौतिकसर्गोऽयं चराचरभेदेन द्विविधः भवति। पुनश्च चराचरात्मकः सर्गः जरायुज - अण्डज - स्वेदज - उद्भिज्जभेदेन चतुर्विधः। तत्र जरायुजं मनुष्यपश्वादि रूपम्, अण्डजं शकुनिसरीसृपादिकम्, स्वेदजानि यूकामषकादीनि, उद्भिज्जानिवृक्षादीनि च। तत्र अचरं स्थावरं पृथिव्यादिः मृत्पाषाणादिश्च। भौतिकसर्गानधिकृत्य विशदतया अस्मिन्नेकके वयं पठामः।

## Keywords

अष्टविकल्पः- भौतिकःसर्गः - सत्त्वविशालः - तमोविशालः - रजोविशालः -

ब्रह्मादिस्तम्बपर्यन्तः - जरामरणकृतं - दुःखस्यानुवृत्तेः।

## Discussion

भूतादिसर्गं विभजते

**अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।**

**मानुषकश्चैकविधा समासतो भौतिकः सर्गः।। ५३। ।**

**अर्थः** - देवयोनौ भवः सर्गः – ब्राह्मः प्राजापत्यः ऐन्द्रः पैत्रः गान्धर्वः याक्षोराक्षसः पैशाचः इत्यष्टविधः। तिर्यग्योनौ भवः - पशुः, मृगः, पक्षी, सरीसृपः, स्थावरः, इति पञ्चविधः। मानुषस्तु एकविधः एव। एव चतुर्दशविधः भौतिकः भूतादिरूपतन्मात्रकृतः सर्गः। ।५३। ।

ऊर्ध्वंसत्वप्रधानाः,
मध्येरजःप्रधानाः,
अन्तेतमःप्रधानाः

**ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।**

**मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः। ।५४।।**

**अर्थः**- तत्र ऊर्ध्वलोकानुबन्धी दैवसर्गः सत्त्वप्रचुरः। मूलरूपाधो लोकानुबन्धी तैर्यग्योनसर्गः तमोबहुलः। मध्यलोकानुबन्धी मनुष्यसर्गस्तु रजोबहुलः। एवं ब्रह्मादि स्तम्बपर्यन्तः सर्वोलोकः गुणत्रयव्याप्तः एव। ।५४। ।

प्राकृतगुणभूतदुःखादीनां पुरुषेण सह संबन्धदर्शनम्

**तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः।**

**लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन। ।५५। ।**

**अर्थः**- तत्र देहेन्द्रियादौ चैतन्यवान्पुरुषः जरामरणादिकृतं दुःखं स्वकीयसूक्ष्मशरीरनिवृत्तिपर्यन्तं स्वभावतः एव प्राप्नोति। तस्मात्सर्गः स्वतः एव दुःखरूपो विवेकिनाम्। ।५५। ।

## Summarised Overview

दैव-तिर्यक्-मानुषभेदेन भौतिकसर्गः त्रिविधः उच्यते। तत्र दैवसृष्टिः अष्टविधा, ब्राह्म-प्राजापत्य- ऐन्द्र- पैत्र- गान्धर्व- याक्ष- राक्षस- पैशाचभेदेन। मानुषसृष्टिस्तु एकविधा एव। तिर्यक्सृष्टिः पंचविधा, पशु- मृग- पक्षी- सरीसृपस्थावरभेदेन। अत्र पशुमृगयोः भेदं वर्तते, पशवः सखुराः चतुष्पदाः, मृगाः अखुराः विविध पदानि। इत्थमष्टविकल्पात्मकोऽयं भौतिकसर्गः। त्रिविधसर्गेषु अष्टविधाः वैवसृष्ट्यन्तर्भूताः ब्राह्मप्राजापत्यादयः सत्त्व-गुणप्राधान्यत्वात्भूलोकादुपर्युपरि सन्तिष्ठन्ते। तैर्यग्सृष्ट्यन्तर्भूताः पशुपक्षिस्थावरादयः भूलोकादधोगमनप्रवृत्तिशालिनः अधोऽधः निवासिनः वा भवन्ति। मानुष – सृष्टिगताः मानवाः रजोबाहुल्यात्तिर्यग्गमनप्रवृत्तिशालिनः प्रेरकाश्च भवन्ति।।

## Assignments

1. भौतिकसर्गं (भूतादिसर्गं) संक्षेपेण निरूपयत।
2. केषु केषु लोकेषु के के गुणाः भवन्ति ?
3. सर्गस्य दुःखहेतुत्वं विशदयत।

## Suggested Readings


1. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4
2. Samkhyakarika with Gaudapadabhasyam, English translation by Dr. T.G Mainkar, Oriental Book Agency, Pune 1972.
3. संस्कृतसाहित्येतिहासः, आचार्य लोहमणिदाहलाः, चौखम्बाकृष्णदास् अकादमि वारणासि, 1998
4. सर्वदर्शनसंग्रहः, श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, चौखम्बाविद्याभवन्, वारणासि।

## References


1. संस्कृतमञ्जूषा - डा.उदयशंकरझा, चौखम्बासुरभारतीप्रकाशनवाराणासि।
2. सांख्यतत्वकौमुदी - श्री.वाचस्पतिमिश्राचार्यः, Chowkhambasanskrit series office, Varanasi, 1971.
3. History of Indian Philosophy, Surendranath Das Guptha, Vol-III, MLBD, Varanasi
4. Indian Philosophy - Dr.S. Radhakrishnan, Vol- I & II, Varanasi, Delhi.
5. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal Banarsidass Publishers Private Limited, Delhi, 2000
6. Outlines of Indian Philosophy - Jadunath Sinha, New Central Book agency, Calcutta, 1992.


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# सांख्यमते कैवल्यस्य निरूपणम्

## Learning Outcomes

- कैवल्यम् अधिकृत्य ज्ञानं लभते।
- तत्वसाक्षात्काररूपं फलम् अवगम्यते।
- विवेकख्यातेः ज्ञानं लब्धुं शक्यते।

## Background

दर्शनानां मुख्यविषयेषु अन्यतमः तावत्परमपुरुषार्थः मोक्षः। मोक्षाय एव वस्तुतः समेषां दर्शनानां प्रवृत्तिः। सांख्यसिद्धान्ते अपि बन्धमोक्ष व्यवस्था आलोचिता। ननु सांख्यसिद्धान्ते पुरुषः हि असङ्गः निर्विकारः च। अतः स केन चित्कर्मणानलिप्यते, अतः तस्य कर्तृत्वम् अपि न सम्भवति। तेन च धर्माधर्मयोः उत्पत्तिः अपि न सम्भवति। धर्माधर्मयोः अभावे सुखदुःखयोः उत्पत्तिः न सम्भवति। दुःखस्य अनुत्पत्तौ दुःखसम्बन्धरूपः बन्धः, दुःखध्वंसरूपः मोक्षः च पुरुषेन सम्भवतः। अतः पुरुषस्य बन्धः मोक्षः वा नैव सङ्गच्छते सांख्यसिद्धान्ते इति चेत्बाढम्, यद्यपि शास्त्रे पुरुषस्य बन्धमोक्षौ इति उच्यते तथापि वस्तुतः बन्धमोक्षौ बुद्धावेव भवतः, पुरुषस्य पद्मपलाशवन्निर्लेपत्वात्। पुरुषे तु विद्यमानायां बुद्धौ बद्धत्वम्, अविद्यमानायां च तस्यां मुक्तत्वम् उपचर्यते। सृष्ट्यारम्भे सर्वतः प्रथमं बुद्धिरेव प्रकृतितः उत्पद्यते इति प्रकृतेः परिणामो बुद्धिः। बुद्धेरेव महत्तत्त्वम् अन्तःकरणं चेतिनामान्तरम्। सांख्यसिद्धान्ते बुद्धावेव सुखदुःखे तिष्ठतः। अस्या एव सुखदुःखयोश्छाया जीवात्म निपतति, तत एवात्मा सुखदुःखवान्प्रतीयते। इयमेव छायापुरुषस्य संसारः। यदा च प्रकृतिपुरुषयोः विवेक ज्ञानात्बुद्धेः नाशो भवति, तदा एव तदीय सुखदुःखयोः छायायाः अपि नाशो जायते इति आत्मा अपि शुद्धः अवशिष्यते। इदं प्रकृतिपुरुषविवेकज्ञानमेव विवेकख्यातिः सदसत्ख्यातिर्वा उच्यते। तत्त्वसाक्षात्कारे

विवेकख्यातौ वा सत्यां पुरुषः त्रिगुणात्मिकायाः प्रकृतेः बन्धनात्मुक्तो भवति, स तदानीं रङ्गमञ्चस्थदर्शकः इव तां प्रेक्षते, सा प्रकृतिरपि अस्मै करणीयं स्वं कार्यं न करोति। तदा पुरुषः आत्मनः शुद्धं स्वरूपं साक्षात्करोति। इयमेव अवस्थामोक्ष इति उच्यते। सांख्यशास्त्रे मोक्षस्य कैवल्यमिति संज्ञा।।

## Keywords

प्रतिपुरुषविमोक्षार्थं-वत्सविवृद्धि - औत्सुक्यनिवृत्तिः- नर्तकी - रङ्गस्य- अपार्थकम् - सुकुमारतरं-नानाश्रय- अद्धा - अपरिशेषम् - स्वच्छः - चक्रभ्रमिवत् - धृतशरीरः- कैवल्यम्- गुह्यम्।

## Discussion

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः। ।५६। ।

गुणवत्याः प्रकृतेः प्रत्युपकारं विनैव पुरुषोपकारः

अर्थः – इत्येषः महत्तत्वप्रभृति स्थूलभूतपर्यन्तः सर्गः प्रकृत्यैव कृतः। स च सर्गः परार्थः एकैक पुरुषविमोचनार्थः। परार्थमपीमं स्वार्थमि वमन्यमानेयं प्रकृतिः एवं सृष्टिं करोति। ।५६। ।

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य। ।५७।।

अर्थः – यथा अचेतनस्यापि क्षीरस्य वत्सपोषणकृते स्वयमेव प्रस्तावः, एवं अचेतनस्यापि प्रधानस्य स्वस्मात्पुरुषविमोक्षण कृते एव प्रवृत्तिरुपपद्यते। ।५७।।

पुरुषविमोक्षार्थं प्रधानस्य प्रवृत्तिः

**औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः।**

**पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्। ।५८। ।**

**अर्थः-** यथा खलु जनः इष्यमाणप्राप्त्या इच्छानिवृत्त्यर्थं तदनुगुणकर्मसु प्रवर्तते, तथैव पुरुषस्य विमोक्षार्थं प्रकृतिः प्रवर्तते। पुरुषमोक्ष एव प्रकृतेः स्वार्थतुल्यः इष्यमाणः इति। ।५८। ।

सृष्टिकारणविप्रतिपत्ति-निराकरणम्

**रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।**

**पुरुषस्य तथाऽऽत्मानं प्रकाश्य निवर्तते प्रकृतिः। ।५९।।**

**अर्थः-** यथा नर्तकी नाट्यशालास्थान्प्रेक्षकान्प्रति नृत्यं दर्शयित्वा नृत्यात् निवर्तते, तथैव प्रकृतिरपि पुरुषं प्रति स्वस्वरूपं दर्शयित्वा ततो निवृत्ता भवति एवं स्वाभाविकीयं अस्याः निवृत्तिः। ।५९। ।

विवेकख्यात्यनन्तरं प्रधाननिवृत्तिः

**नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः।**

**गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति। ।६०। ।**

**अर्थः-** सत्त्वादि गुणमयीप्रकृतिः उपकारासमर्थस्य गुणातीतस्य सतः पुरुषस्य स्वीयप्रयोजनचिन्तां विनैव नानाविधैरुपायैः उपकारिणी सती तत्भवबन्धविमोक्षरूपं कार्यम् आचरति। ।६०।।

निर्गुणपुरुषमोक्ष-संसाराद्यसंभवत्वशङ्का

**प्रकृतेः सुकुमारतरं नकिञ्चिदस्तीति मे मतिर्भवति।**

**या दृष्टाऽस्मीति पुनर्नदर्शनमुपैति पुरुषस्य। ।६१। ।**

**अर्थः** – प्रकृतेरप्यतिसुकुमारं – सलज्जं किञ्चिदप्यन्यत् वस्तु नास्तीत्येव मे मतिर्भवति। यतः याऽसौ प्रकृतिः विवेकपूर्वकं

पुरुषेणाहंसाक्षात्कृतेति यदा विजानाति, तत्प्रभृति पुनः पुरुषस्य नैव गोचरी भवति। ।६१।।

प्रकृत्याधर्मादि सप्तरूपैः बन्धनमेकरूपेण तत्वज्ञान रूपेण च मोक्षणम्

**तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्।**

**संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः। ।६२। ।**

**अर्थः** – यतः पुरुषोऽसौ अगुणः अपरिणमि च, अत एव कश्चिदपि पुरुषः अद्धा- वस्तुतः साक्षान्न बद्धो भवति, न संसरति – धर्मादिनिमित्तं प्रेत्यभावापरनामानं परलोकादि-गमनरूपं संसारं नाप्नोति, नापि मुक्तो भवति।

"ननिरोधो न चोत्पत्तिः न बद्धो न चसाधकः।

न मुमक्षुः नवै मुक्तः इत्येषा परमार्थता" इति।।

तथा च – प्रकृतिरेव नाना पुरुषाश्रया सती बद्धा, संसरति मुक्ता च भवति। ततश्च - पुरुषोऽयं चैतन्यमात्रवपुः कूटस्थो नित्यमुक्तः एव। सांसारिक सुखदुःखानुभवरूपो भोगस्तु परिणामिन्याः बुद्धेरेव धर्मः। तादृश बुद्धिछायापत्त्या तदैक्यमिवापन्नस्य पुरुषस्य तद्दर्शनमात्रमेव भोगः। तेन तस्य विवेकाग्रहात् आध्यासिकं भोक्तृत्वम्। विवेकख्यात्या भोक्तृत्वाध्यासमात्र निवृत्तिरेव मोक्षः इति सिद्धम्। ।६२।।

**रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।**

**सैव च पुरुषार्थं प्रतिविमोचयत्येकरूपेण। ।६३। ।**

**अर्थः** –प्रकृतिः धर्माधर्मत्वपरिचयं चर्यवैराग्यावैराग्याज्ञानरूपैः सप्तभिर्भावैः आत्मना बुद्धिरूपेण आत्मानं वरणाति। सैव च प्रकृतिः पुरुषाय स्वरूपावर्थान लक्षणं पुरुषार्थमुद्दिश्य केवलं

ज्ञानाख्येनैकेन भावेन विमोचयत्तिपुनर्भोगापवर्गौ अकृत्या संसारान्निवर्तयति। ।६३।

तत्त्वज्ञानस्वरूप प्रदर्शनम्

**एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**

**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्। ।६४। ।**

**अर्थः** – इत्थं तत्त्वविषयज्ञानाभ्यासात्संशय भ्रमादिरहित तया प्रमात्मकं मिथ्याज्ञानासंस्पृष्टं सम्पूर्णम् 'अक्रियोऽहम् अकर्ताऽहम्, किञ्चित्प्रत्यपि स्वामिता मयि नास्ति' इत्येवं रूपं परिशुद्धं ज्ञानमुत्पद्यते। ।६४। ।

एकविषयमपेक्ष्य निवृत्ताय अपि प्रकृतेर्विषयान्तरं प्रति प्रवृत्ति शङ्का

**तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।**

**प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वच्छः। ।६५।।**

**अर्थः** – तेन च विशुद्धतत्त्वाज्ञानेन सम्पादनीयकार्यशेषशून्याम्, विवेकज्ञानसामर्थ्यात् धर्मादिभावसप्तकान्निवृत्तां प्रकृतिम्, पुरुषः प्रेक्षकवद्वर्तमानः उदासीनः स्वस्थः रजस्तमोवृत्तिकलुषयाबुद्ध्या अमिश्रितश्च सन्पश्यति।।६५। ।

शरीरनाशे ऐकान्तिक-आत्यन्तिकनिवृत्तिः

**दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्युपरमत्यन्या।**

**सति संयोगेऽपितयोः प्रयोजनं नास्ति सर्गस्य। ।६६। ।**

**अर्थः** - 'प्रकृतिरीदृशीमया दृष्टा' इति निश्चित्यतां उपेक्षते, न पुनः द्रष्टुमिच्छति। प्रकृतिश्च 'पुरुषेणाहमेवं दृष्टा इति निश्चित्य विरमति न पुनस्तं स्प्रष्टुं यतते। एवमुभयोरप्युदासीनत्वात्तयोः प्रकृतिपुरुषयोः संयोगेऽपि इतः परं तस्याः सृष्टेः प्रयोजनं न विद्यते। ।६६। ।

**सम्यग्ज्ञानाधिगमात् धर्मादीनामकारणप्राप्तौ।**

**तिष्ठति संस्कारवशात् चक्रभ्रमिवद्धृतशरीरः। ।६७।।**

अर्थः – विशुद्धतत्वज्ञानोदयेन धर्माधर्मादीनामस्मिन् स्वकीयफलदानसामर्थ्ये कुण्ठिते देहारम्भकादृष्टवशात् अयं जीवन्मुक्तः वेगवशात् किञ्चित्कालानुवृत्तचक्रभ्रमणन्यायेन कालविशेषपर्यन्तं धृतशरीरस्सन्तिष्ठति। ।६७। ।

**प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तेः।**
**ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति। ।६८। ।**

सांख्यशास्त्रस्य परमर्षिप्रणीतत्वम्

अर्थः – प्रारब्धकर्मशेषानुभवेन कर्मानुगुणोत्पन्नशरीरनाशे जाते कृतार्थत्वात्प्रकृतिविनिवृत्तौ, पुरुषः अवश्यम् आत्यन्तिकदुःखनिवृत्तिः प्राप्नोति। ।६८। ।

**पुरुषार्थज्ञानमिदं परमर्षिणा समाख्यातम्।**
**स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्। ६९। ।**

अर्थः – यत्र शास्त्रे सकलभूतानामपि सृष्टिस्थितिलयाः आविर्भावावस्थानतिरोभावाः एवं विचार्यन्ते, तादृशम् इयं गुह्यं साधारणबुद्धीनाम् असंस्कारिणां दुर्ज्ञेयं, मोक्षरूप परमपुरुषार्थज्ञानहेतुभूतं सांख्यशास्त्रं परमर्षिणा श्रीमता कपिलेन कथितम्।।६९।।

**७० आरभ्य ७२ श्लोकपर्यन्तं आचार्यपरम्परा प्रदर्शिता -**

सांख्यशास्त्रस्य गुरुशिष्यपरम्परा कपिलात् आरभ्य पञ्चशिखपर्यन्तम्

**एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।**
**आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम्। ।७०। ।**

अर्थः –एतच्च बुद्धेः पवित्रतासम्पादकम् उत्तमं सांख्यतत्त्वं कपिलो मुनिः आसुरिनाम्ने शिष्याय उपदिदेश। स च पञ्चशिखाख्य शिष्यायोपदिदेश। तेन चैतत्शास्त्रं शिष्यप्रशिष्यादिभ्यः उपदेशादि द्वारा बहुधा विस्तृतं कृतम्। ।

**शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः।**

**संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम्। ।७१। ।**

ईश्वरकृष्णस्य गुरुशिष्य परम्परा

**अर्थः** - ततश्चेत्थमेव शिष्यपरम्पस्या अनुवर्तितम् एतत्सांख्यशास्त्रम् आर्यमतिना ईश्वरकृष्णेन अध्ययनभावनाभ्यां सम्यक्सिद्धान्तज्ञानार्जनपूर्वकं विज्ञाय आर्याख्यछन्दबन्धैः पद्यैः संगृह्यनिरूपितम्। ।७१। ।

**सप्तत्यां किलयेऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य।**

**आख्यायिकाविरहिताः परवादविवर्जिताश्चापि। ।७२। ।**

सप्ततिकारिकाणां शास्त्रत्वम्

**अर्थः**- अस्यां कारिकासप्तत्यां कथा तदनुगुणदृष्टान्तादिरहिताः मतान्तरानुवादादि विरहिताश्चये अर्थाः कथिताः, ते सम्पूर्णस्य प्रकृत्यादिषष्टिपदार्थव्युत्पादकस्य षष्टितन्त्राख्यसाङ्ख्यशास्त्रस्य एवार्थाः इति ज्ञेयम्। ।७२।।

## Summarised Overview

कैवल्यं च आध्यात्मिकाधिदैविकाधिभौतिकदुःखत्रयस्य ऐकान्तिकी आत्यन्तिकी निवृत्तिरेव मोक्षः। इयं दुःखनिवृत्तिः विवेकज्ञानाद् एव भवति। सा च सांख्यतत्वाभ्यासेन जातेन प्रकृतिपुरुषविवेकज्ञानेन एव भवति। अतः प्रकृतिपुरुषख्यातिः एव अत्र मोक्षसाधनम्। प्रकृतिपुरुषतादात्म्येन नित्यमुक्तोऽपि पुरुषः बद्धः इव भाति। परिणामैः प्रकृतिः पुरुषं बद्धः इव प्रतिभाति। सा च विवेकज्ञानाय उपकरोति च। प्रकृतेः परिणामः पुरुषस्य मोक्षाय भवतीत्युक्तम्। पुरुषस्यस्वरूपस्याज्ञानं बन्धनं जीवस्यैव भवति, न तु शुद्धपुरुषस्य, पुरुषस्यस्वरूपं विशुद्धचैतन्यमस्ति स च नित्यः मुक्तश्च, परिणामातीतः बन्धनमोक्षरहितश्च। स च स्वबुद्धौप्रकाशितेन प्रतिबिम्बेन सहतादात्म्यं करोति। तादात्म्याभासत्वात्बुद्धिगुणयुक्तत्वात् अन्तःकरणात्पृथक्चैतन्यरूपेण जीवरूपेण भासते इति भ्रमात्मकप्रतीत्याजीवस्य बन्धनं भवति। बुद्धेः अष्टौभावाः सन्ति। धर्मज्ञानवैराग्यैश्वर्याणि सात्त्विकाः भावाः, अधर्माज्ञानावैराग्यानैश्वर्याणि तामसिकाः भावाः भवन्ति। धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्येभ्यः पुरुषस्य बन्धो जायते, ज्ञानेनैव चापवर्गो भवति।

मोक्षस्य प्रकारः – बौद्धवेदान्तदार्शनिका यथा मोक्षः द्विविधो वर्तत इति स्वीकुर्वन्ति तथैव सांख्याः अपि स्वीकुर्वन्ति – जीवन्मुक्तिः विदेहमुक्तिश्चेति भेदात्। यदा पञ्चविंशतितत्त्वानां विवेकाज्ञानं जायते पूर्वजन्मकृतकर्मणा शरीरस्य स्थितिर्भवति तदा स च योगी जीवन्मुक्तो भवति। यथा घटस्य निर्माणे कुलालः चक्रं दण्डेन चालयति। दण्डस्य चक्रात्पृथक्करणे किञ्चित्कालपर्यन्तं चक्रं भ्रमीवशात्भ्रमति तथैव जीवन्मुक्तत्वे अपि अनेक जन्मसंस्कारात्पुरुषः शरीरेणसम्बद्धः शरीरमाध्यमेन सुखदुःखादीनामुपभोगं करोति स च पुरुषः जीवन्मुक्तः। प्रारब्धकर्मणां समाप्त्यनन्तरं पुरुषस्य शरीरेण सहसम्बन्धाभावो भवति स च सम्बन्धाभावः अनन्तः अस्ति। अतः तस्याः अवस्थायाः अपरं नाम विदेहमुक्तिः इति॥

## Assignments

1. सांख्यकारिकोक्तदिशामोक्षस्वरूपं (अपवर्गः) निरूपयत।
2. स्वार्थइवपरार्थआरम्भः - कारिकोक्तदिशाविशदयत।
3. किमर्थंप्रधानस्यप्रवृत्तिःइतिविशदयत।
4. तत्वज्ञानस्वरूपं, फलंचके?

## Suggested Readings


1. Samkhyakarika with Tattvakaumudi and notes in English by Swami Virupakshananda, Sri Ramakrishna Matt, Chennai -4
2. Samkhyakarika with Gaudapadabhasyam, English translation by Dr. T.G Mainkar, Oriental Book Agency, Pune 1972.
3. संस्कृतसाहित्येतिहासः, आचार्य लोहमणिदाहलाः, चौखम्बाकृष्णदास् अकादमि वारणासि, 1998
4. सर्वदर्शनसंग्रहः, श्रीसायणमाधवाचार्यप्रणीतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, चौखम्बाविद्याभवन्, वारणासि।

## References


1. संस्कृतमञ्जूषा - डा.उदयशंकरझा, चौखम्बासुरभारतीप्रकाशनवाराणासि।
2. सांख्यतत्वकौमुदी - श्री.वाचस्पतिमिश्राचार्यः, Chowkhambasanskrit series office, Varanasi, 1971.
3. History of Indian Philosophy, Surendranath Das Guptha, Vol-III, MLBD, Varanasi
4. Indian Philosophy - Dr.S. Radhakrishnan, Vol- I & II, Varanasi, Delhi.
5. A Critical Survey of Indian Philosophy -Chapter XI, Chandradhar Sharma, Motilal Banarsidass Publishers Private Limited, Delhi, 2000
6. Outlines of Indian Philosophy - Jadunath Sinha, New Central Book agency, Calcutta, 1992.


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# योगदर्शनम्

# BLOCK 4

SGOU

UNIT 1

# योगसूत्रे प्रथमोऽध्यायः १-३२ सूत्राणि

## Learning Outcomes

- योगदर्शनस्य परिचयं प्राप्नोति।
- योगपदार्थम् अवगच्छति।
- पञ्चचित्तवृत्तीनां ज्ञानं लभते।
- ईश्वरस्वरूपम् जानाति।

## Background

भारतीयास्तिकदर्शनेषु प्रसिद्धं पतञ्जलिमुनिप्रणीतं योगदर्शनम्। योगशास्त्रं चिकित्साशास्त्रवत् चतुर्व्यूहम्। यथा चिकित्साशास्त्रे रोगः, रोगहेतुः, आरोग्यं, भैषज्यम् इति चत्वारो व्यूहाः प्रतिपाद्यन्ते तथा योगशास्त्रेऽपि संसारः, संसारहेतुः, मोक्षः, मोक्षहेतुश्चेति व्यूहचतुष्टयम्। समाध्यर्थकात् 'युज्' धातोः निष्पन्नोऽयं योगशब्दः व्युत्पत्तिलभ्यं समाधिमेव अभिधत्ते।

पतञ्जलिमुनिः योगदर्शनस्य प्रथमः आचार्यः। तेन विरचितं योगसूत्रं दर्शनस्यास्य प्रामाणिकोग्रन्थः। तस्य समाधिपादः, साधनपादः, विभूतिपादः, कैवल्यपादश्चेति चत्वारो अध्यायाः। प्रथमपादे 'अथ योगानुशासनम्' इति शास्त्रारम्भं कृत्वा योगलक्षणं, योगस्वरूपं, समाधिस्वरूपं च प्रतिपादितम्। समाधिपादस्य वर्णनामध्ययनेन योगस्य विशेषतासु प्रकाशपरकं वर्णनमकरोत्। ईश्वरोजीवः प्रकृतिश्चेति तत्त्वत्रयवादः भवति योगदर्शनस्य। ईश्वरतत्त्वस्य स्वीकारात्सेश्वरसांख्यमित्यपि आख्यायते दर्शनमिदम्। सर्वेषु दर्शनप्रस्थानेषु योगदर्शनमेव प्राचीनतममिति केचन प्रतिपादयन्ति। एतादृशस्य योगशास्त्रस्य अध्ययनं विना इतर दर्शनानां हृदयं नैव अवगन्तुं शक्यते। उपनिषत्स्वपि योगस्य गुरुत्वम्

असकृत्प्रतिपादितम्। उच्यते च मोक्ष धर्मे - 'नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्' इति। अस्मिन्पाठे योगदर्शनस्य मूलतत्त्वानि आलोच्यन्ते।

## Keywords

वृत्तयः - क्लिष्टा अक्लिष्टा - प्रमाण - विपर्यय - विकल्प - निद्रा - स्मृतयः - अभ्यासः - वैराग्यं - संप्रज्ञातः- समाधिलाभः - समाधिफलं - ईश्वरः - प्रणवः - चित्तविक्षेपाः।

## Discussion

### प्रथमोऽध्यायः समाधिपादः

शास्त्रस्यारम्भ एव स्वाभाविकः प्रश्नः समुदेति यन्मूलतः किन्नामास्ति योगः ?

**अथ योगानुशासनम्॥१॥**

योगशास्त्रस्य आरम्भः

**व्यासभाष्यम्** - अथेत्ययमधिकारार्थः। योगानुशासनं शास्त्रमधिकृतं वेदितव्यम्। योगःसमाधिः। स च सार्वभौमश्चित्तस्य धर्मः। क्षिप्तं, मूढं, विक्षिप्तमेकाग्रं, निरुद्धमिति चित्तभूमयः। तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते। यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान्कर्म बन्धनानि श्लथयति, निरोधमभिमुखं करोति ससं प्रज्ञातो योग इत्याख्यायते। स च वितर्कानुगतो, विचारानुगत, आनन्दानुगतोऽस्मितानुगत इत्युपरिष्टात्प्रवेदयिष्यामः। सर्ववृत्तिनिरोधे त्वसंप्रज्ञातः समाधिः॥१॥

**सूत्रार्थः** - 'अथ योगानुशासनम्' इत्येतत्पातञ्जलयोगसूत्रस्य प्रथमस्य समाधिपादस्य प्रथमं सूत्रं विद्यते। सूत्रस्यास्य

विषयः अधिकारस्थापनमस्ति। अनेन सूत्रेण शास्त्रस्य सम्बन्धाभिधेयप्रयोजनान्याख्यायन्ते। अथ शब्दोऽधिकारद्योतको मङ्गलार्थकश्च। इदानीं क्रियते योगशास्त्रस्य प्रारम्भः। किमस्ति योग? योगोयुक्तिः समाधानम्। युज्समाधौ अनुशिष्यते व्याख्यायते लक्षणभेदोपायफलैर्येन तदनुशासनम्। योगस्यानुशासनं योगानुशासनम्। तदा शास्त्रपरिसमाप्तेरधिकृतं बोद्धव्यमित्यर्थः। तत्र शास्त्रस्य व्युत्पाद्यतया योगः ससाधनः सफलोऽभिधेयः। तद्व्युत्पादनश्च फलम्। व्युत्पादितस्य योगस्य कैवल्यं फलम्। लक्षणशास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकभावसम्बन्धः। अभिधेयस्य योगस्य तत्फलस्य च कैवल्यस्य साध्यसाधनभावः। एतदुक्तं भवति – व्युत्पाद्यस्य योगस्य साधनानि शास्त्रेण प्रदर्श्यन्ते, तत्साधनसिद्धो योगः कैवल्याख्यं फलमुत्पादयति। ।१। ।

**योगश्चित्तवृत्तिनिरोधः। ।२।।**

योगस्य लक्षणं / स्वरूपं वर्णयति

**व्या०भा०-** सर्वशब्दाग्रहणात्संप्रज्ञातोऽपि योग इत्याख्यायते। चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्। प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टमैश्वर्यविषयप्रियं भवति। तदेव तमसानुविद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति। तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति।

तदेव रजो लेशमलापेतं स्वरूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगं भवति। तत्परं प्रसंख्यानमित्या च क्षतेध्यायिनः। चितिशक्तिरपरिणामिन्य प्रति संक्रमादर्शितविषयाशुद्धा चानन्ता च, सत्त्वगुणात्मिका चेयमतोविपरीता

विवेकख्यातिरिति। अतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि। तदवस्थं संस्कारोपगं भवति। स निर्बीजः समाधिः। न तत्र किञ्चित्संप्रज्ञायत इत्यसंप्रज्ञातः। द्विविधः स योगश्चित्तवृत्तिनिरोध इति। ।२।।

चित्तपदं व्याचष्टे

**सूत्रार्थः-** चित्तस्य निर्मलसत्त्वपरिणामरूपस्य या वृत्तयोऽङ्गाङ्गिभावपरिणामरूपाः तासां निरोधो बहिर्मुखपरिणतिविच्छेदादन्तर्मुखतया प्रतिलोमपरिणामेन स्वकारणे चित्तेलयो योग इत्याख्यायते। स च निरोधः सर्वासां चित्तभूमीनां सर्वप्राणिनां धर्मः कदाचित्कस्याञ्चित्भूमौ आविर्भवति। ताश्च - क्षिप्तं, मूढं, विक्षिप्तम्, एकाग्रम्, निरुद्धमिति चित्तस्य भूमयः, चित्तस्यावस्थाविशेषाः। तत्र क्षिप्तं रजस उद्रेकादस्थिरं बहिर्मुखतया कल्पितेषु सुखदुःखादिविषयेषु व्यवहितेषु सन्निहितेषु वा रजसा प्रेरितम्, तच्च सदैव दैत्यदानवादीनाम्। मूढं तपस उद्रेकात्कृत्याकृत्यविभागम् अन्तरेण क्रोधादिभिः विरुद्ध कृत्येष्वेव नियमितम्, तच्च स दैवरक्षः पिशाचादीनाम्। विक्षिप्तं तु सत्त्वोद्रेकात्वैशिष्ट्येन परिहृत्य दुःखसाधनं सुखसाधनेष्वेव शब्दादिषु प्रवृत्तम्, तच्च स दैवदेवानाम्। एतदुक्तं भवति – रजसा प्रवृत्तिरूपम्, तमसा परापकारनियतं, सत्त्वेन सुखमयं चित्तं भवति। एताः तिस्रश्चित्तावस्थाः न समाधावुपयोगिन्यः। एकाग्र-निरुद्धरूपे द्वे च सत्त्वोत्कर्षाद्यथोत्तरमवस्थितत्वात्समाधावुपयोगं भजेते सत्त्वादिक्रमव्युत्क्रमे त्वयमभिप्रायः- द्वयोरपि रजस्तमसोरत्यन्तहेयत्वेऽप्येतदर्थं रजसः प्रथममुपपादनम्, यावन्न प्रवृत्तिर्दर्शितातावन्निवृत्तिर्नशक्यते दर्शयितुमिति द्वयोर्व्यत्य येनप्रदर्शनम्। सत्त्वस्य त्वेतदर्थं पश्चात्प्रदर्शनं यत्,

तस्योत्कर्षेणोत्तरे द्वे भूमीयोगोपयोगिन्याविति। अनयोर्द्वयोरेकाग्र-निरुद्धयोर्भूम्योर्यश्चित्तस्यैकाग्रतारूपः परिणामः, स योग इत्युक्तं भवति। एकाग्रे बहिर्वृत्तिनिरोधः, निरुद्धे च सर्वासां वृत्तीनां संस्काराणां च प्रविलय इत्यनयोरेव भूम्योर्योगस्य संभवः। ।२। ।

**तदा द्रष्टुः स्वरूपेऽवस्थानम्॥ ३॥**

**व्या०भा०** – स्वरूपप्रतिष्ठातदानीं चितिशक्तिर्यथा कैवल्ये॥ ३॥

चाञ्चल्यदशायां तु जीवस्य किं रूपमित्याह

**सूत्रार्थः** – द्रष्टुः पुरुषस्य तस्मिन्काले स्वरूपे चिन्मात्रतायामवस्थानं स्थितिर्भवति। अयमर्थः उत्पन्नविवेकख्यातेः चित्सङ्क्रमाभावात्कर्तृत्वाभिमान निवृत्तौ प्रोन्मुक्तपरिणामायां बुद्धावात्मनः स्वरूपेणावस्थानं स्थितिर्भवति। ।३। ।

**वृत्तिसारूप्यमितरत्र। ।४। ।**

**व्या०भा०** – व्युत्थाने याश्चित्तवृत्तयस्तदविशिष्टवृत्तिः पुरुषः। तथा च सूत्रम् 'एकमेव दर्शनं, ख्यातिरेव दर्शनम्' इति। चित्तमयस्कान्तमणिकल्पं संनिधिमात्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनः। तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिः संबन्धो हेतुः॥ ४॥

वृत्तिपदं व्याख्यातुमाह

**सूत्रार्थः** – इतरत्र योगादन्यस्मिन्काले, वृत्तयो यावक्ष्यमाणलक्षणाः, ताभिः सारूप्यं तद्रूपत्वम्। अयमर्थः यादृश्यो वृत्तयः सुखदुःखमोहात्मिकाः प्रादुर्भवन्ति, तादृग्रूप एव संवेद्यते व्यवहर्तृभिः पुरुषः। (तदेवं यस्मिन् एकाग्रतया परिणते यस्मिन्वस्तुनि चितिशक्तेः स्वस्मिन्रूपे प्रतिष्ठानं

भवति, यस्मिश्च इन्द्रियवृत्तिद्वारेण विषयाकारेण परिणते पुरुषस्तद्रूपाकार इव परिभाव्यते, यथा जलतरङ्गेषु चलत्सु चन्द्रश्चलन्निव प्रतिभासते, तच्चित्तम्। ।४। ।

**वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः॥५॥**

**व्या०भा०-** क्लेश हेतुकाः कर्माशय प्रचय क्षेत्रीभूताः क्लिष्टाः। ख्याति विषयागुणाधिकार विरोधिन्योऽक्लिष्टाः। क्लिष्ट प्रवाहपतिता अप्यक्लिष्टाः। क्लिष्टच्छिद्रेष्वप्यक्लिष्टा भवन्ति, अक्लिष्टच्छिद्रेषुक्लिष्टाःइति। तथा जातीयकाः संस्कारावृत्तिभिरेव क्रियन्ते संस्कारैश्च वृत्तय इति। एवं वृत्ति संस्कारचक्रमनिशमावर्तते। तदेवं भूतं चित्तमवसिताधिकारमात्मकल्पेन व्यवतिष्ठते प्रलयं वा गच्छतीति॥५॥

वृत्तयः संक्षिप्य प्रतिपाद्यन्ते

**सूत्रार्थः-** वृत्तयश्चित्तपरिणामविशेषाः। वृत्तिसमुदाय-लक्षणस्य अवयविनो या अवयव भूतावृत्तयः, तदपेक्षया तयप्-प्रत्ययः (अष्टा०५।२।४२)। एतदुक्तं भवति पञ्चवृत्तयः कीदृश्यः ? क्लिष्टाः अक्लिष्टाः, क्लेशैर्वक्ष्यमाण-लक्षणैराक्रान्ताः क्लिष्टाः, तद्विपरीता अक्लिष्टाः। ।५। ।

**प्रमाण- विपर्यय- विकल्प- निद्रा- स्मृतयः॥६॥ प्रत्यक्षानुमानागमाः प्रमाणानि॥७॥**

**व्या०भा०** – इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात्तद्विषयासामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधानावृत्तिः प्रत्यक्षं प्रमाणम्। फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः। बुद्धेः प्रतिसंवेदीपुरुष इत्युपरिष्टयदुपपादयिष्यामः। अनुमेयस्य तुल्यजातीयेषु

अनुवृत्तो भिन्नजातीयेभ्यो व्यावृत्तः संबन्धो यस्तद्विषयासामान्यावधारणप्रधाना वृत्तिरनुमानम्। यथा देशान्तरप्राप्तेर्गतिमच्चन्द्रतारकं चैत्रवत्, विन्ध्यश्चा प्राप्तिरगतिः। आप्तेनदृष्टोऽनुमितोवार्थः परत्र स्वबोधसंक्रान्तये शब्देनोपदिश्यते, शब्दात्तदर्थविषयावृत्तिः श्रोतुरागमः। यस्याश्रद्धेयार्थो- वक्तानदृष्टानुमितार्थः स आगमः प्लवते, मूलवक्तरि तु दृष्टानुमितार्थे निर्विप्लवः स्यात्॥७॥

**सूत्रार्थः-** अत्रापि प्रसिद्धत्वात्प्रमाणानां शास्त्रकारेण भेदनिरूपणेनैवागतत्वाल्लक्षणस्य पृथक्तल्लक्षणं न कृतम्। प्रमाणलक्षणन्तु अविसंवादिज्ञानं तत्करणं प्रमाणमिति। इन्द्रियद्वारेण बाह्यवस्तुपरागाच्चित्तस्य तद्विषयसामान्य-विशेषात्मनोऽर्थस्य विशेषावधारण प्रधानावृत्तिः प्रत्यक्षम्। गृहीतसम्बन्धाल्लिङ्गात्लिङ्गिनि सामान्याध्यवसायोऽनु-मानम्। आप्तवचनम् आगमः। ।७। ।

**विपर्य्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्॥८॥**

विपर्य्ययरूपामाह

व्या०भा० – स कस्मान्न प्रमाणम् ? यतः प्रमाणेन बाध्यते। भूतार्थ विषयत्वात्प्रमाणस्य। तत्र प्रमाणेन बाधनमप्रमाणस्य दृष्टम्। तद्यथा द्वि चन्द्रदर्शनं सद्विषयेणैक चन्द्रदर्शने न बाध्यत इति। सेयं पञ्च पर्वा भवत्यविद्या, अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा इति। एत एवस्व संज्ञाभिस्तमोमोहोमहामोहस्तामिस्रोऽन्धतामिस्र इति, एते चित्तमलप्रसङ्गेनाभिधास्यन्ते॥८॥

**सूत्रार्थः** - अतथाभूतेऽर्थे तथोत्पद्यमानं ज्ञानं विपर्य्ययः। यथा शुक्तिकायां रजत- ज्ञानम्। अतद्रूपप्रतिष्ठमिति। तस्यार्थस्य

यद्रूपं तस्मिन्नूपेन प्रतिष्ठति, तस्यार्थस्य यत्पारमार्थिकं रूपं न तद्भासयतीति यावत्। संशयोऽप्य- तद्रूपप्रतिष्ठितत्वात् मिथ्याज्ञानं, यथास्थाणुर्वा पुरुषोवेति॥८॥

**शब्दज्ञानानुपातीवस्तुशून्यो विकल्पः॥९॥**

विकल्पवृत्तिः

**व्या०भा०-** स न प्रमाणोपारोही, न विपर्ययोपारोही च। वस्तुशून्यत्वेपि शब्दज्ञानमाहात्म्यनिबन्धनोव्यवहारो दृश्यते। तद्यथा चैतन्यं पुरुषस्य स्वरूपमिति। यदा चितिरेव पुरुषस्तदा किमत्र केन व्यपदिश्यते, भवति च व्यपदेशे वृत्तिः। यथा चैत्रस्य गौरिति। तथा प्रतिषिद्धवस्तु-धर्मानिष्क्रियः पुरुषः, तिष्ठति बाणः स्थास्यति स्थित इति। गतिनिवृत्तौ धात्वर्थमात्रं गम्यते। तथानुत्पत्ति धर्मापुरुष इति उत्पत्ति धर्मस्याभावमात्रमवगम्यते न पुरुषान्वयी धर्मः। तस्माद्विकल्पितः स धर्मस्तेन चास्ति व्यवहार इति॥९॥

**सूत्रार्थः-** शब्दजनितं ज्ञानं शब्दज्ञानं, तदनुपतितुं शीलं यस्य सः शब्दज्ञानानुपाती। वस्तुनस्तथात्वमनपेक्षमाणोऽय-मध्यवसायः सविकल्प इत्युच्यते। यथा पुरुषस्य चैतन्यं स्वरूपमिति। वस्तुतस्तु चैतन्यमेव पुरुषः॥९॥

**अभावप्रत्ययालम्बना वृत्तिर्निद्रा। ।१०। ।**

निद्रां व्याख्यातुमाह

**व्या०भा०-** सा च संप्रबोधे प्रत्यवमर्शात्प्रत्ययविशेषः। कथम्, सुखमहमस्वाप्सम्प्रसन्नं मे मनः प्रज्ञां मे विशारदी करोति। दुःखमहमस्वाप्संस्त्यानं मे मनो भ्रमत्यनवस्थितम्। गाढं मूढोऽहमस्वाप्सम्गुरुणि मे गात्राणि क्लान्तं मे चित्तम् अलसं मुषितमिव तिष्ठतीति। स खल्वयं प्रबुद्धस्य प्रत्यवमर्शोनस्यादसतिप्रत्ययानुभवे। तदाश्रिताः स्मृतयश्च

तद्विषया न स्युः। तस्मात्प्रत्ययविशेषो निद्रा। सा च समाधावितरप्रत्ययवन्निरोद्धव्येति॥१०॥

**सूत्रार्थः-** अभावप्रत्यय आलम्बनं यस्याः सा तथोक्ता। एतदुक्तं भवति-या सन्ततमुद्रिक्तत्वात्तमसः समस्तविषयपरित्यागेन प्रवर्त्तते वृत्तिः सा निद्रा। तस्याश्च 'सुखमहमस्वाप्सम्' इति स्मृतिदर्शनात् स्मृतेश्चानुभवव्यतिरेकेणा अनुपपत्तेर्वृत्तित्वम्।।१०।।

**अनुभूतविषयासम्प्रमोषः स्मृतिः।।११॥**

स्मृतिः

**व्या०भा०-** किं प्रत्ययस्य चित्तं स्मरति आहोस्विद्विषयस्येति? ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासस्तज्जातीयकं संस्कारमारभते। ससंस्कारः स्वव्यञ्जकाञ्जनस्तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति।

तत्र ग्रहणाकारपूर्वाबुद्धिः। ग्राह्याकारपूर्वास्मृतिः। सा च द्वयीभावितस्मर्तव्या चाभावितस्मर्तव्या च। स्वप्ने भावितस्मर्तव्या। जाग्रत्समयेत्वभावितस्मर्तव्येति। सर्वाश्चैताः स्मृतयः प्रमाणविपर्ययविकल्पनिद्रास्मृति नामनुभवात्प्रभवन्ति। सर्वाश्चैतावृत्तयः सुखदुःखमोहात्मिकाः। सुखदुःखमोहाश्च क्लेशेषु व्याख्येयाः। सुखानुशयी रागः, दुःखानुशयी द्वेषः, मोहः पुनरविद्येति। एताः सर्वावृत्तयोनिरोद्धव्याः। आसां निरोधे संप्रज्ञातो वा समाधिर्भवत्यसंप्रज्ञातो वेति। ११।

**सूत्रार्थः-** प्रमाणेनानुभूतस्य विषयस्य योऽयमसम्प्रमोषः संस्कारद्वारेण बुद्धावुपारोहः, सा स्मृतिः। तत्र प्रमाण-विपर्य्यय-विकल्पा जाग्रदवस्थाः। त एव यदाऽनुभव

बलात्प्रत्यक्षायमाणास्तदा स्वप्नाः। निद्रा तु असंवेद्यमानविषया। स्मृतिश्च प्रमाणविकल्पनिद्रा निमित्ता। ।११।।

**अभ्यास- वैराग्याभ्यां तन्निरोधः ॥१२॥**

**व्या०भा०-** चित्तन दीनामोभयतो वाहिनी वहति कल्याणाय, वहति पापाय च। या तु कैवल्यप्राग्भाराविवेक विषयनिम्ना सा कल्याणवहा। संसार प्राग्भाराऽविवेकविषयनिम्नापापवहा। तत्र वैराग्येण विषयस्त्रोतः खिलीक्रियते, विवेकदर्शनाभ्यासेन विवेकस्त्रोत उद्घाट्यत इत्युभया- धीनश्चित्तवृत्तिनिरोधः॥१२॥

**सूत्रार्थः -** अभ्यास- वैराग्ये वक्ष्यमाणलक्षणे, ताभ्यां तासां प्रकाशप्रवृत्तिनियमरूपाणां चित्तवृत्तीनां यत्प्रति हननं स निरोधः। किमुक्तं भवति-तासां विनि वृत्तबाह्याभिनिवेशानाम् अन्तर्मुखतया स्वकारण एव चित्ते शुक्ति रूपतयाऽवस्थानम्। तत्र विषयदोष दर्शनजेन वैराग्येण तद्वैमुख्यमुत्पाद्यते, अभ्यासेन च सुखजनकं शान्तप्रवाह प्रदर्शनद्वारेण दृढस्थैर्य्यमुत्पाद्यत इत्याभ्यां भवति चित्तवृत्तिनिरोधः॥१२॥

**तत्र स्थितौ यत्नोऽभ्यासः॥१३॥**

अभ्यासं व्याख्यातुमाह -

**व्या०भा०** – चित्तस्यावृत्तिकस्य प्रशान्तवाहिता स्थितिः। तदर्थः प्रयत्नो वीर्यमुत्साहः। तत्सं पिपादयिषया तत्साधनानुष्ठानमभ्यासः॥१३॥

सूत्रार्थः – वृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामः स्थितिः, तस्यां यत्न उत्साहः, पुनः पुनस्तथात्वेन चेतसि निवेशनमभ्यास इति उच्यते। ।१३। ।

अभ्यासस्य विशेषमाह

**स तु दीर्घकालनैरन्तर्य्य- सत्कारासेवितो दृढभूमिः॥१४॥**

व्या०भा० – दीर्घकालासेवितो निरन्तरा सेवितः। तपसा ब्रह्मचर्येण विद्यया श्रद्धया च संपादितः सत्कारवान्दृढभूमिर्भवति। व्युत्थान संस्कारेण द्रागित्येवानभिभूतविषय इत्यर्थः॥१४॥

सूत्रार्थः – बहुकालं नैरन्तर्येण, आदरातिशयेन च सेव्यमानो दृढभूमिः स्थिरो भवति, दाढर्याय प्रभवतीत्यर्थः। ।१४। ।

वैराग्यस्य लक्षणमाह

**दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्। ।१५।।**

व्या०भा०- स्त्रियोऽन्नपानमैश्वर्यमिति दृष्टविषयवितृष्णस्य स्वर्गवैदेह्य प्रकृतिलयत्व प्राप्तावानुश्रविकविषये वितृष्णस्य दिव्यादिव्य विषय संप्रयोगेऽपि चित्तस्य विषयदोषदर्शिनः प्रसंख्यान बलादनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैराग्यम्॥१५॥

सूत्रार्थः – द्विविधो हि विषयो, दृष्ट आनुश्रविकश्च। दृष्ट इहैवोपलभ्यमानः शब्दादिः। देवलोकादावानुश्रविकः। अनुश्रयते गुरुमुखादित्यनुश्रवो वेदस्तत आगत आनुश्रविकः। तयोर्द्वयोरपि विषययोः परिणामविरसत्वदर्शनाद्विगतद्धर्मस्य या वशीकारसंज्ञा 'ममैते वश्या, नाहमेतेषां वश्यः' इति योऽयं विमर्शः, तद्वैराग्यमुच्यते। ।१५। ।

तत्परपुरुषख्यातेर्गुणवैतृष्ण्यम्। ।१६। ।

वैराग्यस्य विशेषमाह

व्या०भा०- दृष्टानुश्रविकविषयदोषदर्शी विरक्तः पुरुषदर्शनाभ्यासात्तच्छुद्धिप्रविवेकाप्यायितबुद्धिर्गुणेभ्यो व्यक्ताव्यक्तधर्मकेभ्यो विरक्त इति। तद्द्वयं वैराग्यम्। तत्र यदुत्तरं तज्ज्ञानप्रसादमात्रम्। यस्योदये योगी प्रत्युदितख्यातिरेवं मन्यते प्राप्तं प्रापणीयं क्षीणाः क्षेतव्याः क्लेशाः, छिन्नः श्लिष्टपर्वाभवसंक्रमः, यस्याविच्छेदाज्जनित्वाम्रियते मृत्वा च जायत इति। ज्ञानस्यैव पराकाष्ठा वैराग्यम्। एतस्यैव हि नान्तरीयकं कैवल्यमिति॥१६॥

**सूत्रार्थः** – तद्वैराग्यं परं प्रकृष्टम्, प्रथमं वैराग्यं विषयविषयम्, द्वितीयं गुणविषयम्, उत्पन्नगुणपुरुषविवेकख्यातेरेव भवति, निरोधसमाधेः अत्यन्तानुकूलत्वात्।

वितर्कविचारानन्दास्मितारूपानुगमात्सम्प्रज्ञातः।।१७।

संप्रज्ञातभेदाः

व्या०भा०- वितर्कश्चित्तस्यालम्बनेस्थूलआभोगः।सूक्ष्मोविचारः। आनन्दोह्लादः। एकात्मिका संविदस्मिता। तत्र प्रथमश्चतुष्टयानुगतः समाधिः सवितर्कः। द्वितीयो वितर्कविकलः सविचारः। तृतीयो विचारविकलः सानन्दः। चतुर्थस्तद्विकलोऽस्मितामात्र इति। सर्व एते सालम्बनाः समाधयः॥१७॥

**सूत्रार्थः** – समाधिरिति शेषः। सम्यक्संशयविपर्य्यय रहितत्वेन, प्रज्ञायते (प्रकर्षेण ज्ञायते) भाव्यस्य रूपं येन स सम्प्रज्ञातः, समाधिर्भावना विशेषः। ध्येयातिरिक्त संकलवृत्तिनिरोधः सम्प्रज्ञातः सबीज इति यावत्। सवितर्कादि भेदाच्चतुर्विधः - सवितर्कः, सविचारः, सानन्दः, सास्मितश्च। भावनाभाव्यस्य विषयान्तरपरिहारेण चेतसि पुनः पुनर्निवेशनम्। भाव्यञ्च

द्विधा-ईश्वरस्तत्त्वानि च। तान्यपि च द्विधा जडाऽजडभेदात्। जडानि चतुर्विंशतिः। अजडः पुरुषः। तत्र यदा महाभूतानि इन्द्रियाणि स्थूलानि विषयत्वेनादायपूर्वापरानुसन्धानेन शब्दार्थोल्लेखसम्भेदेन च भावना क्रियते तदा सवितर्कः समाधिः। अस्मिन्नेवावलम्बने पूर्वापरानुसन्धान शब्दोल्लेखशून्यत्वेन यदा भावना प्रवर्तते, तदा निर्वितर्कः। तन्मात्रान्तःकरणलक्षणं सूक्ष्मविषयमालम्ब्य तस्य देशकालधर्मावच्छेदेन यदा भावना, तदा स विचारः। तस्मिन्नेवावलम्बने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन भावना क्रियमाणा निर्विचार इत्युच्यते। एवं पर्य्यन्तः समाधिः ग्राह्यसमापत्तिरिति व्यपदिश्यते। यदा तु रजस्तमो लेशानुबिद्धमन्तःकरणसत्त्वं भाव्यते, तदागुणभावाच्चितिशक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात्सानन्दः समाधिर्भवति। तस्मिन्नेव समाधौ ये बद्धधृतयस्तत्त्वान्तरं प्रधान-पुरुषरूपं न पश्यन्ति, ते विगतदेहाहङ्कारत्वाद्विदेहशब्दवाच्याः। इयं ग्रहण समापत्तिः। ततः परं रजस्तमोलेशानभिभूतं शुद्धं सत्त्वमालम्बनीकृत्य या प्रवर्त्तते भावना, तस्यां ग्राह्यस्य न्यग्भावात्चितिशक्तेरुद्रेकात् सत्तामात्रावशेषत्वेन समाधिः सास्मित इत्युच्यते।

न चाहङ्कारास्मितयोरभेदः शङ्कनीयः, यतो यत्रान्तःकरणम् 'अहमिति' उल्लेखन विषयान्वेदयते, सोऽहङ्कारः यत्रान्तर्मुखतया प्रतिलोमपरिणामे प्रकृति लीने चेतसि सत्तामात्रम् अवभाति, साऽस्मिता। अस्मिन्नेव समाधौ ये कृतपरितोषाः परमात्मानं पुरुषं न पश्यन्ति, तेषां चेतसि स्वकारणे लयमुपागते प्रकृतिलया इत्युच्यन्ते। ये परं पुरुषं ज्ञात्वाभावनायां प्रवर्त्तन्ते, तेषामियं

विवेकख्यातिर्ग्रहीतृसमापत्तिरित्युच्यते। तत्र सम्प्रज्ञाते समाधौ चतस्रोऽवस्थाः शक्तिरूपतयाऽवतिष्ठन्ते, तत्रैकैकस्यास्त्याग उत्तरोत्तरेति चतुरवस्थोऽयं सम्प्रज्ञातः समाधिः॥१७॥

**विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः॥१८॥**

असंप्रज्ञातमाह

**व्या०भा०-** सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चित्तस्य समाधिरसंप्रज्ञातः। तस्य परवैराग्यमुपायः। सालम्बनोह्यभ्यासस्तत्साधनायनकल्पत इति। विरामप्रत्ययो निर्वस्तुक आलम्बनी क्रियते। स चार्थशून्यः। तदभ्यासपूर्वकं चित्तं निरालम्बनमभावप्राप्तमिव भवतीत्येष निर्बीजः समाधिरसंप्रज्ञातः॥१८॥

**सूत्रार्थः** – विरम्यते अनेनेति विरामो वितर्कादि चिन्तात्यागः। विरामश्चासौ प्रत्ययश्चेति विरामप्रत्ययः तस्याभ्यासः पौनःपुन्येन चेतसि निवेशनम्। तत्रया काचित्वृत्तिरुल्लसति, तस्याः 'नेति नेती' तिनैरन्तर्येणपर्य्युदसनं तन्पूर्वकोसम्प्रज्ञातसमाधिः 'संस्कारशेषोऽन्यः तद्विलक्षणोऽ-सम्प्रज्ञातः इत्यर्थः। न तत्र किञ्चिद्वेद्यम् (असम्प्रज्ञातो निर्बीजः समाधिः। इह चतुर्विधः चित्तस्य परिणामः- व्युत्थानं, समाधिप्रारम्भः, एकाग्रता, निरोधश्च। तत्र क्षिप्तमूढेचित्तभूमीव्युत्थानम्। विक्षिप्ताभूमिः सत्वोद्रेकात्समाधि प्रारम्भः। निरुद्धैकाग्रते च पर्य्यन्तभूमी। प्रतिपरिणामश्च संस्काराः। तत्र व्युत्थानजनिताः संस्काराः समाधिप्रारम्भजैः संस्कारैः प्रत्याहन्यते। तज्जाश्च एकाग्रताजैः, निरोधजनितैरेकाग्रताजाः स्वरूपञ्च हन्यते। यथा सुवर्णसंवलितंध्यायमानं सीसकमात्मानं सुवर्णमलञ्च निर्दहति, एवमेकाग्रता जनितान्संस्कारान्निरोधजाः स्वात्मानञ्च निर्दहन्ति।।१८।।

**भवप्रत्ययो विदेहप्रकृतिलयानाम्॥१९॥**

योगस्य उपायः

**व्या०भा०** – विदेहानां देवानां भवप्रत्ययः। ते हि स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः स्वसंस्कारविपाकं तथा जातीयकमतिवाहयन्ति। तथा प्रकृतिलयाः साधिकारे चेतसि प्रकृतिलीने कैवल्यपदमिवानुभवन्ति, यावन्न पुनरावर्ततेऽधिकारवशाच्चित्तम् इति॥१९॥

**सूत्रार्थः** – विदेहाः प्रकृतिलयाश्च वितर्कादि भूमिका सूत्रे (१/१७) व्याख्याताः, तेषां समाधिः भवप्रत्ययः, भवः संसारः, स एव प्रत्ययः कारणं यस्य सभवप्रत्ययः। अयमर्थः आविर्भूता एव संसारे ते तथाविध समाधिभाजो भवन्ति, तेषांपरतत्वादर्शनात्योगाभ्यासोऽयम्। अतः परत्तत्त्वज्ञाने तद्भावनायाश्चमुक्तिकामेन महान्यत्नोविधेय इत्येतदर्थमुपदिष्टम्। ।१९।।

**श्रद्धा-वीर्य्य-स्मृति-समाधि-प्रज्ञापूर्वक- इतरेषाम्। ।२०। ।**

संप्रज्ञातसमाधेः उपायाः

**व्या०भा०** – उपायप्रत्ययोयोगिनां भवति। श्रद्धाचेतसः संप्रसादः। सा हि जननी व कल्याणी योगिनं पाति। तस्य हि श्रद्दधानस्य विवेकार्थिनो वीर्यमुपजायते। समुपजातवीर्यस्य स्मृतिरुपतिष्ठते। स्मृत्युपस्थाने च चित्तमना कुलं समाधीयते। समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते, येन यथार्थं वस्तुजानाति। तदभ्यासात्तद्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति॥२०॥

**सूत्रार्थः** – विदेह प्रकृतिलयव्यतिरिक्तानां श्रद्धादिपूर्वकः, श्रद्धादयः पूर्वे उपाया यस्य सश्रद्धादिपूर्वकः। ते च श्रद्धादयः क्रमादुपायोपेयभावेन प्रवर्त्तमानाः सम्प्रज्ञातसमाधेरुपायतां



SGOU

प्रतिपद्यन्ते। तत्र श्रद्धायोगविषये चेतसः प्रसादः। वीर्य्यमुत्साहः। स्मृतिरनुभूतासम्प्रमोषः। समाधिरेकाग्रता। प्रज्ञाप्रज्ञातव्यविवेकः। तत्र श्रद्धावतो वीर्य्यं जायते, योगविषय उत्साहवान्भवति। सोत्साहस्य च पाश्चात्त्यासु भूमिषु स्मृतिरुत्पद्यते। तत्स्मरणाच्च चेतः समाधीयते। समाहितचित्तश्च भाव्यं सम्यग्विवेकेन जानाति त एते सम्प्रज्ञातस्य समाधेरुपायाः तस्याभ्यासात्पराच्च वैराग्याद् भवत्यसम्प्रज्ञातः॥२०॥

योगिनाम् उपायभेदाभेदान्

**तीव्रसंवेगानामासन्नः। ॥२१॥**

**व्या०भा० –** समाधिलाभः समाधिफलं च भवतीति॥२१॥

**सूत्रार्थः -** समाधिलाभः, इति शेषः। (संवेगःक्रियाहेतुदृढतरः संस्कारः) स तीव्रो येषामधिमात्रोपायानां तेषामासन्नः समाधिलाभः समाधिफलश्चासन्नं भवति, शीघ्रमेव सम्पद्यत इत्यर्थः। ।२१। ।

के ते तीव्रसंवेगा इत्याह

**मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः॥२२॥**

**व्या०भा० –**मृदुतीव्रो मध्यतीव्रोऽधिमात्रतीव्र इति, ततोऽपि विशेषः। तद्विशेषान्मृदुतीव्रसंवेगस्यासन्नस्ततो मध्यतीव्र-संवेगस्यासन्नतरस्तस्मादधिमात्रतीव्रसंवेगस्याधिमात्रोपायस्या-सन्नतमः समाधिलाभः समाधिफलं चेति॥२२॥

**सूत्रार्थः –** तेभ्य उपायेभ्यो मृद्वादिभेदभिन्नेभ्य उपायवतां विशेषो भवति। मृदुर्मध्योऽधिमात्र इत्युपाय भेदाः। ते प्रत्येकं मृदुसंवेग-मध्यसंवेग-तीव्रसंवेग भेदात्त्रिविधा। तद्भेदेन च नव योगिनो भवन्ति। मृदूपायोमृदुसंवेगः मध्यसंवेगः तीव्रसंवेगश्च। मध्योपायो मृदुसंवेगः मध्यसंवेगः तीव्रसंवेगश्च। अधिमात्रोपायो

मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्च। अधिमात्रोपाये तीव्रसंवेगे च महान्यत्नः कर्त्तव्य इति भेदोपदेशः। ।२२।।

समाधिलाभस्य सुगमं उपायं दर्शयितुमाह

**ईश्वरप्रणिधानाद्वा ॥२३॥**

**व्या०भा०-** प्रणिधानाद्भक्तिविशेषादावर्तित ईश्वरस्त-मनुगृह्णात्यभिध्यानमात्रेण। तदभिध्यानमात्रादपि योगिन आसन्नतमः समाधिलाभः समाधिफलं च भवतीति॥२३॥

**सूत्रार्थः -** ईश्वरोवक्ष्यमाणलक्षणः, तत्र प्रणिधानं भक्तिविशेषः। विशिष्टमुपासनम्, सर्वक्रियाणां तत्रार्पणम्, विषयसुखादिकं फलमनिच्छन्सर्वाः क्रियास्तस्मिन्परमगुरावर्पयति। तत्प्रणिधानं समाधेस्तत्फललाभस्य च प्रकृष्ट उपायः। ।२३। ।

ईश्वरस्य स्वरूपम्

**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः॥२४॥**

**व्या०भा० -** अविद्यादयः क्लेशाः, कुशलाकुशलानि कर्माणि, तत्फलं विपाकः, तदनुगुणावासना आशयाः। ते च मनसिवर्तमानाः पुरुषे व्यपदिश्यन्ते, सहितत्फलस्य भोक्तेति। यथा जयः पराजयोवायोद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते। योह्यनेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः। कैवल्यं प्राप्तास्तर्हि सन्ति च बहवः केवलिनः, ते हि त्रीणि बन्धना निच्छित्त्वाकैवल्यं प्राप्ताः। ईश्वरस्य च तत्संबन्धोन भूतो न भावीयथामुक्तस्य पूर्वाबन्धकोटिः प्रज्ञायते, नैवमीश्वरस्य। यथा वा प्रकृति लीनस्योत्तराबन्धकोटिः सम्भाव्यते, नैवमीश्वरस्य। स तु सदैव मुक्तः सदैवेश्वर इति।

**सूत्रार्थः –** क्लिश्नन्तीति क्लेशा अविद्यादयो वक्ष्यमाणाः। विहितनिषिद्धव्यामिश्र रूपाणि कर्माणि। विपच्यन्ते इति विपाकाः- कर्मफलानि, जात्यायुर्भोगाः।

आफलविपाकाच्चित्तभूमौ शेरत इत्याशयाः वासनाख्याः संस्कारास्तैरपरामृष्टः त्रिष्वपिकालेषु न संस्पृष्टः पुरुषविशेषः, अन्येभ्यः पुरुषेभ्योविशिष्यते इति विशेषः। ईश्वरईशानशीलः, इच्छामात्रेण सकलजगदुद्धरण क्षमः। यद्यपि सर्वेषामात्मनां क्लेशादिस्पर्शोनास्ति तथापि चित्तग्रतास्तेषामुपदिश्यन्ते। यथा योद्धृगता जयपराजयौ स्वामिनः। अस्य तु त्रिष्वपिकालेषु तथाविधोऽपि क्लेशादिपरामर्शो नास्ति, अतः सविलक्षण एव भगवानीश्वरः। तस्य च तथाविधमैश्वर्य्यमनादेः सत्त्वोत्कर्षात्। सत्त्वोत्कर्षश्चास्य प्रकृष्टज्ञानादेव। न चानयोर्ज्ञानैश्वर्य्ययोः इतरेतराश्रयत्वम्, परस्परानपेक्षत्वात्। ते द्वे ज्ञानैश्वर्य्ये ईश्वरसत्त्वे वर्तमाने अनादिभूते। तेन च तथाविधेन सत्त्वेन तस्यानादिरेव सम्बन्धः। प्रकृति- पुरुषसंयोग-वियोगयोरीश्वरेच्छा व्यतिरेकेणानुपपत्तेः। यथेतरेषां प्राणिनां सुखदुःखमोहात्मकतया, परिणतं चित्तं निर्मलेसात्त्विके धर्मात्मप्रख्ये योगि शरीरे प्रति संक्रान्तं चिच्छायासंक्रान्ते संवेद्यं भवति, नैवमीश्वरस्य। तस्य केवल एव सात्त्विकः परिणाम उत्कर्षवाननादिसम्बन्धेन भोग्यतया व्यवस्थितः। अतः पुरुषान्तर – विलक्षणतया स एव ईश्वरः। मुक्तात्मनां पुनः क्लेशादियोगस्तैस्तैः शास्त्रोक्तैरुपायैर्निवर्त्तितः। अस्य तु सर्वदैव तथाविधत्वान्नमुक्तात्मतुल्यत्वम्। उत्कर्षापकर्षयुक्तत्वे स एवोत्कृष्टः, स एवेश्वरः। तत्रैव काष्ठाप्राप्तत्वादैश्वर्यस्य॥२४॥

ईश्वरस्य प्रमाणम्

**तत्र निरतिशयं सर्वज्ञबीजम्॥२४॥**

**व्या०भा०** – यदिदम् अतीतानागत प्रत्युत्पन्नप्रत्येक समुच्चयातीन्द्रिय ग्रहणमल्पं बह्विति सर्वज्ञबीजमेतद्विवर्धमानं यत्र निरतिशयं स सर्वज्ञः। अस्ति काष्ठाप्राप्तिः सर्वज्ञ बीजस्य सातिशयत्वात्परिमाणवदिति। यत्र काष्ठा प्राप्तिर्ज्ञानस्य

ससर्वज्ञः। स च पुरुषविशेष इति। सामान्यमात्रोपसंहारे च कृतोपक्षयमनुमानं न विशेषप्रतिपत्तौ समर्थमिति। तस्यसंज्ञादिविशेषप्रतिपत्तिरागमतःपर्यन्वेष्या।

तस्यात्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम्, ज्ञानधर्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति। तथा चोक्तम् आदिविद्वान्निर्माणचित्तमधिष्ठाय कारुण्याद्भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाचेति॥२५॥

**सूत्रार्थः** – तस्मिन् भगवतिसर्वज्ञत्वस्य यद्बीजम् अतीतानागतादिग्रहणस्याल्पत्वं महत्त्वञ्च मूलत्वाद्बीजमिव बीजम्, तत्तत्र निरतिशयं काष्ठां प्राप्तम्। दृष्ट्रा ह्यल्पत्व-महत्त्वादीनां धर्माणां सातिशयानां काष्ठा प्राप्तिः। यथा परमाणावल्पत्वस्य, आकाशे च परममहत्त्वस्य। एवं ज्ञानादयोऽपि चित्तधर्माः तारतम्येन परिदृश्यमानाः क्वचिन्निरतिशयतामासादयन्ति, यत्र चैते निरतिशयाः, स ईश्वरः। यद्यपि सामान्यमात्रेऽनुमानस्य पर्य्यवसितत्वान्न विशेषावगतिः सम्भवति, तथाऽपि शास्त्रादस्य सर्वज्ञत्वादयोऽवगन्तव्याः। स च स्वप्रयोजनाभावे कथं प्रकृतिपुरुषयोः संयोगवियोगौ आपादयतीति नाशङ्कनीयम्, तस्य कारुणिकत्वाद्भूतानुग्रह एव प्रयोजनम्, कल्प प्रलय महाप्रलयेषु निःशेषान्संसारिण उद्धरिष्यामीति तस्याध्यवसायः। यद्यस्येष्टं तत्तस्य प्रयोजनमिति। ।२५। ।

ईश्वरस्य प्रभावम्

**स पूर्वेषामपि गुरुः कालेनानवच्छेदात्॥२६॥**

**व्या०भा०** –पूर्वे हि गुरवः कालेनावच्छिद्यन्ते यत्रावच्छेदार्थे न कालो नोपावर्तते स एष पूर्वेषामपि गुरुः। यथास्य सर्गस्यादौ प्रकर्षगत्यासिद्धस्तथातिक्रान्तसर्गादिष्वपि प्रत्येतव्यः॥२६॥

सूत्रार्थः – आद्यानां स्रष्टृणां ब्रह्मादीनामपि स गुरुः - उपदेष्टा, यतः सकालेन नावच्छिद्यते, अनादित्वात्। तेषां पुनरादिमत्वादस्ति कालेनावच्छेदः॥२४॥

ईश्वरस्य वाचकम्

**तस्य वाचकः प्रणवः॥२७॥**

**व्या०भा०-** वाच्य ईश्वरः प्रणवस्य। किमस्य संकेतकृतं वाच्यवाचकत्वमथ प्रदीपप्रकाशवदवस्थितमिति। स्थितोऽस्य वाच्यस्य वाचकेन सहसंबन्धः। संकेतस्त्वीश्वरस्य स्थितमेवार्थ-मभिनयति। यथावस्थितः पितापुत्रयोः संबन्धः संकेतेनावद्योत्यते, अयमस्य पिता, अयमस्य पुत्र इति। सर्गान्तरेष्वपि वाच्यवाचक शक्त्यपेक्षस्तथैव संकेतः क्रियते। संप्रतिपत्ति नित्यतयानित्यः शब्दार्थसंबन्ध इत्यागमिनः प्रतिजानते॥२७॥

**सूत्रार्थः** - इत्थमुक्तस्वरूपस्येश्वरस्य वाचकोऽभिधायकः, प्रकर्षेण नूयते-स्तूयतेऽनेनेति नौतिस्तौतीति वा प्रणवः ओङ्कारः। तयोश्च वाच्यवाचकभावलक्षणः सम्बन्धोनित्यः सङ्केतेन प्रकाश्यते, न तु केनचित्क्रियते; यथा पितापुत्रयोर्विद्यमान एव सम्बन्धोऽस्यायं पिता, अस्यायं पुत्र इति केन चित्प्रकाश्यते॥२७॥

ईश्वरस्य उपासनम्

**तज्जपस्तदर्थभावनम्।।२८।।**

**व्या०भा०** – प्रणवस्य जपः प्रणवाभिधेयस्य चेश्वरस्य भावनम्। तदस्य योगिनः प्रणवं जपतः प्रणवार्थं च भावयतश्चित्तमेकाग्रं संपद्यते। तथा चोक्तम्-

स्वाध्यायाद्योगमासीतयोगात्स्वाध्यायमासते।

स्वाध्याययोग संपत्त्यापरमात्मा प्रकाशते॥इति॥२८॥

**सूत्रार्थः** – तस्य सार्द्धत्रिमात्रिकस्य प्रणवस्य, जपो यथावदुच्चारणम्, तद्वाच्यस्य चेश्वरस्य भावनं पुनः पुनश्चेतसि निवेशनमेकाग्रताया उपायः। अतः समाधिसिद्धये योगिना प्रणवोजप्यः, तदर्थ ईश्वरश्च भावनीय इत्युक्तं भवति। ।२८। ।

उपासनायाः फलम्

**ततः प्रत्यक्चेतनाऽधिगमोऽप्यन्तरायाभावश्च। ।२९। ।**

**व्या०भा०-** ये तावदन्तरायाव्याधिप्रभृतयस्ते तावदीश्वर-प्रणिधानान्नभवन्ति। स्वरूपदर्शनमप्यस्य भवति। यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलोऽनुपसर्गस्तथायमपि बुद्धेः प्रतिसंवेदीयः पुरुष इत्येवमधिगच्छति॥२९॥

**सूत्रार्थः** – तस्माज्जपात्तदर्थभावनायाश्च योगिनः प्रत्यक्चेतनाऽधिगमो भवति, विषयप्रातिकूल्ये न स्वान्तःकरणाभिमुखमञ्चति या चेतनादृक्शक्तिः सा प्रत्यक्चेतना, तस्या अधिगमाज्ञानं भवति। अन्तरायावक्ष्यमाणाः, तेषामभावः शक्तिप्रतिबन्धो भवति। ।२९। ।

अन्तरायाः/ चित्तविक्षेपाः

**व्याधि-स्त्यान-संशय-प्रमादाऽऽलस्याऽविरति-भ्रान्ति-दर्शनाऽलब्धभूमिकत्वाऽनवस्थितत्वानिचित्तविक्षेपास्तेऽन्तरायाः॥ ३०॥**

**व्या०भा०** – न वान्तरायाश्चित्तस्य विक्षेपाः, सहैते चित्तवृत्तिभिर्भवन्ति। एतेषामभावेन भवन्ति पूर्वोक्ताश्चित्तवृत्तयः। तत्र व्याधिर्धातुरसकरणवैषम्यम्। स्त्यानमकर्मण्यता चित्तस्य। संशय उभय- कोटिस्पृग्विज्ञानं स्यादिदमेवं नैवं स्यादिति। प्रमादः

समाधिसाधनानामभावनम्। आलस्य कायस्य चित्तस्य च गुरुत्वादप्रवृत्तिः। अविरतिश्चित्तस्य विषयसंप्रयोगात्मागर्धः। भ्रान्तिदर्शनं विपर्यय ज्ञानम्। अलब्धभूमिकत्वं समाधिभूमेरलाभः। अनवस्थितत्वं लब्धायां भूमौ चित्तस्याप्रतिष्ठा। समाधि- प्रतिलम्भे हि सति तदवस्थितं स्यादिति। एते चित्तविक्षेपा नवयोगमलायोगप्रतिपक्षा-योगान्तराया इत्यभिधीयन्ते॥३०॥

सूत्रार्थः – न वै ते रजस्तमोबलात्प्रवर्त्तमानाश्चित्तस्य विक्षेपा भवन्ति तैरेकाग्रताविरोधिभिश्चित्तं विक्षिप्यत इत्यर्थः। तत्र व्याधिर्धातुवैषम्यनिमित्तो ज्वरादिः। स्त्यानमकर्मण्यता चित्तस्य। उभयकोट्यावलम्बनंविज्ञानंसंशयः, योगः साध्योनवेति। प्रमादोऽननुष्ठानशीलता, समाधिसाधनेषु औदासीन्यम्। आलस्यं कायचित्तयोर्गुरुत्वम्, योगविषये प्रवृत्त्यभावे हेतुः। अविरतिश्चित्तस्य विषयसम्प्रयोगात्मागर्धः। भ्रान्तिदर्शनं शुक्तिकायां रजतत्ववदिति विपर्ययज्ञानम्। अलब्धभूमिकत्वं कुतश्चिन्निमित्तात्समाधिभूमेरलाभोऽसम्प्राप्तिः। अनवस्थितत्वं लब्धायामपि समाधिभूमौ चित्तस्य तत्राप्रतिष्ठा। त एते समाधेरेकाग्रताया यथायोगं प्रतिपक्षत्वादन्तराया इत्युच्यन्ते॥३०।।

अन्यान् अन्तरायान् प्रतिपादयति

**दुःख-दौर्मनस्याऽङ्गमेजयत्व-श्वास-प्रश्वासा-विक्षेपसहभुवः॥३१॥**

व्या०भा० –दुःखमाध्यात्मिकमाधिभौतिकमाधिदैविकं च। येनाभिहताः प्राणिनस्तदुपघाताय प्रयतन्ते तद्दुःखम्। दौर्मनस्यमिच्छाविघाताच्चेतसः क्षोभः यदङ्गान्ये जयतिकम्पयति तदङ्गमेजयत्वम्। प्राणोयद्बाह्यं वायुमाचामतिसश्वासः। यत्कौष्ठ्यं वायुं निःसारयति स

प्रश्वासः। एते विक्षेपसहभुवो विक्षिप्तचित्तस्यैते भवन्ति। समाहितचित्तस्यैते न भवन्ति॥३१॥

**सूत्रार्थः** – कुतश्चिन्निमित्तादुत्पन्नेषु विक्षेपेषु एते दुःखादयः प्रवर्त्तन्ते। तत्र' दुःखं चित्तस्य राजसः परिणामोबाधना लक्षणः, यद्बाधात्प्राणिनः तदुपघाताय प्रवर्त्तन्ते। दौर्मनस्यं ब्राह्याभ्यन्तरैः कारणैर्मनसोदौःस्थ्यम्। अङ्गमेजयत्वं सर्वाङ्गीणो वेपथुः, आसनमनः स्थैर्य्यस्य बाधकः। प्राणोयद्बाह्यं वायुमाचामति स श्वासः। यत्कौष्ठ्यं वायुं निःश्वसिति सप्रश्वासः। त एते विक्षेपैः सह वर्त्तमाना यथोदिताभ्यासवैराग्याभ्यां निरोद्धव्या इत्येषामुपदेशः। ।३१। ।

सोपद्रवप्रतिषेधार्थ-मुपायान्तरं

**तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः। ।३२। ।**

**व्या०भा०** – विक्षेपप्रतिषेधार्थमेकतत्त्वावलम्बनं चित्तमभ्यसेत्। यस्य तु प्रत्यर्थनियतं प्रत्ययमात्रं क्षणिकं च चित्तं तस्य सर्वमेव चित्तमेकाग्रं नास्त्येव विक्षिप्तम्। यदि पुनरिदं सर्वतः प्रत्याहृत्यैकस्मिन्नर्थे समाधीयते तदा भवत्येकाग्रमित्यतो न प्रत्यर्थनियतम्।

**सूत्रार्थः** – तेषां विक्षेपाणां प्रतिषेधार्थं निषेधार्थम् एकस्मिन्कस्मिंश्चिदभिमते तत्त्वेऽभ्यासश्चेतसः पुनः पुनर्निवेशनं कुर्यात्। यद्बलात्प्रत्युदितायामेकाग्रतायां ते विक्षेपाः प्रणाशमुपयान्ति॥३२॥

## Summarised Overview

भोजेन सूत्राणां व्याख्यानरूपेण भोजवृत्तिः लिखिता। व्यासेन रचितं व्यासभाष्यं अतीव प्रसिद्धम्।

"योगो आध्यात्मिकः पुंसामतो निःश्रेयसायमे।
अत्यन्तोपरतिर्यत्रदुःखस्य सुखस्य च।।इति। ।

प्राचीनकालात्प्रारभ्येदानीन्तनकालावधिः भारतीयचिन्तने भारतीयदर्शने आध्यात्मिकसाधनायाञ्च योगविद्याऽमूल्यरत्नस्वरूपेण प्रतिष्ठिताऽस्ति। 'युज्समाधौ' इत्यात्मनेपदीयस्य दिवादिगणीयस्य 'युज्' धातोरुत्तरात्घञि प्रत्ययसंयोगे योग इति पदन्निष्पन्नं जायते। यस्यार्थस्तावत्समाधिरित्युक्ते चित्तवृत्तिनिरोधः। स तु चित्तस्य सार्वभौमधर्मः। व्यासभाष्ये विषयोऽयमवलोक्यते यत् - "योगः समाधिः। स च सार्वभौमश्चित्तस्य धर्मः"।इति।

कपिलमुनिप्रणीत सांख्यदर्शनानुसारं प्रकृतिपुरुषयोर्वियोग एवयोगः। पुनश्चपरमात्मना सार्धं जीवात्मनस्संयोगः खलु योग इत्यर्थः। तथा चोक्तम् -

"संयोगयोग इत्युक्तः जीवात्मपरमात्मनोः "। इति।

इतोऽपि योगमाश्रित्य संहितासु, पुराणेषु, गीतासु, उपनिषत्सु, रामायणेषु, महाभारतेषु, दर्शनशास्त्रेषु, स्मृतिशास्त्रेषु च सुविस्तृतविविधतत्त्वानि समुपलभ्यन्ते। तत्र योगस्य स्वरूपमवश्यमेवाऽलोक्यते, तेषु किञ्चिल्लक्षणं मया अधोलिखिते निर्दिश्यते -

- स्कन्दपुराणानुसारम् - "संयोगस्त्वात्ममनसो योग इत्युच्यते बुधैः "।
- कूर्मपुराणानुसारम् - "मय्येक चित्तता योगो प्रत्ययान्तरनियोगतः। इति।
- मैत्रायण्युपनिषदनुसारम् - "सर्वभावपरित्यागो योग इत्यभिधीयते"। इति।

अत एवोपर्युक्ता लोचनाभिः इत्थम्भाषितुमर्हातेय च्चित्तवृत्तिं नियन्त्र्यपरमब्रह्मणि अवस्थानमित्यर्थे योगपदमत्र स्वीकृतम्। परन्तु अखिल संस्कृत जगति उच्चावच कोषग्रन्थेषु योगस्य भूरिशोऽर्थाः निर्वचनानि च विद्यन्ते, तद्यथा – योगः सन्नहनः, उपायः, ध्यानम्, सङ्गतिः, युक्तिश्च इत्यमरसिंहः अमरकोषे प्रतिपादयति। योगशास्त्रे प्रत्यक्षं, अनुमानं, शब्दः चेति प्रमाणत्रयस्य स्वीकारः कृतः। उक्तं यथा योगसूत्रे – प्रत्यक्षानुमानागमाः प्रमाणानि' इति।

विपर्य्ययः मिथ्याज्ञानम् अतद्रूपप्रतिष्ठितं च न प्रमाणानि। अयथाभूतं ज्ञानं विपर्य्ययः। स्थाणु वा पुरुषे वा इति संशयः मिथ्याज्ञानम्। असत्रूपेण प्रतीयमानम् अतद्रूपप्रतिष्टितम्। वृत्तिषु प्रमाण- विपर्य्यय-विकल्प-निद्रा-स्मृतयः अन्तर्भवन्ति। तासु अनुभूतविषयासम्प्रमोषः स्मृतिः। अभ्यासेन वैरग्येण च च्तवृत्तिं निरोद्धुं शक्यते। स्थितौ

यत्नोऽभ्यासः। इन्द्रियाणां वशीकरणसंज्ञा वैराग्यम्। वैराग्यं द्विधा। विषयाविषयं वैराग्यं, गुणविषयं वैराग्यं चेति।

संशयविपर्य्ययरहितत्वेन भाव्यस्य रूपं प्रज्ञायते सः सम्प्रज्ञातः। सः समाधिभावना विशेषाः।सः सम्प्रज्ञातः, सनितर्क्कः, सविचारः, सानन्दः, सास्मितश्चेति चतुर्विधः। तीव्रसंवेगानामासन्नः समाधिलाभः। मृदुतीव्रः, मध्यतीव्रः, अधिमात्रतीव्रः इति त्रयः तीव्रसंवेगाः। ईश्वरप्रणिधानाद्वा समाधिलाभः। प्रणवजपेन ईश्वरोपासनाकार्या। प्रणवजपतः प्रणवार्थं च भावयतः चित्तमेकाग्रं सम्पद्यते।

चित्तविक्षेपे केचन विघ्नाः भवितुमर्हन्ति। प्रधानैः विक्षेपान्तरायैः साकं दौमनस्यङ्गमेजयत्वं, श्वासः, प्रश्वासः च अन्ये अन्तरायाः। एतेषां प्रतिषेधार्थम् एकतत्वाभ्यासः कार्यः। कस्मिश्चित् अभिमते तत्त्वे चेतसः पुनर्निवेशनं कुर्यात्।

## Assignments

1. खण्डिकया उत्तरं लिखत – योगदर्शने तत्त्वानि।
2. समाध्यवस्थायां(योगावस्थायां), चाञ्चल्यावस्थायां च चित्तस्यस्वरूपमधिकृत्य उपन्यस्यत।
3. पञ्चवृत्तयः – लघुप्रबन्धं रचयत।
4. समाधिद्वैविध्यं विशदयत।
5. ईश्वरस्वरूपं, प्रमाणं,प्रभावं,वाचकं,उपासनाक्रमं च अधिकृत्य स्पष्टयत।
6. चित्तविक्षेपाः (अन्तरायाः) के?

## Suggested Readings


1. भारतीयदर्शनपरिचयः - डा.सुशान्त् एस्, 1st edition, August 2015.
2. योगदर्शनम् (प्रत्यक्षानुभूतव्याख्या ) – परमहंसस्वामी श्री आङगडानन्दजी,

श्रीपरमहंसस्वामी श्री आङगडानन्दजी आश्रम

3. The Yogasutra of Patanjali with the commentary of yoga, Bengali Baba. Motilal Banarsidass publishers 1976, 1st Edition
4. पातञ्जलयोगदर्शनम्वाचस्पतिमिश्रविरचित - तत्ववैशारदी
5. പാതഞ്ജലയോഗദർശനം മലയാളവ്യാഖ്യാനസഹിതം – സ്വാമി ജ്ഞാനാനന്ദസരസ്വതി.
6. पातञ्जलयोगदर्शनम्श्रीमद्धारेश्वरभोजदेवविरचितः राजमार्ताण्डविवृत्तिसमेता।

## References


1. पतञ्जलियोगसूत्रम् (व्यासभाष्यसहितम्) MunshiramManoharlal Publications. Pvt. Ltd
2. पातञ्जलयोगदर्शनं, भोजविवृतिसहितं, चौखम्बा अमरभारती प्रकाशन, वाराणसी - २२१००१


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# योगसूत्रे प्रथमोऽध्यायः ३३-५१सूत्राणि, द्वितीयोऽध्यायः१ -११सूत्राणि

## Learning Outcomes

- चित्तप्रसादानधिकृत्य ज्ञानं प्राप्नोति।
- समाधिभेदान् अधिकृत्य ज्ञातुं शक्यते।
- क्लेशानधिकृत्य विस्तरेण जानाति।
- अविद्यालक्षणं, स्वरूपं च अवगन्तुं शक्नोति।

## Background

व्यक्तित्वविकासाय, शोभनव्यक्तित्वाय, सन्तुलितव्यक्तित्वाय, शारीरिकमानसिकशक्तीनां विकासाय योगस्य महत्त्वपूर्णं योगदानं भवति। गुरुपरम्परा योगविद्या भारतवर्षस्य अमूल्यनिधिः वर्तते। सांख्ययोगात् योगदर्शनम् उत्पन्नमिति सांख्यदर्शनसिद्धान्तपक्षः, योगदर्शनं प्रयोगात्मकमिति केषाञ्चनाभिमतं विद्यते। अथ योगानुशासनम् शब्दानामनुशासनं विदधता पातञ्जलये कुर्वता वृत्तिं राजमृगाङ्कसंज्ञकमपि व्यातन्वतावैद्यके अनेन सूत्रेण योगशास्त्रस्य सम्बन्धाभिधेयप्रयोजनान्याख्यायन्ते। पातञ्जलयोगसूत्रवृत्तौ एकचत्वारिंशत् सूत्रे कथितमस्ति – क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः। क्षीणवृत्तयो यस्य तत्क्षीणवृत्ति तस्य ग्रहीतृग्रहणग्राह्येषु आत्मेन्द्रियविषयेषु तत्स्थतदञ्जनता समापत्तिः भवति। इतः परं योगस्य मुख्यफलं पादसमाप्तिपर्यन्तं वक्तव्यम्। संप्रज्ञातस्य फलमुच्यते अस्मिन्सूत्रे, समापत्तिरिति च साक्षात्कारपरिभाषा। स्थूलसूक्ष्मग्राह्योपरक्तं चित्तं तत्र समापन्नं भवति। ग्रहणं च गृह्यतेऽनेनेति व्युत्पत्त्याकरणसामान्यं त्रयोदशविधम्। ग्राह्यं च स्थूल-सूक्ष्म-सूक्ष्मतररूपेण

त्रिविधम्। पञ्चभूतपञ्चतन्मात्रप्रकृतरूपम्। अतोग्रहीत्रादि त्रैविध्येन योगस्य विषयः सर्ववस्तुसंगृहीतमिति सामान्यतः समापतिः उक्ता। स्थूलं कार्यं सूक्ष्मं च तत्कारणम्। प्रकृतिपर्यन्तं चान्यात्सर्वं सूक्ष्मम्।

शब्दार्थज्ञानविकल्पैः संकीर्णासवितर्कासमापत्तिः, तद्यथा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्य विभागेन विभक्तानामपि ग्रहणं दृष्टम्। विभज्यमानां चान्ये शब्दधर्माअन्ये ज्ञानधर्मा इत्येषां विभक्तः पन्थाः। तत्र समापन्नयोगिनो गवाद्यर्थः समाधिप्रज्ञायां समारूढः स चेच्छब्दार्थ-ज्ञानविकल्पानुबुद्धि उपावर्तते सा संकीर्णासमापतिः सवितर्केत्युच्यते । सामान्यतः समापत्तिरुक्ता। सेयमवान्तरभेदाच्चतुर्विधाभवति। विस्तरेण ताः अधिकृत्य वयं पठामः। सुषुप्तिः – प्रलये योगलक्षणस्य अतिव्याप्तिनिवारणाय सम्प्रज्ञातसमाधौ अव्याप्तिदोषनिवारणाय असम्प्रज्ञातसमाधौ निरोधविशेषणत्वेन क्लेशादिपरिपन्थी इति पदं दत्तम्। क्लेशाः पञ्चप्रकाराः भणितं च पतञ्जलिना -" अविद्याऽस्मितारगद्वेषाभिनिवेशाः क्लेशाः" (यो०सू०२-३) इति।

## Keywords

मैत्री- करुणा- मुदिता- चित्तप्रसादनम्- प्रच्छर्दनं- विधारणं- विशोका- वशीकारः- सवितर्कासमापत्तिः- निर्वितर्कासमापत्तिः- सविचारा- निर्विचारा- सबीजःसमाधिः - ऋतम्भरा- प्रज्ञा- निर्बीजःसमाधिः - स्वाध्यायः- ईश्वरप्रणिधानं- क्लेशाः।

## Discussion

चित्तप्रसादः/ चित्तपरिकर्माणि

**मैत्री-करुणा-मुदितोपेक्षाणां सुख-दुःख-पुण्याऽपुण्यविषयाणां भावना तश्चित्तप्रसादनम्। ।३३।**

**व्या०भा०** – तत्र सर्वप्राणिषु सुखसंभोगापन्नेषु मैत्रीं भावयेत्, दुःखितेषु करुणाम्, पुण्यात्मकेषु मुदिताम्, अपुण्यशीलेषूपेक्षाम्। एवमस्य भावयतः शुक्लोधर्म उपजायते। ततश्च चित्तं प्रसीदति, प्रसन्नमेकाग्रं स्थितिपदं लभते॥३३॥

**सूत्रार्थः** -मैत्रीसौहार्दम्। करुणाकृपा। मुदिताहर्षः। उपेक्षा औदासीन्यम्। एता यथाक्रमं सुखितेषु दुःखितेषु पुण्यवत्सु अपुण्यवत्सु च विभावयेत्। तथाहि- सुखितेषु साध्वेषां सुखित्वमिति मैत्रीं कुर्य्यात्, न तु ईर्ष्याम्। नामैषां दुःखनिवृत्तिः स्यादिति कृपामेव कुर्य्यात्, न दुःखितेषु, "ताटस्थ्यम्। पुण्यवत्सु पुण्यानुमोदनेन हर्षमेव कुर्य्यात्, न तु किमेते पुण्यवन्त इति विद्वेषम्। अपुण्यवत्सु चौदासीन्यमेव भावयेत्, नानुमोदनं नवा द्वेषम्। सूत्रे सुख-दुःखादि शब्दैस्तद्वन्तः प्रतिपादिताः। तदेवं मैत्र्यादि-परिकर्मणाचित्ते प्रसीदतिसुखेन समाधेराविर्भावो भवति। पारकर्म चैतद्बाह्यकर्म, यथा गणिते मिश्रकादि व्यवहारोगणित निष्पत्तये सङ्कलितादि कर्मोपकारकत्वेन प्रधानकर्मनिष्पत्तये भवति। एवं द्वेष-रागादि- प्रतिपक्ष भूतमैत्र्यादि भावनया, समुत्पादितप्रसादं चित्तं सम्प्रज्ञातादिसमाधियोग्यं सम्पद्यते। राग-द्वेषावेव मुख्यतया विक्षेपमुत्पादयतः, तौ चेत्समूलमुन्मूलितौ स्याताम्, तदा प्रसन्नत्वान्मनसो भवत्येकाग्रता। ।३३। ।

उपायान्तरमाह

**प्रच्छर्दन-विधारणाभ्यां वा प्राणस्य॥३४॥**

**व्या०भा०** – कौष्ठ्यस्य वायोर्नासिका पुटाभ्यां प्रयत्न विशेषाद्वमनं प्रच्छर्दनम्। विधारणं प्राणायामः। ताभ्यां वा मनसः स्थितिं संपादयेत्॥३४॥

**सूत्रार्थः** –प्रच्छर्दनं यत्कौष्ठ्यस्य वायोः प्रयत्न विशेषान्मात्रा प्रमाणेन बहिर्निःसारणम्। विधारणं मात्रा प्रमाणेनैव प्राणस्य वायोर्गतिविच्छेदः स च द्वाभ्यां प्रकाराभ्याम्, बाह्याभ्यन्तरापूरणेन पूरितस्य वायोस्तत्रैव निरोधेन। तदेवं रेचक- पूरक- कुम्भकभेदेन त्रिविधः प्राणायामः चित्तस्य स्थितिमेकाग्रतायां निबध्नाति सर्वासामिन्द्रियवृत्तीनां प्राणवृत्तिपूर्वकत्वात्। मनः प्राणयोश्च स्वस्वव्यापारे परस्परमेकयोगक्षेमत्वाज्जीयमानः प्राणः समस्तेन्द्रियवृत्तिनिरोधद्वारेण चित्तस्यैकाग्रतायां प्रभवति। समस्तदोष क्षयकारित्वञ्चस्यागमे श्रूयते। दोषकृताश्च सर्वा विक्षेपवृत्तयः। अतोदोषनिर्हरणद्वारेणाप्यस्यैकाग्रतायां सामर्थ्यम्। ।३४। ।

संप्रज्ञातसमाधेः पूर्वाङ्गं कथयति

**विषयवती वा प्रवृत्तिरुत्पन्नास्थितिनिबन्धिनी। ।३५। ।**

व्या०भा०- नासिकाग्रे धारयतोऽस्य यादिव्यगन्ध संवित् सा गन्धप्रवृत्तिः। जिह्वाग्रे रससंवित्। तालुनिरूपसंवित्। जिह्वामध्ये स्पर्शसंवित्। जिह्वामूले शब्दसंविदित्येतावृत्तय उत्पन्नाश्चित्तं स्थितौ निबध्नन्ति, संशयं विधमन्ति, समाधिप्रज्ञायां च द्वारी भवन्तीति। एते न चन्द्रादित्यग्रहमणि-प्रदीपरश्म्यादिषु प्रवृत्तिरुत्पन्नाविषयवत्येव वेदितव्या।

यद्यपि हि तत्तच्छास्त्रानुमानाचार्योपदेशैरवगतमर्थतत्त्वं सद्भूतमेव भवति, एतेषां यथा भूतार्थ प्रतिपादनसामर्थ्यात्, तथापि यावदेकदेशोऽपि कश्चिन्नस्वकरणसंवेद्यो भवति तावत्सर्वं परोक्षमिवापवर्गादिषु सूक्ष्मेष्वर्थेषु न दृढां बुद्धिमुत्पादयति। तस्माच्छास्त्रानुमानाचार्योपदेशोपोद्बलनार्थमेवावश्यं कश्चिदर्थविशेषः प्रत्यक्षीकर्तव्यः। तत्र तदुपदिष्टार्थैकदेशप्रत्यक्षत्वे सति सर्वं सुसूक्ष्मविषयमपि आपवर्गाच्छ्रद्धीयते। एतदर्थमेवेदं चित्तपरिकर्म निर्दिश्यते। अनियतासु वृत्तिषु तद्विषयायां

वशीकारसंज्ञायामुपजातायां चित्तं समर्थं स्यात्तस्य तस्यार्थस्य प्रत्यक्षीकरणायेति। तथा च सति श्रद्धावीर्यस्मृतिसमाधयोऽस्या-प्रतिबन्धेन भविष्यन्तीति॥३५॥

**सूत्रार्थः –** मनस इति वाक्यशेषः। विषयाः गन्ध-रस-रूप-स्पर्शशब्दाः, ते विद्यन्ते फलत्वेन यस्याः सा विषयवती प्रवृत्तिर्मनसः स्थैर्यं करोति। तथाहि, नासाग्रे चित्तं धारयतोदिव्य गन्धसंविदुपजायते। तादृश्येव जिह्वाग्रे रससंवित्। ताल्वग्रे रूपसंवित्। जिह्वामध्ये स्पर्शसंवित्। तस्मिन्जिह्वामूले शब्दसंवित्। तदेवं तत्तदिन्द्रियद्वारेण तस्मिन्दिव्ये विषये जायमाना संवित्चित्तस्यैकाग्रताया हेतुर्भवति, अस्ति योगस्य फलमिति योगिनः समाश्वासोत्पादनात्॥३५॥

**विशोका वा ज्योतिष्मती ।३६। ।**

व्या०भा० – प्रवृत्तिरुत्पन्ना मनसः स्थिति निबन्धनीत्यनुवर्तते। हृदयपुण्डरीके धारयतो या बुद्धिसंवित्, बुद्धिसत्त्वं हि भास्वरमाकाशकल्पं, तत्र स्थिति वैशारद्यात्प्रवृत्तिः सूर्येन्दुग्रहमणिप्रभा- रूपाकारेण विकल्पते। तथाऽस्मितायां समापन्नं चित्तं निस्तरङ्गमहोदधिकल्पं शान्तमनन्तम् अस्मितामात्रं भवति। यत्रेदमुक्तम् तम् अणुमात्रमात्मानम् अनुविद्यास्मीत्येवं तावत् संप्रजानीत इति। एषा द्वयीविशोकाविषयवती, अस्मिता मात्रा च प्रवृत्तिर्ज्योतिष्मतीत्युच्यते। यया योगिनश्चित्तं स्थितिपदं लभत इति॥३६॥

**सूत्रार्थः –** प्रवृत्तिरुत्पन्नाचित्तस्य स्थितिनिबन्धिनीति वाक्यशेषः। ज्योतिः शब्देन सात्त्विकः प्रकाश उच्यते, स प्रशस्तो भूयानतिशयवांश्च विद्यते यस्याः साज्योतिष्मती प्रवृत्तिः। विशोकाविगतः सुखमयसत्त्वाभ्यासवशाच्छोको रजःपरिणामो

यस्याः सा [विशोका] चेतसः स्थितिनिबन्धिनी। अयमर्थः- हृत्पद्मसम्पुटमध्ये प्रशान्तकल्लोल क्षीरोदधि प्रख्यं चित्तसत्त्वं भावयतः प्रज्ञा लोकात्सर्ववृत्तिपरिक्षये चेतसः स्थैर्य्यमुत्पद्यते। ।३६।

संप्रज्ञातसमाधेः विषयं दर्शयति

**वीतरागविषयं वा चित्तम्। ।३७॥**

**व्या०भा० -** वीतरागचित्तालम्बनो परक्तं वा योगिनश्चित्तं स्थितिपदं लभत इति॥३७॥

**सूत्रार्थः –** मनसः स्थितिनिबन्धनं भवतीति वाक्यशेषः। वीतरागः परित्यक्तविषयाभिलाषः, तस्य यश्चित्तं परिहृतक्लेशं तदालम्बनीकृतं चेतसः स्थिति हेतुर्भवति। ।३७। ।

**स्वप्ननिद्राज्ञानालम्बनं वा॥३८॥**

**व्या०भा० –**स्वप्नज्ञानालम्बनं वा निद्राज्ञानालम्बनं वा तदाकारं योगिनश्चित्तं स्थितिपदं लभत इति॥३८॥

**सूत्रार्थः –** प्रत्यस्तमितबाह्येन्द्रियवृत्तेर्मनोमात्रेणैव यत्र भोक्तृत्वमात्मनः सस्वप्नः। निद्रापूर्वोक्त लक्षणा। तदालम्बनं स्वप्नालम्बनं निद्रालम्बनं वा ज्ञानमालम्ब्यमानं चेतसः स्थितिं करोति। ।३८। ।

ध्यानेनापि भवति इष्टसिद्धिः

**यथाभिमतध्यानाद्वा॥३९॥**

**व्या०भा० –** यदेवाभिमतं तदेव ध्यायेत्। तत्र लब्धस्थितिकमन्यत्रापि स्थितिपदं लभत इति॥३९॥

**सूत्रार्थः -** यथाऽभिमतवस्तुनि बाह्ये चन्द्रादावाभ्यन्तरे नाडीचक्रादौ वा भाव्यमाने चेतः स्थिरीभवति। ।३९। ।

**परमाणु-परममहत्त्वान्तोऽस्य वशीकारः॥४०॥**

संप्रज्ञातसमाधेः फलम्

**व्या०भा० -** सूक्ष्मे निविशमानस्य परमाण्वन्तं स्थितिपदं लभत इति। स्थूले निविशमानस्य परममहत्त्वान्तं स्थितिपदं चित्तस्य। एवं तामुभयीं कोटिमनुधावतो योऽस्याप्रतीघातः स परो वशीकारः। तद्वशीकारात्परिपूर्णं योगिनश्चित्तं न पुनरभ्यासकृतं परिकर्मापेक्षत इति॥४०॥

**सूत्रार्थः –** एभिरुपायै श्चित्तस्य स्थैर्यं भावयतो योगिनः सूक्ष्मविषयभावनाद्वारेण परमाण्वन्तो वशीकारोऽप्रतिघातरूपो जायते, न क्वचित्परमाणुपर्यन्ते सूक्ष्मे विषयेऽस्य मनःप्रतिहन्यत इत्यर्थः। एवं स्थूलमाकाशादि परममहत्वपर्य्यन्तं भावयतो न क्वचिच्चेतसः प्रतिघात उत्पद्यते। सर्वत्र स्वातन्त्र्यं भवतीत्यर्थः॥४०॥

चेतसः रूपं कीदृशी इत्याह

**क्षीणवृत्तेरभिजातस्यैव मणेर्ग्रहीतृ-ग्रहण-ग्राह्येषु तत्स्थतदञ्जनता समापत्तिः॥४१॥**

**व्या०भा०-**क्षीणवृत्तेरिति प्रत्यस्तमित प्रत्ययस्येत्यर्थः। अभिजातस्येव मणेरिति दृष्टान्तोपादानम्। यथास्फटिक उपाश्रय भेदात्तत्तद्रूपोपरक्त उपाश्रयरूपाकारेण निर्भासते तथा ग्राह्यालम्बनोपरक्तं चित्तं ग्राह्यसमापन्नं ग्राह्यस्वरूपाकारेण निर्भासते। तथा भूतसूक्ष्मोपरक्तं भूतसूक्ष्मसमापन्नं भूतसूक्ष्मस्वरूपाभासं भवति। तथा स्थूलालम्बनोपरक्तं स्थूलरूपसमापन्नं स्थूलरूपाभासं भवति। तथाविश्वभेदो परक्तं विश्वभेदसमापन्नं विश्वरूपाभासं भवति।

तथा ग्रहणेष्वपीन्द्रियेषु द्रष्टव्यम्। ग्रहणालम्बनोपरक्तं ग्रहणसमापन्नं ग्रहणस्वरूपाकारेण निर्भासते। तथा ग्रहीतृपुरुषालम्बनोपरक्तं ग्रहीतृपुरुषसमापन्नं ग्रहीतृपुरुषस्वरूपाकारेण निर्भासते। तथा मुक्तपुरुषालम्बनो परक्तं मुक्तपुरुषसमापन्नं मुक्तपुरुषस्वरूपाकारेण निर्भासत इति। तदेवमभिजात मणिकल्पस्य चेतसो ग्रहीतृग्रहणग्राह्येषु

पुरुषेन्द्रियभूतेषु यातत्स्थतदञ्जनता तेषुस्थितस्य तदाकारापत्तिः सा समापत्तिरित्युच्यते॥४१॥

**सूत्रार्थः** – क्षीणावृत्तयो यस्य स क्षीणवृत्तिः तस्य ग्रहीतृ-ग्रहण-ग्राह्येषु आत्मेन्द्रियविषयेषु ततस्थ-तदञ्जनता समापत्तिर्भवति। ततस्थत्वं तत्र एकाग्रता। तदञ्जनता तन्मयत्वम्। न्यग्भूते चित्ते विषयस्य भाव्यमानस्यैवोत्कर्षः। तथाविधा समापत्तिः, तद्रूपः परिणामो भवतीत्यर्थः, दृष्टान्तमाह- अभिजातस्येव मणेरिति। यथा अभिजातस्य- निर्मलस्य स्फटिकमणेस्तत्तदुपाधिवशात् तत्तद्रूपापत्तिः, एवभिजातस्य निर्मलस्य चित्तस्य तत्तद्भावनीयवस्तूपरागात् तद्रूपापत्तिः) एवं निर्मलस्य चित्तस्य तत्तद्भावनीय वस्तूपरागात् तत्तद्रूपापत्तिः। यद्यपि ग्रहीतृ-ग्रहण-ग्राह्येषु इत्युक्तम्, तथापि भूमिका क्रमवशाद्ग्राह्य-ग्रहण-ग्रहीतृषु इति बोध्यम्। यतः प्रथमं ग्राह्यनिष्ठ एव समाधिः, ततो ग्रहणनिष्ठः, ततोऽस्मितामात्ररूपो ग्रहीतृनिष्ठः, केवलस्य पुरुषस्य ग्रहीतुर्भाव्यत्वासम्भवात्। ततश्च स्थूल-सूक्ष्मग्राह्यो परक्तं चित्तं तत्र समापन्नं भवति। एवं ग्रहणेग्रहीतरि च समापन्नं बोद्धव्यम्। ।४१। ।

**तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः॥४२॥**

समापत्तेः चातुर्विध्यम्

**व्या०भा०** - तद्यथा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यविभागेन विभक्तानामपि ग्रहणं दृष्टम्। विभज्यमानाश्चाऽन्ये शब्दधर्माअन्येऽर्थधर्मा अन्ये ज्ञानधर्मा इत्येतेषां विभक्तः पन्थाः। तत्र समापन्नस्य योगिनो योगवाद्यर्थः समाधिप्रज्ञायां समारूढः स चेच्छब्दार्थ ज्ञानविकल्पानुविद्ध उपावर्तते सा संकीर्णासमापत्तिः सवितर्केत्युच्यते॥४२॥

**सूत्रार्थः** – श्रोत्रेन्द्रियग्राह्यः स्फोटरूपो वा शब्दः। अर्थो जात्यादिः। ज्ञानं सत्त्वप्रधाना बुद्धिवृत्तिः। विकल्प उक्तलक्षणः। तैः सङ्कीर्णा; यस्याम् एते शब्दादयस्त्रयः परस्पराध्यासेन विकल्परूपेणप्र तिभासन्ते, गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानम् इत्यनेनाकारेण सासवितर्का समापत्तिरुच्यते। ।४२। ।

**स्मृतिपरिशुद्धौ स्वरूपशून्येवाऽर्थमात्रनिर्भासा निर्वितर्का ॥४३॥**

निर्वितर्कासमापत्तिः

**व्या०भा०** – या शब्दसंकेत श्रुतानुमानज्ञानविकल्पस्मृति परिशुद्धौ ग्राह्यस्वरूपो परक्ताप्रज्ञास्वमिव प्रज्ञास्वरूपं ग्रहणात्मकं त्यक्त्वापदार्थ मात्रस्वरूपाग्राह्यस्वरूपापन्नेव भवति सा निर्वितर्कासमापत्तिः। तथा च व्याख्यातम्। तस्या एक बुद्ध्युपक्रमो ह्यर्थात्माऽणुप्रचयविशेषात्मा गवादिर्घटादिर्वा लोकः। स च संस्थानविशेषो भूतसूक्ष्माणां साधारणोधर्म आत्मभूतः, फलेन व्यक्तेनानुमितः स्वव्यञ्जकाञ्जनः प्रादुर्भवति, धर्मान्तरस्य कपालादेरुदये च तिरो भवति। स एष धर्मोऽवयवीत्युच्यते। योऽसावेकश्च महांश्चाणीयांश्च स्पर्शवांश्च क्रियाधर्मकश्चानित्यश्चतेनावयविना व्यवहाराः क्रियन्ते।

यस्य पुनरवस्तुकः स प्रचयविशेषः सूक्ष्मं च कारणमनुपलभ्यमविकल्पस्य तस्यावयव्य भावादतद्रूपप्रतिष्ठं मिथ्याज्ञानमिति प्रायेण सर्वमेव प्राप्तं मिथ्याज्ञानमिति। तदा च सम्यग्ज्ञानमपि किं स्याद्विषयाभावात्। यद्यदुपलभ्यते तत्तदवयवित्वेनाम्नातम्। तस्मादस्त्यवयवी यो महत्त्वादि व्यवहारापन्नः समापत्तेर्निर्वितर्का या विषयो भवति॥४३॥

**सूत्रार्थः** – शब्दार्थस्मृतिप्रविलये सति प्रत्युदितस्पष्टग्राह्याकार प्रतिभासिततयान्यग्भूतज्ञानां शत्वेन स्वरूपशून्येव निर्वितर्कासमापत्तिः॥४३॥

**एतयैव सविचारानिर्विचारा च सूक्ष्मविषया व्याख्याता॥४४॥**

व्या०भा० – तत्र भूतसूक्ष्मेष्वभिव्यक्तधर्मकेषु देशकालनिमित्तानुभवावच्छिन्नेषु यासमापत्तिः सा सविचारेत्युच्यते। तत्राप्येकबुद्धिनिर्ग्राह्यमेवोदितधर्मविशिष्टं भूतसूक्ष्ममालम्बनीभूतं समाधिप्रज्ञायामुपतिष्ठते।

सविचारासमापत्तिः, निर्विचारासमापत्तिः

या पुनः सर्वथा सर्वतः शान्तोदिता व्यपदेश्य धर्मानवच्छिन्नेषु सर्वधर्मानुपातिषु सर्वधर्मात्मकेषु समापत्तिः सा निर्विचारेत्युच्यते। एवं स्वरूपं हि तद्भूतसूक्ष्ममेतेनैव स्वरूपेणालम्बनीभूतमेव समाधिप्रज्ञा स्वरूपमुपरञ्जयति। प्रज्ञा च स्वरूपशून्येवार्थमात्रा यदा भवति तदा निर्विचारेत्युच्यते। तत्र महद्वस्तु विषया सवितर्का निर्वितर्का च, सूक्ष्मवस्तुविषया स विचारानिर्विचारा च। एवमुभयोरेतयैव निर्वितर्कया विकल्पहानिर्व्याख्यातेति॥४४॥

**सूत्रार्थः** - एतयैव-सवितर्कया निर्वितर्कया च समापत्त्या सविचारा निर्विचारा च व्याख्याता। कीदृशी सूक्ष्मविषया- सूक्ष्मः तन्मात्रेन्द्रियादिर्विषयो यस्याः सा तथोक्ता। एतेन पूर्वस्याः स्थूलविषयत्वं प्रतिपादितं भवति। सा हि महाभूतेन्द्रियालम्बना। शब्दार्थविषयत्वेन शब्दार्थविकल्पसहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोऽर्थः प्रतिभात्ति यस्यां सा सविचारा। देशकालधर्मादिरहितो धर्मिमात्रतया सूक्ष्मार्थस्तन्मात्रेन्द्रियरूपः प्रतिभाति यस्यां सा निर्विचारा।॥४४॥

**सूक्ष्मविषयत्वञ्चालिङ्गपर्य्यवसानम् ॥४५॥**

किं पर्यन्तः सूक्ष्मविषयः

**व्या०भा०** – पार्थिवस्याणोर्गन्धतन्मात्रं सूक्ष्मो विषयः, आप्यस्य रसतन्मात्रम्, तैजसस्य रूपतन्मात्रम्, वायवीयस्य स्पर्शतन्मात्रम्, आकाशस्य शब्दतन्मात्रमिति। तेषामहंकारः। अस्यापि लिङ्गमात्रं सूक्ष्मोविषयः। लिङ्गमात्रस्याप्यलिङ्गं सूक्ष्मोविषयः। न चालिङ्गात्परं सूक्ष्ममस्ति। नन्वस्ति पुरुषः

सूक्ष्म इति? सत्यम्। यथा लिङ्गात्परमलिङ्गस्य सौक्ष्म्यं न चैवं पुरुषस्य। किन्तु लिङ्गस्यान्वयिकारणं पुरुषो न भवति, हेतुस्तु भवतीति। अतः प्रधाने सौक्ष्म्यं निरतिशयं व्याख्यातम्। ।४५॥

**सूत्रार्थः** - सविचार-निर्विचारयोः समापत्त्योर्यत्सूक्ष्म-विषयत्वमुक्तं तदलिङ्गपर्य्यवसानम्। न क्वचित्लीयते, न किञ्चित्लिङ्गतिगमयतीत्यलिङ्गप्रधानम्, तत्पर्य्यन्तं सूक्ष्मविषयत्वम्। तथाहि-गुणानां परिणामे चत्वारिपर्वाणि विशिष्टलिङ्गम्, अविशिष्टलिङ्गं, लिङ्गमात्रम्, अलिङ्गं चेति। विशिष्टलिङ्गं भूतानि, अविशिष्टलिङ्गं तन्मात्रेन्द्रियाणि, लिङ्गमात्रं बुद्धिः। अलिङ्गं प्रधानमिति। नातःपरं सूक्ष्ममस्तीत्युक्तं भवति॥४५॥

**ता एव सबीजः समाधिः॥४६॥**

समापत्तीनां प्रकृते प्रयोजनमाह

**व्या०भा०** – ताश्च तस्रः समापत्तयो बहिर्वस्तुबीजा इति समाधिरपि स बीजः। तत्र स्थूलेऽर्थे सवितर्को निर्वितर्कः, सूक्ष्मेऽर्थे सविचारो निर्विचार इति चतुर्थोपसंख्यातः समाधिरिति॥४६॥

**सूत्रार्थः** – ता एव उक्तलक्षणाः समापत्तयः, सह बीजेनालम्बनेन वर्त्तत इति स बीजः सम्प्रज्ञातः समाधिरित्युच्यते, सर्वासां सालम्बनत्वात्। ।४६। ।

**निर्विचारवैशारद्येऽध्यात्मप्रसादः॥४७॥**

निर्विचारायाः फलम्

**व्या०भा०** –अशुद्ध्यावरणमलापेतस्य प्रकाशात्मनो बुद्धिसत्त्वस्य रजस्तमोभ्यामनभिभूतः स्वच्छः स्थितिप्रवाहो वैशारद्यम्। यदा निर्विचारस्य समाधेर्वैशारद्यमिदं जायते तदा

योगिनो भवत्यध्यात्म प्रसादो भूतार्थविषयः क्रमाननुरोधीस्फुटः प्रज्ञालोकः॥४७॥

**सूत्रार्थः** – निर्विचारत्वं व्याख्यातम् (११४४), वैशारद्यं नैर्मल्यम्। सवितर्कास्थूलविषयामपेक्ष्य निर्वितर्कायाः प्राधान्यम्। ततोऽपि सूक्ष्मविषयायाः सविचारायाः। ततोऽपि निर्विचारायाः। तस्यास्तु निर्विकल्परूपायाप्रकृष्टाभ्यास वशात्वैशारद्येनैर्मल्ये सत्यध्यात्मप्रसादः समुपजायते। चित्तं क्लेशवासना रहितं स्थिरप्रवाहयोग्यं भवति। एतदेव चित्तस्य वैशारद्यं यत्स्थितौ दार्ढ्यम्। ४७॥

**ऋतम्भरा तत्र प्रज्ञा। ।४८॥**

**व्या०भा०** – तस्मिन्समाहितचित्तस्य या प्रज्ञा जायते तस्या ऋतम्भरेतिसंज्ञा भवति। अन्वर्था च सा, सत्यमेव बिभर्ति। न च तत्र विपर्यास ज्ञानगन्धोऽप्यस्तीति॥४८॥

**सूत्रार्थः** - ऋतं सत्यं विभर्त्ति कदाचिदपि न विपर्ययेणाच्छाद्यते, सा ऋतम्भरा प्रज्ञा तस्मिन्भवतीत्यर्थः।। तस्माच्च प्रज्ञा लोकात्सर्वं यथा वत्पश्यन्योगीप्रकृष्टं योगं प्राप्नोति। ।४८। ।

**श्रुतानुमान-प्रज्ञाभ्यां सामान्यविषया, विशेषार्थत्वात्॥४९॥**

अस्याः प्रज्ञान्तराद्वैलक्षण्यम्

**व्या०भा०-** श्रुतमागमविज्ञानं तत्सामान्यविषयम्। न ह्यागमेन शक्यो विशेषोऽभिधातुम्। कस्मात् ? न हि विशेषेण कृतसंकेतः शब्द इति। तथानुमानं सामान्यविषयमेव। यत्र प्राप्तिस्तत्र गतिर्यत्र न प्राप्तिस्तत्र न गतिरित्युक्तम्। अनुमानेन च सामान्येनोपसंहारः। तस्माच्छ्रुतानुमानविषयो न विशेषः कश्चिदस्तीति।

न चास्य सूक्ष्मव्यवहित विप्रकृष्टस्य वस्तुनो लोकप्रत्यक्षेण ग्रहणमस्ति। न चास्य विशेषस्याप्रमाणकस्याभावोऽस्तीति समाधिप्रज्ञा निहार्या एव सविशेषा भवति भूतसूक्ष्मगतो वा पुरुषगतो वा। तस्माच्छ्रुतानुमान प्रज्ञाभ्यामन्यविषया सा प्रज्ञाविशेषार्थत्वादिति॥४९॥

**सूत्रार्थः** - श्रुतमागमज्ञानम्, अनुमानमुक्तलक्षणम् (१।७); ताभ्यां या जायते प्रज्ञा सासामान्य विषया। न हि शब्द लिङ्गयोरिन्द्रियवद्विशेष प्रतिपत्तौ सामर्थ्यम्। इयं पुनर्निर्विचारवैशारद्यसमुद्भवाप्रज्ञाताभ्यां विलक्षणाविशेष विषयत्वात्। अस्यां हि प्रज्ञायां सूक्ष्म-व्यवहित विप्रकृष्टानामपि विशेषः स्फुटेनैव रूपेण प्रतिभासते। अतस्तस्यामेव योगिनापरः प्रयत्नः कर्त्तव्य इत्युपदिष्टं भवति। ।४९॥

**तज्जः संस्कारोऽन्यसंस्कारप्रतिवन्धी। ।५०। ।**

प्रज्ञायाः फलम्

व्या०भा०- समाधिप्रज्ञा प्रभवः संस्कारो व्युत्थानसंस्काराशयं बाधते। व्युत्थान संस्काराभिभवात्तत्प्रभवाःप्रत्ययानभवन्ति। प्रत्ययनिरोधे समाधिरुपतिष्ठते। ततः समाधिजा प्रज्ञा, ततः प्रज्ञाकृताः संस्कारा इति नवोनवः संस्काराशयो जायते। ततश्च प्रज्ञा ततश्च संस्कारा इति।

कथमसौ संस्काराशयश्चित्तं साधिकारं न करिष्यतीति। न ते प्रज्ञाकृताः संस्काराः क्लेशक्षय- हेतुत्वाच्चित्तमधिकारविशिष्टं कुर्वन्ति। चित्तं हि ते स्वकार्यादवसादयन्ति। ख्यातिपर्यवसानं हि चित्तचेष्टितमिति॥५०॥

असम्प्रज्ञात समाधिः /

**सूत्रार्थः** – तया प्रज्ञया जनितो यः संस्कारः सोऽन्यान् संस्कारान् व्युत्थानजान् समाधिजांश्च संस्कारान् प्रतिबध्नाति, स्वकार्यकरणौ क्षमान् करोतीत्यर्थः। यतस्तत्त्वरूपतयाऽनया जनिताः संस्काराबलवत्त्वादेतत्त्वरूपप्रज्ञाजनितान् संस्कारान् बाधितुं शक्नुवन्ति। अतस्तामेव प्रज्ञाभ्यसेदित्युक्तं भवति।।५०।।

**तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः। ।५१। ।**

**व्या०भा०-** स न केवलं समाधिप्रज्ञाविरोधी, प्रज्ञाकृतानां संस्काराणामपि प्रतिबन्धी भवति। कस्मात् ? निरोधजः संस्कारः समाधिजान् संस्कारान् बाधत इति। निरोधस्थितिकालक्रमानुभवेन निरोधचित्तकृतसंस्कारास्तित्वम् अनुमेयम्। व्युत्थाननिरोधसमाधि- प्रभवैः सह कैवल्यभागीयैः संस्कारैश्चित्तं स्वस्यां प्रकृताववस्थितायां प्रविलीयते, तस्मात्ते संस्काराश्चित्तस्याधिकारविरोधिनो न स्थितिहेतवो, यस्मादवसिताधिकारं सह कैवल्यभागीयैः संस्कारैश्चित्तं निवर्तते, तस्मिन्निवृत्ते पुरुषः स्वरूपमात्रप्रतिष्ठोऽतः शुद्धः केवलो मुक्त इत्युच्यत इति। ।५१। ।

**सूत्रार्थः –** तस्यापि सम्प्रज्ञातस्य निरोधे विलये सति सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयाद्यासंस्कारमात्रा वृत्तिरुदेति, तस्यां 'नेतिनेति' केवलं पर्युदसनान्निर्बीजः समाधिराविर्भवति, यस्मिन्सति पुरुषः स्वरूपनिष्ठः शुद्धो भवति॥५१। ।

**इति प्रथमः समाधिपादः समाप्तः।**

**उद्दिष्टः समाहितचित्तस्य योगः। कथं व्युत्थितचित्तोऽपि योगयुक्तः स्यादित्येतदारभ्यते।**

**तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः॥१॥**

क्रियायोगः

**व्या०भा० –** ना तपस्विनो योगः सिध्यति। अनादिकर्मक्लेशवासनाचित्रा प्रत्युपस्थितविषयजाला चाशुद्धिर्नान्तरेणतपः संभेदमापद्यत इति तपस उपादानम्। तच्च चित्तप्रसादनमबाध्यमानमनेनासेव्यमिति मन्यते। स्वाध्यायः प्रणवादि पवित्राणां जपो मोक्षशास्त्राध्ययनं वा। ईश्वरप्रणिधानं सर्वक्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा॥१॥

**सूत्रार्थः** – तपः शास्त्रान्तरोपदिष्टं चान्द्रायणादि। स्वाध्यायः प्रणवपूर्वाणां मन्त्राणां जपः। ईश्वरप्रणिधानं सर्वक्रियाणां तस्मिन्परमगुरौ फलनिरपेक्षतया समर्पणम्। एतानि क्रियायोग इत्युच्यते।।१।।

**समाधिभावनार्थः क्लेशुतनूकरणार्थश्च। ।२। ।**

क्रियायोगः किमर्थमित्याह

**व्या०भा०** – स ह्यासेव्यमानः समाधिं भावयति क्लेशांश्च प्रतनूकरोति। प्रतनूकृतान् क्लेशान् प्रसंख्यानाग्निना दग्धबीजकल्पान प्रसवधर्मिणः करिष्यतीति। तेषां तनूकरणात्पुनः क्लेशैरपरामृष्टः सत्त्वपुरुषान्यतामात्रख्यातिः सूक्ष्माप्रज्ञासमाप्ताधिकाराप्रतिप्रसवाय कल्पयिष्यत इति॥२॥

**सूत्रार्थः** - क्लेशावक्ष्यमाणाः, तेषां तनूकरणं स्वकार्यकरण-प्रतिबन्धः, समाधिरुक्तलक्षणः (१।१७), तस्य भावनाचेतसि पुनः पुनर्निवेशनम्सा अर्थः प्रयोजनं यस्य स तथोक्तः। एतदुक्तं भवति – एते तपः प्रभृतयोऽभ्यस्यमानाश्चित्तगतान् अविद्यादीन् क्लेशान् शिथिलीकुर्वन्तः समाधेरुपकारकतां भजन्ते। तस्मात्प्रथमतः क्रियायोगावधारणपरेणयोगिना भवितव्यम् इत्युपदिष्टम्। ।२। ।

**अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः। ।३। ।**

के क्लेशाः

**व्या०भा०** – क्लेशा इति पञ्चविपर्यया इत्यर्थः। तेस्यन्दमानागुणाधिकारं द्रढयन्ति, परिणामम् अवस्थापयन्ति, कार्यकारणस्रोत उन्नमयन्ति, परस्परानुग्रहतन्त्री भूत्वाकर्मविपाकं चाभिनिर्हरन्तीति॥३॥

**सूत्रार्थः** – क्लेशा अविद्यादयो वक्ष्यमाणलक्षणाः पञ्च, ते च बाधनालक्षणं परितापमुपजनयन्तः 'क्लेशाः' क्लेशशब्दवाच्या

भवन्ति। ते हि चेतसि प्रवर्त्तमानाः संसारलक्षणं गुणपरिणामं द्रढयन्ति। ।३। ।

अविद्यायाः प्राधान्यं प्रतिपादयति

**अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनु विच्छिन्नोदाराणाम्।।४।**

व्या०भा० – अत्राविद्याक्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनां चतुर्विध विकल्पानां, प्रसुप्ततनुविच्छिन्नोदाराणाम्। तत्र का प्रसुप्तिः ? चेतसि शक्तिमात्रप्रतिष्ठानां बीजभावोपगमः, तस्य प्रबोध आलम्बने संमुखीभावः। प्रसंख्यानवतो दग्धक्लेशबीजस्य संमुखीभूतेऽप्यालम्बनेनासौ पुनरस्ति, दग्धबीजस्य कुतः प्ररोह इति, अतः क्षीणक्लेशः कुशलश्च रमदेह इत्युच्यते। तत्रैव सा दग्धबीजभावापञ्चमीक्लेशावस्थानान् यत्रेति। सतां क्लेशानां तदाबीजसामर्थ्यं दग्धमिति। विषयस्य संमुखीभावेऽपि सति न भवेत्येषां प्रबोध इति उक्ता प्रसुप्तिः, दग्धबीजानामप्ररोहश्च।

तनु त्वमुच्यते प्रतिपक्षभावनोपहताः क्लेशास्तनवो भवन्ति। तथाविच्छिद्यविच्छिद्य तेनतेनात्मना पुनः पुनः समुदाचरन्तीति विच्छिन्नाः। कथम् ? रागकाले क्रोधस्यादर्शनात्, नहि रागकाले क्रोधः समुदाचरति। रागश्च क्वचिद्दृश्यमानो न विषयान्तरे नास्ति। नैकस्यां स्त्रियां चैत्रोरक्त इत्यन्यासु स्त्रीषु विरक्तः, किन्तु तत्र रागो लब्धवृत्तिरन्यत्र तु भविष्यद् वृत्तिरिति। स हि तदा प्रसुप्त तनुविच्छिन्नो भवति। विषये यो लब्धवृत्तिः स उदारः। सर्व एवैते क्लेशविषयत्वं नातिक्रामन्ति। कस्तर्हि विच्छिन्नः प्रसुप्ततनुरुदारो वा क्लेश इत्युच्यते सत्यमेवैतत्। किन्तु विशिष्टानामेवैतेषां विच्छिन्नादित्वम्। यथैव प्रतिपक्षभावनातो निवृत्तस्तथैव स्वव्यञ्जकाञ्जनेनाभिव्यक्त इति। सर्व एवामी क्लेशा अविद्याभेदाः। कस्मात्? सर्वेष्वविद्यैवास्ति। यदविद्ययावस्त्वाकार्यते तदेवानुशेरते क्लेशाविपर्यास

प्रत्ययकाल उपलभ्यन्ते, क्षीयमाणां चा विद्यामनुक्षीयन्त इति॥४॥

**सूत्रार्थः** - अविद्यामोहः, अनात्मन्यात्माभिमान इति यावत्। सा क्षेत्रं प्रसवभूमिः उत्तरमेषामस्मितादीनां प्रत्येकं प्रसुप्ततन्वादिभेदेन चतुर्विधानाम्। अतो यत्राविद्या विपर्ययज्ञानरूपाशिथिली भवति, तत्र क्लेशानामस्मितादीनां नोद्भवो दृश्यते। विपर्यय ज्ञानसद्भावे च तेषामुद्भवदर्शनात्, स्थितमेव मूलभूतत्वमविद्यायाः। प्रसुप्त-तनु-विच्छिन्नोदाराणामिति। तत्र ये क्लेशाश्चित्तभूमौ स्थिताः प्रबोधकाभावे स्वकार्य्यं नारभन्ते, ते प्रसुप्ता इत्युच्यन्ते। यथा बालावस्थायां बालस्य हि वासनारूपाः स्थिताः अपि क्लेशाः प्रबोधक सहकार्य्यभावेनाभिव्यज्यन्ते। ते तनवो ये स्वस्वप्रतिपक्षभावनया शिथिलीकृतकार्य्यसम्पादनशक्तयो वासनाऽवशेषतया चेतस्यवस्थिताः प्रभूतां सामग्रीमन्तरेण स्वकार्यमारब्धुमक्षमाः यथाभ्यासवतो योगिनः। ते विच्छिन्नायेन केनचिद्बलवताक्लेशे नाभिभूतशक्तयस्तिष्ठन्ति, यथा द्वेषावस्थायां रागः, रागावस्थायां वा द्वेषः, न ह्यनयोः परस्परविरुद्धयोर्युगपत्सम्भवोऽस्ति। ते उदाराये प्राप्तसहकारिसन्निधयः स्वं स्वं कार्य्यमभिनिर्वर्त्तयन्ति, यथा सदैव योगपरिपन्थिनो व्युत्थानदशायाम्। एषां प्रत्येकं चतुर्विधानामपि मूलभूतत्वेन स्थिताऽप्यविद्याऽस्वरूपम् उपलभ्यते। तस्याञ्च मिथ्याभूतायामविद्यायां सम्यग्ज्ञानेन निवर्त्तितायां दग्धबीजकल्पनां एषां न क्वचित्प्ररोहोऽस्तीति। अविद्यानिमित्तत्वमविद्यान्वयश्चैतेषां निश्चीयते। अतः सर्वेऽपि अविद्याव्यपदेशभाजः। सर्वेषां च क्लेशानां चित्तविक्षेपकारित्वाद्योगिना प्रथममेव तदुच्छेदे यत्नः कार्य इति॥४॥

अविद्यास्वरूपम्

**अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या। ।५।।**

**व्या०भा० –** अनित्ये कार्ये नित्यख्यातिः तद्यथा ध्रुवा पृथिवी, ध्रुवा सचन्द्रतारकाद्यौः, अमृता दिवौकस इति। तथाऽशुचौ परमबीभत्से काये शुचिख्यातिः, उक्तं च स्थानाद्बीजादुपष्टम्भान्निःस्यन्दान्निधनादपि। कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुरिति अशुचौ शुचिख्यातिर्दृश्यते। नवेव शशाङ्कलेखा कमनीयेयं कन्यामध्वमृतावयवनिर्मितेव चन्द्रं भित्त्वा निःसृतेव ज्ञायते, नीलोत्पलपत्रायताक्षी हावगर्भाभ्यां लोचनाभ्यां जीवलोकमाश्वासयन्तीवेति कस्य केनाभिसंबन्धो, भवति चैवमशुचौ शुचिविपर्यास प्रत्यय इति। एतेनापुण्ये पुण्यप्रत्ययस्तथैवानर्थे चार्थप्रत्ययो व्याख्यातः।

तथा दुःखे सुखख्यातिं वक्ष्यति परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः (२।१५) इति। तत्र सुखख्यातिरविद्या। तथा नात्मन्यात्मख्यातिर्बाह्योपकरणेषु चेतनाचेतनेषु भोगाधिष्ठाने वा शरीरे, पुरुषोपकरणे वा मनस्यनात्मन्यात्मख्यातिरिति। तथैतदत्रोक्तम् व्यक्तमव्यक्तं वा सत्त्वमात्मत्वेनाभिप्रतीत्यतस्य संपदमनुनन्दत्यात्मसंपदं मन्वानस्तस्य व्यापदमनुशोचत्यात्म-व्यापदं मन्वानः, ससर्वोऽप्रतिबुद्ध इति।

एषा चतुष्पदाभवत्यविद्यामूलमस्य क्लेशसंतानस्य कर्माशयस्य च सविपाकस्येति। तस्याश्चामित्रागोष्पदवद्वस्तुसतत्त्वं विज्ञेयम्। यथा नामित्रो मित्राभावो न मित्रमात्रं किंतु तद्विरुद्धः सपत्नः। तथाऽगोष्पदं न गोष्पदाभावो न गोष्पदमात्रं किंतु देश एवताभ्याम् अन्यद्वस्त्वन्तरम्। एवम् अविद्या न प्रमाणं न प्रमाणाभावः किन्तु विद्याविपरीतं ज्ञानान्तरमविद्येति॥५॥

**सूत्रार्थः** - अतस्मिस्तत्प्रतिभासोऽविद्येत्यविद्यायाः सामान्यलक्षणम्। तस्या एव भेदप्रतिपादनम् – अनित्येषु घटादिषु नित्यत्वाभिमानोऽविद्येत्युच्यते। एवमशुचिषु कायादिषु शुचित्वाभिमानः, दुःखेषु च विषयेषु सुखत्वाभिमानः। अनात्मनि शरीरे आत्मत्वाभिमानः। एतेनापुण्ये पुण्यभ्रमोऽनर्थेप्यऽर्थभ्रमो व्याख्यातः। ।५। ।

अस्मितालक्षणम्

**दृग्दर्शनशक्त्योरेकात्मतेवाऽस्मिता। ।६॥**

**व्या०भा०** - पुरुषो दृक्शक्तिर्बुद्धिर्दर्शनशक्तिरित्येतयोरेक-स्वरूपापत्तिरिवास्मिता क्लेश उच्यते। भोक्तृभोग्य शक्त्योरत्यन्तविभक्तयोरत्यन्तासंकीर्णयोरविभाग प्राप्ताविव सत्यां भोगः कल्पते, स्वरूपप्रतिलम्भे तु तयोः कैवल्यमेव भवति कुतो भोग इति। तथा चोक्तम्बुद्धितः परंपुरुषमाकार शीलविद्यादिभिर्विभक्तमपश्यन्कुर्यात्तत्राऽऽत्मबुद्धिं मोहेनेति॥६॥

**सूत्रार्थः** – दृकशक्तिः पुरुषः, दर्शनशक्तिः रजस्तमोभ्यामनभिभूतः सात्विकः परिणामोऽन्तःकरणरूपः। अनयोर्भोग्यभोक्तृत्वेन जडाजडत्वेनात्यन्तभिन्नरूपयोरेकता-भिमानोऽस्मितेत्युच्यते। यथा प्रकृतिर्वस्तुतः कर्त्तृत्वभोक्तृत्वरहितापि कर्त्र्यहं भोक्त्र्यहमित्यभिमन्यते। सोऽयमस्मिताख्यो विपर्यासः क्लेशः। ॥६॥

रागस्य लक्षणम्

**सुखानुशयी रागः॥७॥**

**व्या०भा०** – सुखाभिज्ञस्य सुखानुस्मृतिपूर्वः सुखेतत्साधनेवायोगर्धस्तृष्णालोभः स रागइ ति॥७॥

**सूत्रार्थः** - सुखमनुशेत इति सुखानुशयी, सुखज्ञस्य सुखानुस्मृतिपूर्वकः सुखसाधनेषु तृष्णारूपो गर्धो रागसंज्ञकः क्लेशः॥७॥

द्वेषलक्षणम्

**दुःखानुशयी द्वेषः॥८॥**

व्या०भा० –दुःखाभिज्ञस्य दुःखानुस्मृतिपूर्वो दुःखे तत्साधने वायः प्रतिघोमन्युर्जिघांसा क्रोधः स द्वेष इति॥८॥

दुःखमुक्तलक्षणम्, तदभिज्ञस्य तदनुस्मृतिपूर्वस्तत्साधनेषु अनभिलषतो योऽयं निन्दात्मकः क्रोधः स द्वेष लक्षणः क्लेशः। ।८। ।

अभिनिवेशस्य लक्षणम्

**स्वरसवाही विदुषोऽपि तथा रूढोऽभिनिवेशः। ।९॥**

व्या०भा० – सर्वस्य प्राणिन इयमात्माशीर्नित्या भवति मानभूवं भूयासमिति। न चाननुभूतमरणधर्मकस्यैषा भवत्यात्माशीः। एतया च पूर्वजन्मानुभवः प्रतीयते। स चायमभिनिवेशः क्लेशः स्वरसवाही, कृमेरपि जातमात्रस्य प्रत्यक्षानुमानागमैरसंभावितोमरणत्रा स उच्छेददृष्ट्यात्मकः पूर्वजन्मानुभूतं मरणदुःखमनुमापयति। यथा चायमत्यन्तमूढेषु दृश्यते क्लेशस्तथा विदुषोऽपि विज्ञातपूर्वापरान्तस्य रूढः। कस्मात् ? समानाहितयोः कुशलाकुशलयोर्मरणदुःखानुभवादियं वासनेति॥९॥

सूत्रार्थः – पूर्वजन्मानुभूतमरणदुःखानुभववासनाबलाद्भयरूपः समुपजायमानः शरीरादिभिर्मम वियोगो मा भूदिति अन्वहं शरीरानुबन्धरूपः सर्वस्यैव आ-कृमेर्ब्रह्मपर्यन्तं निमित्तं विना, प्रवर्त्तमानोऽभिनिवेशाख्यः क्लेशः॥९॥

**ते प्रतिप्रसवहेयाः सूक्ष्माः॥१०॥**

सूक्ष्मक्लेश प्रहाणोपायम्

व्या०भा० – ते पञ्चक्लेशादग्धबीजकल्पायोगिनश्चरिताधिकारे चेतसि प्रलीने सह ते नैवास्तं गच्छन्ति॥१०॥

सूत्रार्थः – ते सूक्ष्माः क्लेशाः, ये वासनारूपेणेनावस्थिताः न वृत्तिरूपं परिणाममारभन्ते, ते प्रतिप्रसवेन प्रतिलोमपरिणामेन हेयास्त्यक्तव्याः। स्वकारणास्मितायां कृतार्थं स वासनं चित्तं यदा प्रविष्टं भवति, तदा कुतस्तेषां निर्मूलानां सम्भवः। ।१०। ।

ध्यानहेयास्तद्वृत्तयः॥११॥

स्थूलक्लेश हानोपायम्

व्या०भा० – क्लेशानां या वृत्तयः स्थूलास्ताः क्रियायोगेन तनूकृताः सत्यः प्रसंख्यानेन ध्यानेन हातव्या यावत्सूक्ष्मीकृतायावद्दग्धबीजकल्पा इति। यथा वस्त्राणां स्थूलोमलः पूर्वं निर्धूयते पश्चात्सूक्ष्मो यत्ने नोपायेन वापनीयते तथा स्वल्पप्रतिपक्षाः स्थूलावृत्तयः क्लेशानां, सूक्ष्मास्तु महाप्रतिपक्षा इति॥११॥

सूत्रार्थः – तेषां क्लेशानामारब्धकार्याणां याः सुख-दुःख-मोहात्मिका वृत्तयः, ता ध्यानेनैव चित्तैकाग्रता लक्षणेन हातव्या इत्यर्थः। चित्तपरिकर्माभ्यासमात्रेणैव स्थूलत्वात्तासां निवृत्तिर्भवति। यथा वस्त्रादौ स्थूलोमलः प्रक्षालनमात्रेणैव निवर्त्तते, यस्तु तत्र सूक्ष्मांशः स तैस्तैरुपायैरुत्तापन प्रभूतिभिरेव निवर्त्तयितुं शक्यते। ।११। ।

## Summarised Overview

श्रेयरूपे चित्तस्य एकाग्रतानिश्चलत्वं च समाधिः इति समाधेः निर्वचनम्। स द्विविधः 1. सविकल्पकः, 2. निर्विकल्पकश्च। योगस्य द्वौ भेदौ स्तः - 1. सम्प्रज्ञातः, तस्य फलमस्ति- प्रज्ञायाः उदयः इयं प्रजा सद्भूतार्थं प्रश्नोचितं करोति। सम्प्रज्ञातः सबीजसमाधिः वर्तते। अस्मिन्समाधौ चित्तं ध्येये लीनं भूत्वा तन्मयी भवति। एकाग्रचित्तस्य अविचलित-अक्षुब्ध-अवस्था वर्तते। यदा ध्येयवस्तूनामुपरि चित्तं चिरकालपर्यन्तं विद्यते। अस्य योगस्यनामसम्प्रज्ञात स बीजसमाधिः इति मन्यते।

असम्प्रज्ञात-असम्प्रज्ञातसमाधौ सर्वासामपि चित्तवृत्तीनां विषयाणाञ्च तिरोभावः सञ्जायते।

अर्थात्यदाचित्तं सर्वेभ्योऽपि बाह्येभ्यः आभ्यन्तरेभ्यश्च विषयेभ्यो दूरी भवति तदा सा स्थितिः असम्प्रज्ञातसमाधिर्नाम्नागीयते। असम्प्रज्ञातसमाधिः एव परमयोगः। एतस्यामवस्थायामेव आत्मामुक्तावस्था जनितं प्रकाशमनुभवति। विचारानन्दास्मितावत्वात्सम्प्रज्ञातसमाधेः, सः चतुर्विधो भवति। 1. सवितर्क-सम्प्रज्ञातसमाधिः- यदा' कस्मिंश्चित्स्थूले भौतिकपदार्थे चित्तमविचलभावेन समवस्थाप्यते तदा स समाधिः सवितर्कः इत्युच्यते। 2. सविचार-सम्प्रज्ञातसमाधिः- स्थूलात् (मूर्त्यादेः) चित्तमाकृष्य यदा तत्सूक्ष्मे विषये प्रतिष्ठाप्यते तदा स सविचारसमाधिः इत्यभिधीयते। 3. सानन्द-सम्प्रज्ञातसमाधिः- यदा सूक्ष्मादपि (तन्मात्रात्) चित्तमावर्ज्य कस्मिंश्चित्सूक्ष्मतरे विषये तद्ध्यानार्थमारोप्यते तदा ससमाधिः सानन्दसमाधिरिति भण्यते। 4. सास्मिता-सम्प्रज्ञातसमाधिः- यदा ध्यानमहङ्कारगोचरं क्रियते तदा ससमाधिः सास्मिता समाधिरिति कीर्त्यते। एतस्य समाधेः फलमस्ति आत्मसाक्षात्कारः।

चित्तस्य पञ्चसु भूमिषु आद्यत्रयं व्युत्थानम्, अन्तिमद्वयं च निरुद्धम्। निरुद्धभूमौ अभ्यासवैराग्याभ्यां सम्प्रज्ञातासम्प्रज्ञातसमाधी भवतः। ननु व्युत्थितचित्तस्य का गतिः इति चेदुच्यते तेषामपि क्रियायोगवशात्चित्तं समाधीयते। तत्र तपः स्वाध्याय-ईश्वरप्रणिधानानि क्रियायोगः। तप इति कर्मयोगः, स्वाध्याय इति ज्ञानयोगः ईश्वरप्रणिधानमिति भक्तियोगः। एवं च तेषां त्रयाणां योगानां समुच्चयो हि क्रियायोगः। तस्य हि फलं भवति क्लेशतनूकरणं समाधिभावनं च। तत्र क्लेशा हि अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च। तेषां तनूकरणं नाम स्वकार्यकरणप्रतिबन्धः क्रियतेऽनेन क्रियायोगेन। तेषां च कार्यं भवति चित्तस्य बाधनालक्षणपरितापोत्पादनम्।

क्लेशेषु आद्यं हि अविद्या। न विद्या अविद्या इति। तथाहि अविद्यानाम अनित्ये कार्ये वस्तुनि नित्यख्यातिः, अशुचिषु काचादिषुशु चित्वख्यातिः, दुःखेषु विषयेषु सुखत्वख्यातिः, अनात्मनि शरीरे आत्मत्वख्यातिः इति। अविद्या हि अस्मितादीनां चतुर्णां क्लेशानां कारणम्।

## Assignments

1. चित्तप्रसादाः के ?
2. सर्वाविक्षेपवृत्तयः दोषकृताः - सन्दर्भानुसारंविशदयत।
3. समापत्तेः चातुर्विध्यं विशदयत।
4. का नाम प्रज्ञा ?
5. नातःपरं सूक्ष्ममस्तीत्युक्तम् - विशदयत।
6. क्रियायोगः कः?
7. कति क्लेशाः सन्ति? के?
8. स्थूलसूक्ष्मक्लेशानां हानोपायाः के?

## Suggested Readings


1. योगदर्शनम् (प्रत्यक्षानुभूतव्याख्या ) - परमहंसस्वामीश्रीआङ्गडानन्दजी, श्रीपरमहंसस्वामीश्रीआङ्गडानन्दजीआश्रम
2. The Yogasutra of Patanjali with the commentary of yoga, Bengali Baba. Motilal Banarsidas publishers 1976, 1st Edition
3. पातञ्जलयोगदर्शनम्वाचस्पतिमिश्रविरचित - तत्ववैशारदी
4. പാതഞ്ജലയോഗദർശനംമലയാളവ്യാഖ്യാനസഹിതം – സ്വാമിജ്ഞാനാനന്ദസരസ്വതി.
5. पातञ्जलयोगदर्शनम्श्रीमद्धारेश्वरभोजदेवविरचितःराजमार्तण्डविवृत्तिसमेता।
6. भारतीयदर्शनपरिचयः - डा.सुशान्त्एस्, 1st edition, August 2015.

## References

1. पतञ्जलियोगसूत्रम् (व्यासभाष्यसहितम्) MunshiramManoharlal Publications. Pvt. Ltd
2. पातञ्जलयोगदर्शनं, भोजविवृतिसहितं, चौखम्बाअमरभारतीप्रकाशन, वाराणसी - २२१००१

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# योगसूत्रे द्वितीयोऽध्यायः १२ -३९सूत्राणि

## Learning Outcomes

- कर्मस्वरूपं, फलं च अधिकृत्य ज्ञानं लभते।
- योगाङ्गानि, तेषां अभ्यासात्किं सिद्ध्यतीति जानाति ।
- दृश्यस्यस्वरूपं, कार्यं, प्रयोजनं च विस्तरेण ज्ञातुं शक्नोति।

## Background

सर्वेऽपि भारतीयदर्शनकारा आत्मोन्नतेः साधकतमं करणं योगविद्येति मुक्तकण्ठतयोररङ्गीकुर्वन्ति। वेदोपनिषत्स्मृतिपुराणानि च अखिलानियोगोल्लेखं विदधन्ति द्रष्टानि भवन्ति। योगेनैव मानवस्य चित्तं निर्मलं शुद्धं स्थिरञ्च भवितुमर्हति। नास्ति योगसमं बलम्। योगः सार्वभौम धर्मोऽस्ति। स सर्वथा वाद-विवाद-विरहितः। स आत्मानं दर्शयति मनः शरीरञ्च संस्करोति। आत्मसाक्षात्काराकाङ्क्षिणः कृते पातञ्जलं योगदर्शनम् अमूल्यनिधिः अस्ति। सांख्याभिमतानि प्रत्यक्षानुमानशब्दप्रमाणानि योगदर्शनम् अङ्गीकरोति। प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतय इत्येतानि सन्ति चित्तस्य पञ्चवृत्तयः इत्युक्तपूर्वम्।

योगस्य अष्टाङ्गसाधनानि पातञ्जलयोगदर्शने निर्विकारत्वादिहेतोः निदधाति तानीमानि नामानि- यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधयः। एतेषां क्रमशः अनुष्ठानेन साधकः योगी भवितुमर्हति। यम-नियम-आसन-प्राणायाम-प्रत्याहाराणि बहिरङ्गाणि साधनानि, एवं च धारणा-ध्यान-समाधयश्चान्तरङ्गाणि

साधनानि सन्ति। बहिरङ्गसाधनानि अधिकृत्य अस्मिन्पाठके वयं पठामः।

## Keywords

क्लेशमूलः - विपाकः- ह्लादपरितापफलाः- प्रकाश- क्रिया- स्थितिशीलं- विवेकख्यातिः- अविप्लवा- प्रान्तभूमिः- योगाङ्गानि - यम- नियम- आसन- प्राणायाम- प्रत्याहार- धारणा - ध्यान - समाधयः-महाव्रतम्।

## Discussion

कर्माशयं/ कर्मस्वरूपं

**क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः। ।१२। ।**

**व्या०भा०** – तत्र पुण्यापुण्यकर्माशयः कामलोभमोहक्रोधप्रभवः। स दृष्टजन्मवेदनीयश्चादृष्टजन्मवेदनीयश्च। तत्र तीव्रसंवेगेन मन्त्रतपः समाधिभिर्निर्वर्तित ईश्वरदेवतामहर्षिमहानुभावाना- माराधनाद्वा यः परिनिष्पन्नः स सद्यः परिपच्यते पुण्यकर्माशय इति। तथा तीव्रक्लेशेन भीतव्याधित-कृपणेषु विश्वासोपगतेषु वा महानुभावेषु वा तपस्विषु कृतः पुनः पुनरपकारः स चापि पाप-कर्माशयः सद्य एव परिपच्यते। यथा नन्दीश्वरः कुमारो मनुष्यपरिणामं हित्वा देवत्वेन परिणतः। तथानहुषोऽपि देवानामिन्द्रः स्वकं परिणामं हित्वा तिर्यक्त्वेन परिणत इति। तत्र नारकाणां नास्ति दृष्टजन्मवेदनीयः कर्माशयः। क्षीणक्लेशानामपि नास्त्यदृष्टजन्मवेदनीयः कर्माशय इति॥१२॥

**सूत्रार्थः** – कर्माशय इत्यनेन स्वरूपं तस्याभिहितम्ः यतो वासनारूपाण्येव कर्माणि। क्लेशमूल इत्यनेन कारणमभिहितं,

यतः कर्मणां शुभाशुभानां क्लेश एवं निमित्तम्। दृष्टादृष्टजन्मवेदनीय इत्यनेन फलमुक्तम्। अस्मिन्नेव जन्मनि अनुभवनीयो दृष्टजन्मवेदनीयः। जन्मान्तरानुभवनीयोऽ-दृष्टजन्मवेदनीयः। तथाहि-कानिचित्पुण्यानि देवताराधनादीनि तीव्रसंवेगेन कृतानि इहैव जन्मनि जात्यायुर्भोगलक्षणं फलं प्रयच्छन्ति। यथा-नन्दीश्वरस्य भगवन्महेश्वराराधनबलादि हैव जन्मनि जात्यादयोविशिष्टाः प्रादुर्भूताः। एवमन्येषां विश्वामित्रादीनां तपः प्रभावाज्जात्यायुषो केषाञ्चिज्जातिरेव; यथा तीव्रसंवेगेन दुष्कर्मकृतां नहुषादीनां जात्यन्तरपरिणामः। उर्वश्याश्च कार्त्तिकेय वने लतारूपतया। एवं व्यस्तसमस्तत्त्वेन यथायोग्यं योज्यमिति॥१२॥

कर्माशयस्य स्वभेदभिन्नस्य फलम्

**सति मूले तद्विपाको जात्यायुर्भोगाः॥१३॥**

**व्या०भा०** – सत्सु क्लेशेषु कर्माशयो विपाकारम्भी भवति नोच्छिन्न क्लेशमूलः। यथा तुषावनद्धाः शालितण्डुला अदग्धबीजभावाः प्ररोहसमर्थाभवन्ति नापनीत तुषादग्धबीजभावा वा, तथा क्लेशावनद्धःकर्माशयो विपाकप्ररोही भवति, नापनीत क्लेशोन प्रसंख्यानदग्धक्लेश-बीजभावो वेति। स च विपाकस्त्रिविधो जातिरायुर्भोग इति।

यत्त्वदृष्टजन्मवेदनीयं कर्मानियतविपाकं तन्नश्येदावापं वा गच्छेदभिभूतं वा चिरमप्युपासीत, यावत्समानं कर्माभिव्यञ्जकं निमित्तमस्य न विपाकाभिमुखं करोतीति। तद्विपाकस्यैव देशकालनिमित्तानवधारणादियं कर्मगतिर्विचित्रादुर्विज्ञाना चेति। न चोत्सर्गस्यापवादान्निवृत्तिरित्येक भविकः कर्माशयोऽनुज्ञायत इति॥१३॥

**सूत्रार्थः** – मूलमुक्तलक्षणाः क्लेशाः, तेष्वनभिभूतेषु सत्सुकर्मणां कुशलाकुशलरूपाणां विपाकः फलं जात्यायुर्भोगा भवन्ति। जातिर्मनुष्यत्वादिः। आयुश्चिरकालमेकशरीरसम्बन्धः।

भोगाविषया इन्द्रियाणि सुखसंविद्दुःखसंविच्च, कर्मकरणभाव-साधनव्युत्पत्त्याभोगशब्दस्य। इदमत्र तात्पर्य्यम्- चित्तभूमौ अनादिकालसञ्चिताः कर्मवासना यथा यथापाकमुपयान्ति, तथा तथागुणप्रधानभावेन स्थिता जात्यायुर्भोगलक्षणं स्वकार्य्यमारभन्ते। ।१३। ।

**ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्॥१४॥**

**व्या०भा०** – तेजन्मायुर्भोगाः पुण्यहेतुकाः सुखफला, अपुण्यहेतुका दुःखफलाइति। यथा चेदं दुःखं प्रतिकूलात्मकमेवं विषयसुखकालेऽपि दुःखमस्त्येव प्रतिकूलात्मकं योगिनः॥१४॥

**सूत्रार्थः** - ह्लादःसुखम्, परितापो दुःखम्, ह्लादपरितापौ तौ फलं येषां ते तथोक्ताः। पुण्यं कुशलं कर्म, तद्विपरीतमपुण्यम्, ते पुण्यापुण्ये कारणं येषां तेषां भावस्तस्मात्। एतदुक्तं भवति – पुण्यकर्मारब्धा जात्यायुर्भोगाह्लादफलाः, अपुण्यकर्मारब्धास्तु परितापफलाः। ।१४॥

योगिनः तु सर्वं दुःखमित्याह

**परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चदुःखमेव सर्वं विवेकिनः॥१५॥**

**व्या०भा०** – सर्वस्यायं रागानुविद्धश्चेतनाचेतन साधनाधीनः सुखानुभव इति तत्रास्ति रागजः कर्माशयः। तथा चद्वेष्टिदुःखसाधनानि मुह्यति चेति द्वेषमोहकृतोऽप्यस्ति कर्माशयः। तथा चोक्तम् – नानु पहत्यभूतान्युपभोगः संभवतीति हिंसाकृतोऽप्यस्ति शारीरः कर्माशय इति। विषयसुखं चाविद्येत्युक्तम्।

अथ का तापदुःखता? सर्वस्य द्वेषानुविद्धश्चेतनाचेतन साधनाधीनस्तापानुभव इति, तत्रास्ति द्वेषजः कर्माशयः।

सुखसाधनानि च प्रार्थयमानः कायेन वाचामनसा च परिस्पन्दते, ततः परमनुगृह्णात्युपहन्ति चेति परानुग्रहपीडाभ्यां धर्माधर्मावुपचिनोति। सकर्माशयो लोभान्मोहाच्च भवतीत्येषातापदुःखतोच्यते। का पुनः संस्कारदुःखता ? सुखानुभवात्सुखसंस्काराशयो दुःखानुभवादपि दुःखसंस्काराशय इति। एवं कर्मभ्यो विपाकेऽनुभूयमाने सुखेदुःखे वा पुनः कर्माशय प्रचय इति। एवमिदमनादि दुःखस्रोतो विप्रसृतंयोगिनमेव प्रतिकूलात्मकत्वादुद्वेजयति। कस्मात् ? अक्षिपात्रकल्पो हि विद्वानिति। यथोर्णातन्तुरक्षिपात्रेन्यस्तः स्पर्शेनदुःखयति नान्येषु गात्रावयवेषु। एवमेतानि दुःखान्यक्षिपात्रकल्पं योगिनमेव क्लिश्नन्ति नेतरं प्रतिपत्तारम्। बाह्याध्यात्मिकोभयनिमित्तास्त्रिपर्वाणस्तापा अनुप्लवन्ते। तदेवमनादिना दुःखस्रोतसा व्यूह्यमानमात्मानं भूतग्रामं च दृष्ट्वा योगी सर्वदुःखक्षयकारणं सम्यग्दर्शनं शरणं प्रपद्यत इति।

गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः। प्रख्या प्रवृत्तिस्थितिरूपा बुद्धिगुणाः परस्परानुग्रहतन्त्रीभूत्वा शान्तं घोरं मूढं वा प्रत्ययं त्रिगुणमेवारभन्ते। चलं च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तम्। रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते सामान्यानित्वतिशयैः सह प्रवर्तन्ते। एवमेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोह प्रत्ययाः सर्वेसर्वरूपा भवन्तीति, गुणप्रधानभावकृतस्त्वेषां विशेष इति। तस्माद्दुःखमेव सर्वं विवेकिन इति।

तदस्य महतो दुःखसमुदायस्य प्रभवबीजमविद्या। तस्याश्च सम्यग्दर्शनमभावहेतुः। यथा चिकित्साशास्त्रं चतुर्व्यूहं रोगोरोगहेतुरारोग्यं भैषज्यमिति, एवमिदमपि शास्त्रं चतुर्व्यूहमेव। तद्यथा संसारः संसारहेतुर्मोक्षो मोक्षोपाय इति। तत्र दुःखबहुलः संसारो हेयः, प्रधानपुरुषयोः संयोगो हेयहेतुः।

संयोगस्यात्यन्तिकी निवृत्तिर्हानम्। हानोपायः सम्यग्दर्शनम्। तत्र हातुः स्वरूपमुपादेयं वा हेयं वानभवितुमर्हति। हानेतस्योच्छेदवाद प्रसङ्गः, उपादानेचहेतुवादः। उभयप्रत्याख्याने च शाश्वतवाद इत्येतत्सम्यग्दर्शनम्॥१५॥

**सूत्रार्थः** – विवेकिनः परिज्ञातक्लेशादि विवेकस्य परिदृश्यमानं सकलमेव भोगसाधनं स विषं स्वाद्वन्नमिव दुःखमेव प्रतिकूलवेदनीयमेवेत्यर्थः। यस्मादत्यन्ताभिजातो योगी दुःखलेशेनाप्युद्विजते। यथा – अक्षिपात्रमूर्णातन्तुस्पर्शमात्रेणैव महतीं पीडामनुभवति, नेतरदङ्गम्, तथा विवेकी स्वल्पदुःखानुबन्धेनापि उद्विजते। कथमित्याह - परिणाम-ताप-संस्कारदुःखैः। विषयाणामुपयुज्यमानानां यथायथं गर्द्धाभिवृद्धस्तदप्रातिकृतस्य दुःखस्य अपरिहार्यतया दुःखान्तरसाधनत्वाच्चास्त्येव दुःखरूपतेतिपरिणामदुःखत्वम्। उपभुज्यमाणेषु सुखसाधनेषु तत्प्रतिपन्थिनं प्रतिद्वेषस्य सर्वदेवावस्थितत्वात्सुखानुभवकालेऽपि तापदुःखं दुष्परिहरमिति तापदुःखता। संस्कार-दुःखत्वन्तुस्वाभिमतानभिमतविषयसन्निधाने सुखसंविद् दुःखसंविच्चोपजायमाना तथाविधमेव स्वक्षेत्रे संस्कारमारभते। संस्काराच्च पुनस्तथाविध संविदनुभव इत्यपरिमित संस्कारोत्पत्तिद्वारेण संसारानुच्छेदात्सर्वस्यैव दुःखत्वम्। गुणवृत्तिविरोधाच्चेति-गुणानां सत्त्वरजस्तमसां या वृत्तयः सुखदुःखमोहरूपाः परस्परमभिभाव्याभिभावकत्वेन विरुद्धा जायन्ते, तासां सर्वत्रैव दुःखानुबन्धाद्दुःखत्वम्। एतदुक्तं भवति – ऐकान्तिकीमात्यन्तिकीञ्च दुःखनिवृत्तिमिच्छतो विवेकिन उक्तरूपकारणचतुष्टयं यावत्सर्वे विषयादुःखरूपतया प्रतिभान्ति। तस्माच्च सर्वकर्मविपाको दुःखरूप एवेत्युक्तं भवति। ।१५।।

संसारदुःखं हातव्यम्

हेयं दुःखमनागतम् ॥१६॥

व्या०भा० - दुःखमतीतमुपभोगेनातिवाहितं न हेयपक्षे वर्तते। वर्तमानं च स्वक्षणोपभोगारूढमिति न तत्क्षणान्तरे हेयतामापद्यते। तस्माद्यदेवानागतं दुःखं तदेवाक्षिपात्रकल्पं योगिनं क्लिश्नाति, नेतरं प्रतिपत्तारम्। तदेव हेयतामापद्यते॥१६॥

सूत्रार्थः – भूतस्यातिक्रान्तत्वादनुभूयमानस्य त्यक्तुमशक्यत्वाद् अनागतमेव संसारदुःखं हातव्यमित्युक्तं भवति॥१६॥

हेयहेतुमाह-

द्रष्टृ- दृश्ययोः संयोगो हेयहेतुः॥१७॥

व्या०भा० – द्रष्टाबुद्धेः प्रतिसंवेदी पुरुषः। दृश्या बुद्धिसत्त्वोपारूढाः सर्वे धर्माः। तदेतद् दृश्यमयस्कान्तमणिकल्पं संनिधिमात्रोपकारिदृश्यत्वेन स्वं भवति पुरुषस्य दृशिरूपस्य स्वामिनः। अनुभवकर्मविषयतामापन्नमन्यस्वरूपेण प्रतिलब्धात्मकं स्वतन्त्रमपि परार्थत्वात्परतन्त्रम्। तयोर्दृग्दर्शनशक्त्योरनादिरर्थकृतः संयोगो हेयहेतुर्दुःखस्य कारणमित्यर्थः। तथा चोक्तम् – तत्संयोगहेतु विवर्जनात्स्यादयमात्यन्तिको दुःखप्रतीकारः। कस्मात् ? दुःखहेतोः परिहार्यस्यप्रतीकारदर्शनात्। तद्यथा-पादतलस्य भेद्यता, कण्टकस्य भेत्तृत्त्वं, परिहारः कण्टकस्य पादानधिष्ठानं पादत्राणव्यवहितेन वाऽधिष्ठानम्। एतत्त्रयं यो वेदलोके स तत्र प्रतीकारमारभमाणो भेदजं दुःखं नाप्नोति। कस्मात् ? त्रित्वोपलब्धिसामर्थ्यादिति। अत्रापि तापकस्य रजसः सत्त्वमेव तप्यम्। कस्मात् ? तपिक्रियायाः कर्मस्थत्वात्। सत्त्वे कर्मणि तपिक्रियानापरिणामिनि निष्क्रिये क्षेत्रज्ञे। दर्शितविषयत्वात्सत्त्वे तु तप्यमाने तदाकारानुरोधी

पुरुषोऽनुतप्यत इति॥१७॥

**सूत्रार्थः** – द्रष्टा चिद्रूपः पुरुषः, दृश्यं बुद्धिसत्त्वम्, तयोरविवेकख्यातिपूर्वको योऽसौ संयोगो भोक्तृ-भोग्यत्वेन सन्निधानम्, स हेयस्यदुःखस्य गुणपरिणामरूपस्य संसारस्य हेतुः कारणं, तन्निवृत्त्या संसारनिवृत्तिर्भवतीत्यर्थः॥१७॥

दृश्यस्य स्वरूपं, कार्यं, प्रयोजनम्

**प्रकाश-क्रिया-स्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥१८॥**

**व्या०भा०** – प्रकाशशीलं सत्त्वम्। क्रियाशीलं रजः। स्थितिशीलं तम इति। एते गुणाः परस्परोपरक्त प्रविभागाः परिणामिनः संयोगविभागधर्माण इतरेतरोपाश्रयेणोपार्जितमूर्तयः परस्पराङ्गाङ्गित्वेऽप्यसंभिन्नशक्तिप्रविभागास्तुल्यजातीया तुल्यजातीयशक्तिभेदानुपातिनः प्रधानवेलायामुपदर्शित संनिधानागुणत्वेऽपि च व्यापारमात्रेण प्रधानान्तर्णीतानुमितास्तिताः पुरुषार्थकर्तव्यतया प्रयुक्तसामर्थ्याः संनिधिमात्रोपकारिणोऽयस्कान्तमणिकल्पाः प्रत्ययमन्तरेणैकतमस्य वृत्तिमनुवर्तमानाः प्रधानशब्दवाच्या भवन्ति। एतद् दृश्यमित्युच्यते।

तदेतद् दृश्यं भूतेन्द्रियात्मकं भूतभावेन पृथिव्यादिना सूक्ष्मस्थूलेन परिणमते। तथेन्द्रियभावेन श्रोत्रादिना सूक्ष्मस्थूलेन परिणमत इति। तत्तु नाप्रयोजनमपि तु प्रयोजनमुररीकृत्य प्रवर्तत इति भोगापवर्गार्थं हि तद्दृश्यं पुरुषस्येति। तत्रेष्टानिष्टगुणस्वरूपावधारणमविभागापन्नं भोगो, भोक्तुः स्वरूपावधारणमपवर्ग इति। द्वयोरतिरिक्तमन्यद्दर्शनं नास्ति। तथा चोक्तम् अयं तु खलु त्रिषुगुणेषु कर्तृष्वकर्तरि च पुरुषे तुल्यातुल्यजातीये चतुर्थे तत्क्रियासाक्षिण्युपनीयमानान् सर्वभावानुपपन्नाननुपश्यन्नदर्शनमन्यच्छङ्कत इति।

तावेतौ भोगापवर्गौ बुद्धिकृतौ बुद्धावेव वर्तमानौ कथं पुरुषे व्यपदिश्येते इति। यथा च जयः पराजयो वा योद्धृषुवर्तमानः स्वामिनि व्यपदिश्यते, सहितत्फलस्य भोक्तेति। एवं बन्धमोक्षौ बुद्धावेव वर्तमानौ पुरुषे व्यपदिश्येते स हि तत्फलस्य भोक्तेति। बुद्धेरेव पुरुषार्थापरिसमाप्तिर्बन्धस्तदर्थावसायो मोक्ष इति। एतेन ग्रहणधारणोहापोह तत्त्वज्ञानाभिनिवेशाबुद्धौ वर्तमानाः पुरुषेऽध्यारोपित सद्भावाः, सहितत्फलस्य भोक्तेति॥१८॥

**सूत्रार्थः** – प्रकाशः सत्त्वस्य धर्मः, क्रियाप्रवृत्तिरूपारजसः स्थितिर्नियमरूपा, तमसः। ताः प्रकाश-क्रिया-स्थितयः शीलं स्वाभाविकं रूपं यस्य तत्तथाविधमिति स्वरूपमस्य निर्दिष्टम्। भूतेन्द्रियात्मकमिति – भूतानि स्थूलसूक्ष्मभेदेन द्विविधानि, पृथिव्यादीनि गन्धतन्मात्रादीनि च। इन्द्रियाणि बुद्धीन्द्रिय-कर्मेन्द्रियान्तःकरणभेदेन त्रिविधानि। उभयमेतद्ग्राह्य-ग्रहणरूपमात्मास्वरूपाभिन्नः परिणामो यस्य तत्तथाविधमित्यनेनास्य कार्यमुक्तम्। भोगः कथित लक्षणः, अपवर्गो विवेकख्यातिपूर्विका संसारनिवृत्तिः। तौ भोगापवर्गौ अर्थः प्रयोजनं यस्य तत्तथाविधं दृश्यमित्यर्थः। ।१८। ।

दृश्यस्य अवस्थाविशेषाः

**विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥१९॥**

**व्या०भा०** – तत्राकाशवाय्वग्न्युदकभूमयो भूतानि शब्दस्पर्शरूपरसगन्धतन्मात्राणामविशेषाणां विशेषाः। तथा श्रोत्रत्वक्चक्षुजिह्वाघ्राणानि बुद्धीन्द्रियाणि। वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि। एकादशं मनः सर्वार्थम्, इत्येतान्यस्मितालक्षणस्याविशेषस्य विशेषाः। गुणानामेष षोडशको विशेषपरिणामः।

षडविशेषाः। तद्यथा शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रं चेत्येकद्वित्रिचतुष्पञ्चलक्षणाः शब्दादयः

पञ्चाविशेषाः, षष्ठश्चाविशेषोऽस्मितामात्र इति। एते सत्तामात्रस्यात्मनोमहतः षडविशेषपरिणामाः। यत्तत्परमविशेषेभ्यो लिङ्गमात्रं महत्तत्त्वं तस्मिन्नेते सत्तामात्रे महत्यात्मन्यवस्थाय विवृद्धिकाष्ठामनुभवन्ति, प्रतिसंसृज्य मानश्च तस्मिन्नेव सत्तामात्रे महत्यात्मन्यवस्थाय यत्तान्निः सत्तासत्तं निःसदसन्निरसदव्यक्तमलिङ्गं प्रधानं तत्प्रतियन्ति। एषतेषां लिङ्मात्रः परिणामो निःसत्तासत्तं चालिङ्गपरिणाम इति।

अलिङ्गावस्थायां न पुरुषार्थो हेतुः। नालिङ्गावस्थायामादौ पुरुषार्थताकारणं भवतीति न तस्याः पुरुषार्थता कारणं भवति। नासौ पुरुषार्थकृतेति नित्याख्यायते। त्रयाणां त्ववस्थाविशेषाणामादौ पुरुषार्थताकारणं भवति। स चार्थो हेतुनिमित्तं कारणं भवतीत्यनित्याख्यायते। गुणास्तु सर्वधर्मानुपातिनो न प्रत्यस्तमयन्तेनोपजायन्ते। व्यक्तिभिरेवातीतानागतव्ययागमवतीभिर्गुणान्वयिनीभिरुपजन नापायधर्मका इव प्रत्यव भासन्ते। यथा देवदत्तो दरिद्राति। कस्मात् ? यतोऽस्य म्रियन्ते गाव इति। गवामेव मरणात्तस्य दरिद्रतानस्वरूपहानादितिसमः समाधिः। लिङ्गमात्रमलि-ङ्गस्य प्रत्यासन्नं तत्र तत्संसृष्टं विविच्यते, क्रमानतिवृत्तेः। तथा षडविशेषा लिङ्गमात्रे संसृष्य विविच्यन्ते, परिणामक्रमनियमात्। तथा तेष्वविशेषेषु भूतेन्द्रियाणि संसृष्टानि विविच्यन्ते, तथाचोक्तं पुरस्तात्। नविशेषेभ्यः परंतत्त्वान्तरमस्तीति विशेषाणां नास्ति तत्त्वान्तरपरिणामः। तेषां तु धर्मलक्षणावस्थापरिणामाव्याख्यायिष्यन्ते॥१९॥

**सूत्रार्थः** – गुणानां पर्वाण्यवस्थाविशेषाश्चत्वारो ज्ञातव्या इत्युपदिष्टं भवति। तत्र विशेषामहाभूतेन्द्रियाणि, अविरोषास्तन्मात्रान्तःकरणानि, लिङ्गमात्रं बुद्धिः,

अलिङ्गमव्यक्तमित्युक्तम्सर्वत्र त्रिगुणरूपस्याव्यक्तस्यान्वयित्वेन प्रत्यभिज्ञानादवश्यं ज्ञातव्यत्वेन योगकाले चत्वारि पर्वाणि निर्दिष्टानि। ।१९। ।

उपादेयं दृष्टारं वक्तुमाह

**द्रष्टादृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः। ॥२०॥**

**व्या०भा-** दृशिमात्र इति दृक्शक्तिरेव विशेषणापरामृष्टेत्यर्थः। स पुरुषो बुद्धेः प्रतिसंवेदी। स बुद्धेर्न सरूपो नात्यन्तं विरूप इति। न तावत्सरूपः। कस्मात् ? ज्ञाताज्ञातविषयत्वात् परिणामिनी हि बुद्धिः, तस्याश्च विषयोगवादिर्घटादिर्वा ज्ञातश्चाज्ञातश्चेति परिणामित्वं दर्शयति।

सदा ज्ञातविषयत्वं तु पुरुषस्यापरिणामित्वं परिदीपयति। कस्मात् ? नहि बुद्धिश्च नाम पुरुषविषयश्च स्याद्गृहीताऽगृहीता चेति सिद्धं पुरुषस्य सदा ज्ञातविषयत्वं ततश्चापरिणामित्वमिति। किंच परार्थाबुद्धिः संहत्यकारित्वात्, स्वार्थः पुरुष इति। तथा सर्वार्थाध्यवसायकत्वात्त्रिगुणा बुद्धिस्त्रिगुणत्वादचेतनेति। गुणानां तूपद्रष्टा पुरुष इति। अतो न सरूपः।

अस्तु तर्हि विरूप इति। नात्यन्तं विरूपः। कस्मात् ? शुद्धोऽप्यसौ प्रत्ययानुपश्यः यतः प्रत्ययं बौद्धमनुपश्यति। तमनुपश्यन्नतदात्मापि तदात्मक इव प्रत्यव भासते। तथा चोक्तम् –अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्ते व तद्वृत्तिमनुपतति, तस्याश्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्या विशिष्टा हि ज्ञानवृत्तिरित्याख्यायते॥२०॥

**सूत्रार्थः** – द्रष्टा पुरुषः, दृशिमात्रश्चेतना मात्रः। मात्रग्रहणं धर्मधर्मि निरासार्थम्। केचिद्धि चेतनामात्मनोधर्ममिच्छन्ति। स शुद्धोऽपि परिणामित्वाद्यभावेन स्वप्रतिष्ठाऽपि प्रत्ययानुपश्यः

प्रत्ययाविषयोपरक्तानि विज्ञानानि, तानि अनु अव्यवधानेन प्रतिसंक्रमाद्य भावेन पश्यति। एतदुक्तं भवति- जातविषयो परागायामेव बुद्धौ सन्निधिमात्रेणैव पुरुषस्य द्रष्टृत्वमिति॥२०॥

पुरुषः भोक्ता इत्याह

**तदर्थ एव दृश्यस्यात्मा। ।२१। ।**

**व्या०भा०** – दृशिरूपस्य पुरुषस्य कर्मरूपतामापन्नं दृश्यमिति तदर्थ एव दृश्यस्यात्मास्वरूपं भवतीत्यर्थः॥२१॥

**सूत्रार्थः** – दृश्यस्य प्रागुक्तलक्षणस्य य आत्मा यत्स्वरूपं तदर्थस्तस्य भोक्तृत्वसम्पादनं नाम स्वार्थपरिहारेण प्रयोजनम्। न हि प्रधानं प्रवर्त्तमानमात्मनः किञ्चित्प्रयोजनमपेक्ष्य प्रवर्त्तते, किन्तु पुरुषस्य भोक्तृत्वं सम्पादनायेति॥२१॥

सर्वे दृष्टारो बन्धरहिताः

**कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्। ।२२।।**

**व्या०भा०** – कृतार्थमेकं पुरुषं प्रति दृश्यं नष्टमपि नाशं प्राप्तमप्यनष्टं तदन्यपुरुषसाधारणत्वात्। कुशलं पुरुषं प्रति नाशं प्राप्तमप्यकुशलान्पुरुषान्प्रति न कृतार्थमिति तेषां दृशेः कर्मविषयतामापन्नं लभत एव पररूपेणात्मरूपमिति। अतश्च दृग्दर्शनशक्त्योर्नित्यत्वादनादिः संयोगो व्याख्यात इति। तथा चोक्तम्- "धर्मिणामनादि संयोगा द्धर्ममात्राणामप्यनादिः संयोग" इति॥२२॥

**सूत्रार्थः** – यद्यपि विवेकख्याति पर्य्यन्ताद्भोगसम्पादनात्कमपि कृतार्थं पुरुषं प्रति तन्नष्टं विरतव्यापारम्, तथापि सर्वपुरुषसाधारणत्वादन्यान्प्रति अनष्टव्यापारमवतिष्ठते। अतः प्रधानस्य सकलभोक्तृसाधारणत्वान्नकदाचिदपि विनाशः। एकमुक्तौ वा न सर्वमुक्तिप्रसङ्ग इत्युक्तं भवति। ।२२॥

**स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः॥२३॥**

संयोगस्य स्वरूपम्

व्या०भा० – पुरुषः स्वामी दृश्येन स्वेन दर्शनार्थं संयुक्तः। तस्मात्संयोगाद्दृश्यस्योपलब्धिर्यासभोगः, या तु द्रष्टुः स्वरूपोपलब्धिः सोऽपवर्गः। दर्शनकार्यावसानः संयोग इति दर्शनं वियोगस्य कारणमुक्तम्। दर्शनमदर्शनस्य प्रतिद्वन्द्वीत्यदर्शनं संयोगनिमित्तमुक्तम्। नात्र दर्शनं मोक्षकारणम्, अदर्शनाभावादेव बन्धाभावः स मोक्ष इति। दर्शनस्य भावे बन्धकारणस्यादर्शनस्य नाश इत्यतो दर्शनज्ञानं कैवल्यकारणमुक्तम्॥२३॥

सूत्रार्थः – कार्यद्वारेणास्य लक्षणं करोति। स्वशक्तिर्दृश्यस्य स्वभावः, स्वामि शक्तिद्रष्टुः स्वरूपम्, तयोर्द्वयोरपि संवेद्यसंवेदकत्वेन, व्यवस्थितयोर्यास्वरूपोपलब्धिस्तस्याः कारणं यः संयोगः, स च सहजभोग्यभोक्तृभाव स्वरूपान्नान्यः। न हि तयोर्नित्ययोर्व्यापकयोः स्वरूपादतिरिक्तः कश्चित्संयोगः, यदेवं भोग्यस्य भोग्यत्वं भोक्तुश्च भोक्तृत्वमनादिसिद्धं स एव संयोगः। ।२३।।

**तस्य हेतुरविद्या ॥२४।।**

संयोगस्य कारणम्

व्या०भा० – विपर्यय ज्ञानवासनेत्यर्थः। विपर्यय ज्ञानवासनावासिता च न कार्यनिष्ठां पुरुषख्यातिं बुद्धिः प्राप्नोति, साधिकारा पुनरावर्तते। सा तु पुरुषख्यातिपर्यवसाना कार्यनिष्ठां प्राप्नोति, चरिताधिकारानिवृत्ता दर्शनाबन्धकारणा भावान्नपुनरावर्तते। ननु बुद्धिनिवृत्तिरेव मोक्षः, अदर्शन कारणाभावाद्बुद्धिनिवृत्तिः। तच्चादर्शनं बन्धकारणं दर्शनान्निवर्तते। तत्र चित्तनिवृत्तिरेव मोक्षः। किमर्थमस्थान एवास्य मतिविभ्रमः॥२४॥

सूत्रार्थः – या पूर्वं विपर्य्यासात्मिका मोहरूपाऽविद्याव्याख्याता (२।४-५), सा तस्य विवेकख्यातिरूपस्य संयोगस्य कारणम्। ।२४।।

**तदभावे संयोगाभावो हानं तद्दृशेः कैवल्यम्। ।२५।।**

किं हानमित्याह

**व्या०भा०-** तस्यादर्शनस्याभावाद्बुद्धि पुरुषसंयोगाभाव आत्यन्तिको बन्धनो परम इत्यर्थः। एतद्हानम्। तद्दृशेः कैवल्यं, पुरुषस्यामिश्रीभावः पुनरसंयोगो गुणैरित्यर्थः। दुःखकारणनिवृत्तौ दुःखोपरमो हानस्तदा स्वरूपप्रतिष्ठः पुरुष इत्युक्तम् ॥२५॥

**सूत्रार्थः** –तस्याअविद्यायाः स्वरूपविरुद्धेन सम्यग्ज्ञानेन उन्मूलिताया योऽयमभावस्तस्मिन्सति तत्कार्य्यस्य संयोगस्याप्यभावः, तत्हानमित्युच्यते। अयमर्थः – नैतस्य मूर्तद्रव्यवत्परित्यागो युज्यते, किन्तु जातायां विवेकख्यातौ अविवेकनिमित्तः संयोगः स्वयमेव निवर्त्तत इति तस्य हानम्, यदेव च संयोगस्य हानं तदेव नित्यकैवल्यस्यापि पुरुषस्य कैवल्यं व्यपदिश्यते। तदेवं संयोगस्य स्वरूपं कारणं कार्यश्चाभिहितम्। ।२५।।

**विवेकख्यातिरविप्लवा हानोपायः॥२६॥**

उपादेयकारणमाह

**व्या०भा०** – सत्त्वपुरुषान्यताप्रत्ययो विवेकख्यातिः, सा त्वनिवृत्तमिथ्याज्ञाना प्लवते। यदा मिथ्याज्ञानं दग्धबीजभावं बन्ध्यप्रसवं संपद्यते तदा विधूतक्लेशरजसः सत्त्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां वर्तमानस्य विवेकप्रत्ययप्रवाहो निर्मलो भवति। सा विवेकख्यातिरविप्लवा हानस्योपायः। ततो मिथ्याज्ञानस्य दग्धबीजभावोपगमः पुनश्चाप्रसव इत्येष मोक्षस्य मार्गो हानस्योपाय इति॥२६॥

सूत्रार्थः – अन्ये गुणाः, अन्यः पुरुष इत्येवं विधस्य विवेकस्य या ख्यातिः प्रख्या साऽस्य = दृश्यपरित्यागस्योपायः कारणम्। कीदृशी अविप्लवा – न विद्यते विप्लवो विच्छेदोऽन्तराऽन्तराव्युत्थानरूपो यस्याः साऽविप्लवा। इदमत्र तात्पर्य्यम्-प्रतिपक्षभावना बलादविद्या प्रविलये विनिवृत्तज्ञातृत्वकर्त्तृत्वाभिमानारजस्तमो मलानभिभूता बुद्धेरन्तर्मुखाया चिच्छायासङ्क्रान्तिः सा विवेकख्यातिरित्युच्यते। तस्यां च सन्ततमविच्छेदेन प्रवृत्तायां सत्यां दृश्यस्याधिकारनिवृत्तेर्भवत्येव कैवल्यम्। ।२६। ।

उत्पन्नविवेकख्यातेः पुरुषस्य प्रज्ञां कथयन्विवेकख्यातेः स्वरूपमाह

**तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥२७॥**

**व्या०भा०** – तस्येति प्रत्युदितख्यातेः प्रत्याम्नायः। सप्तधेत्यशुद्ध्यावरणमलापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारैव प्रज्ञाविवेकिनो भवति। तद्यथा -

(१) परिज्ञातं हेयं नास्य पुनः परिज्ञेयमस्ति। (२) क्षीणाहेयहेतवो न पुनरेतेषां क्षेतव्यमस्ति। (३) साक्षात्कृतं निरोधसमाधिना हानम्। (४) भावितो विवेकख्यातिरूपो हानोपायइति। एषा चतुष्टयीकार्यविमुक्तिः प्रज्ञायाः। चित्तविमुक्तिस्तु त्रयी। (५) चरिताधिकाराबुद्धिः। (६) गुणा गिरिशिखरकूटच्युता इव ग्रावाणोनिरवस्थानाः स्वकारणे प्रलयाभिमुखाः सहतेनास्तं गच्छन्ति। न चैषां प्रविलीनानां पुनरस्त्युत्पादः, प्रयोजनाभावादिति। (७) एतस्यामवस्थायां गुणसंबन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इति।

एतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन्पुरुषः कुशल इत्याख्यायते। प्रतिप्रसवेऽपि चित्तस्य मुक्तः कुशल इत्येव भवति, गुणातीतत्वादिति॥२७॥

सूत्रार्थः - तस्योत्पन्नविवेकज्ञानस्य, ज्ञातव्य-विवेकरूपाः प्रज्ञाप्रान्तभूमौ-सकल-सालम्बनसमाधिपर्यन्ते सप्तप्रकाराभवति। तत्र कार्य्यविमुक्तिरूपाश्चतुःप्रकाराः – ज्ञातं मया ज्ञेयं न ज्ञातव्यं किञ्चिदस्ति, क्षीणा मे क्लेशानकिञ्चित्क्षेतव्यमस्ति, अधिगतं मया ज्ञानम्, प्राप्तामया विवेकख्यातिरिति। प्रत्ययान्तरपरिहारेण तस्यामवस्थायाम् ईदृश्येव प्रज्ञा जायते। ईदृशी प्रज्ञाकार्यविषयं निर्मलं ज्ञानम्, कार्य्यविमुक्तिरित्युच्यते। चित्तविमुक्तिस्त्रिविधा – चरितार्था मे बुद्धिः गुणाश्च कृताधिकारागिरिशिखरनिपतितः इवग्रावाणो न पुनः स्थितिं यास्यन्ति, स्वकारणे प्रविलयाभिमुखानां गुणानां मोहाभिधानमूलकारणाभावान्निष्प्रयोजनत्वाच्चामीषां कुतः प्ररोहो भवत्। स्वात्मीभूतश्च मे समाधिः, तस्मिन्सति स्वरूपप्रतिष्ठोऽहमिति। ईदृशी त्रिप्रकाराचित्तविमुक्तिः। तदेवमीदृश्यासप्तविध प्रान्तभूमि प्रज्ञायामुपजातायां पुरुषः केवल इत्युच्यते। ।२७॥

विवेकख्यातेः कारणमाह

**योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः॥२८॥**

**व्या०भा०** - योगाङ्गान्यष्टावभिधायिष्यमाणानि। तेषामनुष्ठानात्पञ्चपर्वणो विपर्ययस्याशुद्धिरूपस्य क्षयोनाशः। तत्क्षये सम्यग्ज्ञानस्याभिव्यक्तिः। यथा यथा च साधनान्यनुष्ठीयन्ते तथा तथा तनुत्वमशुद्धिरापद्यते। यथा यथा च क्षीयते तथा तथा क्षय क्रमानुरोधिनी ज्ञानस्यापि दीप्तिर्विवर्धते। सा खल्वेषा विवृद्धिः प्रकर्षमनुभवत्याविवेकख्यातेः। आगुणपुरुषस्वरूप विज्ञानादित्यर्थः। योगाङ्गानुष्ठानमशुद्धेर्वियोगकारणम्यथा परशुश्छेद्यस्य। विवेकख्यातेस्तु प्राप्तिकारणं यथा धर्मः सुखस्य, नान्यथा कारणम्। कति चैतानि कारणानि शास्त्रे भवन्ति ?

नवैवेत्याह। तद्यथा-

उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः।

वियोगान्यत्वधृतयः कारणं नवधा स्मृतम्॥इति।

तत्रोत्पत्तिकारणं मनो भवति, ज्ञानस्य स्थितिकारणं मनसः पुरुषार्थता, शरीरस्येवाहार इति। अभिव्यक्ति कारणं यथा रूपस्यालोकस्तथा रूपज्ञानम्, विकारकारणं- मनसो विषयान्तरम्, यथाग्निः पाक्यस्य। प्रत्ययकारणं धूमज्ञानमग्निज्ञानस्य। प्राप्तिकारणं- योगाङ्गानुष्ठानं विवेकख्यातेः। वियोगकारणं तदेवाशुद्धेः। अन्यत्वकारणं यथा सुवर्णस्य सुवर्णकारः। एवमेकस्य स्त्रीप्रत्ययस्याविद्या मूढत्वे, द्वेषो दुःखत्वे, रागः सुखत्वे, तत्त्वज्ञानं माध्यस्थ्ये। धृतिकारणं- शरीरमिन्द्रियाणाम्, तानि च तस्य। महाभूतानि शरीराणाम्, तानि च परस्परं सर्वेषाम्। तैर्यग्यौनमानुष दैवतानि च परस्परार्थत्वादिति।

एवं नव कारणानि। तानि च यथा संभवं पदार्थान्तरेष्वपि योज्यानि। योगाङ्गानुष्ठानं तु द्विधैव कारणत्वं लभत इति॥२८॥

सूत्रार्थः – योगाङ्गानि वक्ष्यमाणानि, तेषामनुष्ठानाज्ज्ञान पूर्वकाभ्यासादाविवेकख्यातेरशुद्धिक्षये चित्तसत्त्वस्य प्रकाशावरणलक्षणक्लेशरूपाशुद्धिक्षये या ज्ञानदीप्तिः, तारतम्येन सात्त्विकः परिणामो विवेकख्यातिपर्य्यन्तः स तस्याः ख्यातेर्हेतुरित्यर्थः। ।२८॥

योगाङ्गानि

**यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि। ।२९।।**

**व्या०भा० –** यथाक्रममेषामनुष्ठानं स्वरूपं च वक्ष्यामः॥२९॥

**सूत्रार्थः –** इह कानिचित्समाधेः साक्षादुपकारकत्वेनान्तराणि अङ्गानि यथा धारणादीनि। कानिचित्प्रतिपक्षभूतहिंसादि वितर्कोन्मूलनद्वारेण समाधिमुपकुर्वन्ति, यथा यमनियमादयः। तत्र आसनादीनामुत्तरोत्तरमुपकारकत्वम्। तद्यथा सत्यासनजये प्राणायामस्थैर्य्यम्। एवमुत्तरत्रापि योज्यम्। ।२९॥

यमस्य स्वरूपम्

**अहिंसा-सत्यास्तेय-ब्रह्मचर्य्यापरिग्रहा यमाः॥३०॥**

**व्या०भा० –** तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः, उत्तरे च यमनियमा-स्तन्मूलास्तत्सिद्धिपरतयैव तत्प्रतिपादनाय प्रतिपाद्यन्ते, तदवदातरूपकरणायैवोपादीयन्ते। तथा चोक्तम् – स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्तमानस्तामेवावदात रूपामहिंसां करोति।

सत्यं यथार्थे वाङ्मनसे। यथा दृष्टं यथानुमितं यथाश्रुतं तथावाङ् मनश्चेति। परत्र स्वबोधसंक्रान्तये वागुक्ता सा यदि नवञ्चिता भ्रान्ता वा प्रतिपत्तिबन्ध्या वा भवेदिति। एषा सर्वभूतो-पकारार्थं प्रवृत्तानभूतोपघाताय। यदि चैवमप्यभिधीयमाना भूतोपघातपरैवस्यान्न सत्यं भवेत्पापमेव भवेत्। तेन पुण्याभासेन पुण्यप्रतिरूपकेण कष्टतमं प्राप्नुयात्, तस्मात्परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात्। स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणम्, तत्प्रतिषेधः पुनरस्पृहारूपमस्तेयमिति। ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः। विषयाणामर्जनरक्षणक्षयसङ्ग हिंसादोषदर्शनादस्वीकरण-मपरिग्रह इत्येते यमाः॥३०॥

**सूत्रार्थः** – तत्र प्राणवियोग प्रयोजनव्यापारो हिंसा। सा च सर्वानर्थहेतुः। तदभावोऽहिंसा। हिंसायाः सर्वकालमेव परिहार्य्यत्वात्प्रथमं तदभावरूपाया अहिंसायानिर्देशः। सत्यं वाङ्मनसोर्यथार्थत्वम्। स्तेयं परस्वापहरणम्, तदभावोऽस्तेयम्। ब्रह्मचर्यमुपस्थ संयमः। अपरिग्रहो भोगसाधनानामस्वीकरणम्। ते एतेऽहिंसादयः पञ्च यमशब्दवाच्यायोगाङ्गत्वेन निर्दिष्टाः॥३०॥

**जाति-देश-काल-समयानवच्छिन्ना सार्वभौमामहाव्रतम्** ॥३१॥

यमादीनां विशेषमाह

**व्या०भा०** – तत्राहिंसा जात्यवच्छिन्नामत्स्यवधकस्य मत्स्येष्वेव नान्यत्र हिंसा। सैव देशावच्छिन्नानतीर्थे हनिष्यामीति। सैव कालावच्छिन्ना न चतुर्दश्यां न पुण्येऽहनि हनिष्यामीति। सैव त्रिभिरुपरतस्य समयावच्छिन्नादेव ब्राह्मणार्थेनान्यथा हनिष्यामीति। यथा च क्षत्रियाणां युद्ध एव हिंसानान्यत्रेति। एभिर्जातिदेशकालसमयैरनवच्छिन्ना। अहिंसादयः सर्वथैव परिपालनीयाः। सर्वभूमिषु सर्वविषयेषु सर्वथैवाविदितव्यभिचाराः सार्वभौमामहाव्रतमित्युच्यन्ते॥३१॥

**सूत्रार्थः** - जातिर्ब्राह्मणत्वादिः। देशस्तीर्थादिः। कालश्चतुर्दश्यादिः। समयो ब्राह्मणप्रयोजनादिः। एतैश्चतुर्भिरनवच्छिन्नाः पूर्वोक्ताः अहिंसादयोयमाः सर्वासु क्षिप्तादिषु चित्तभूमिषु भवा महाव्रतमित्युच्यते। तद्यथा-

ब्राह्मणं न हनिष्यामि, तीर्थं न कञ्चन हनिष्यामि, चतुर्दश्यां न हनिष्यामि, देवब्राह्मणप्रयोजनव्यतिरेकेण कमपि हनिष्यामीति। एवं चतुर्विधावच्छेदव्यतिरेकेण किञ्चित्क्वचित्कदाचित् कस्मिंश्चिदर्थे न हनिष्यामीत्यनवच्छिन्नाः। एवं सत्यादिषु यथायोगं योज्यम्। इत्थमनियतीकृताः सामान्ये नैव प्रवृतामहाव्रतमित्युच्यते, न पुनः परिच्छिन्नावधारणम्। ।३१।

नियमानाह

**शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः। ।३२।।**

**व्या०भा० -** तत्र शौचं मृज्जलादिजनितं मे ध्याभ्यवहरणादि च बाह्यम्। आभ्यन्तरं चित्तमला नामा क्षालनम्। संतोषः संनिहितसाधनादधिकस्यानुपादित्सा। तपो द्वन्द्वसहनम्। द्वन्द्वश्च जिघत्सा पिपासे, शीतोष्णे, स्थानासने, काष्ठमौनाकार मौने च। व्रतानि चैषां यथायोगं कृच्छ्रचान्द्रायणसान्तपनादीनि। स्वाध्यायो मोक्षशास्त्राणामध्ययनं प्रणवजपो वा। ईश्वरप्रणिधानं तस्मिन्परमगुरौ सर्वकर्मार्पणम्॥३२॥

**सूत्रार्थः** – शौचं द्विविधम् - ब्राह्यमाभ्यन्तरञ्च। बाह्यं मृज्जलादिभिः कायादि प्रक्षालनम्। आभ्यन्तरं मैत्र्यादिभिश्चित्तमलानां प्रक्षालनम्। सन्तोषस्तुष्टिः। शेषाः प्रागेव (२।१) कृतव्याख्यानाः। एते शौचादयो नियमशब्दवाच्याः। ।३२। ।

कथं यमनियमादीनां योगाङ्गत्वम्

**वितर्कबाधने प्रतिपक्षभावनम्। ।३३।।**

**व्या०भा०** – यदास्य ब्राह्मणस्य हिंसादयो वितर्का जायेरन्हनिष्याम्यहमपकारिणमनृतमपि वक्ष्यामि, द्रव्यमप्यस्य स्वीकरिष्यामि, दारेषु चास्य व्यवायी भविष्यामि, परिग्रहेषु चास्य स्वामी भविष्यामीति॥३३॥

**सूत्रार्थः** –वितर्क्यन्ते इति वितर्कायोगपरिपन्थिनो हिंसादयः, तेषां प्रतिपक्षभावने सति यदा बाधा भवति तदा योगः सुकरो भवतीति भवत्येव यम-नियमानां योगाङ्गत्वम्। एवामुन्मार्गप्रवणवितर्कज्वरेणातिदीप्तेन बाध्यमानस्तत्प्रतिपक्षान्भावयेत्। ३३। ।

वितर्काणां स्वरूपं,भेदप्रकारं, फलं च

**वितर्का हिंसादयः कृत-कारितानुमोदिता लोभ-क्रोध-मोह-पूर्वकामृदु-मध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्। ।३४। ।**

**व्या०भा० -** तत्र हिंसा तावत्कृतकारितानुमोदितेति त्रिधा। एकैका पुनस्त्रिधा लोभेन मांसचर्मार्थेन, क्रोधेनापकृतमनेनेति, मोहेन धर्मो मे भविष्यतीति। लोभक्रोधमोहाः पुनस्त्रिविधा मृदुमध्याधिमात्रा इति। एवं सप्तविंशतिर्भेदा भवन्ति हिंसायाः। मृदुमध्याधिमात्राः पुनस्त्रिविधाः- मृदुमृदुर्मध्यमृदुस्तीव्रमृदुरिति। तथा मृदुमध्योमध्यमध्यस्तीव्रमध्य इति। तथा मृदुतीव्रो मध्य-तीव्रोऽधिमात्रतीव्र इति। एवमेकाशीतिभेदा हिंसाभवति। सा पुनर्नियम विकल्पसमुच्चयभेदादसंख्ये या प्राणभृद्भेदस्या-परिसंख्येयत्वादिति। एवमनृतादिष्वपि योज्यं यथा संभवम्। एवं वितर्काणां चामुमेवानुगतं विपाकमनिष्टं भावयन्नवितर्केषु मनःप्रणिधीत॥३४॥

**सूत्रार्थः** – एते पूर्वोक्ता हिंसादयः प्रथमं त्रिधा भिद्यन्ते, कृत-कारितानुमोदितभेदेन। तत्र स्वयं निष्पादिताः कृताः। 'कुरुकुरु' इति प्रयोजकव्यापारेण समुत्पादिताः कारिताः। अन्येन क्रियमाणाः साध्वित्यङ्गाकृता अनुमोदिता। एतच्च त्रैविध्यं परस्परं व्यामोहनिवारणायोच्यते। अन्यथा मन्दमतिरेवं मन्येत मया स्वयं हिंसानकृतेति नास्ति मे दोष इति। एतेषां कारणप्रतिपादनाय लोभ-क्रोध-मोहपूर्वका इति। यद्यपि लोभः प्रथमं निर्दिष्टः, तथाऽपि सर्वक्लेशानां मोहस्यानात्मन्या-त्माभिमानलक्षणस्य निदानत्वात्तस्मिन्सति स्व-पर-विभागपूर्वकत्वेन लोभक्रोधादीनामुद्भवाद् मूल्यमवसेयम्। मोहपूर्विका सर्वादोषजातिरित्यर्थः। लोभस्तृष्णा, क्रोधः कृत्याकृत्यविवेकोन्मूलकः प्रज्वलनात्मकश्चित्तधर्मः। प्रत्येकं

कृतादिभेदेन त्रिप्रकारा अपि हिंसादयो मोहादिकारणत्वेन त्रिधा भिद्यन्ते। एषामेव पुनरवस्था भेदेन त्रैविध्यमाह-मृदु-मध्याधिमात्राः। मृदवो मन्दाः, न तीव्रानापि मध्याः। मध्यानापि मन्दानापि तीव्राः। अधिमात्रास्तीव्राः न मध्यानापि मन्दाः, इति नवभेदाः। इत्थं त्रैविध्ये सति सप्तविंशतिर्भवति। मृद्वादीनामपि प्रत्येकं मृदु-मध्याधि-मात्रभेदात्त्रैविध्यं सम्भवति। तद्यथा योगं योज्यम्। तद्यथा- मृदु-मृदुमृदुर्मध्योमृदुतीव्र इति। एषां फलमाह- दुःखाज्ञानानन्तफलाः, दुःखं प्रतिकूलतयाऽवभासमानो राजश्चित्तधर्मः। अज्ञानं मिथ्याज्ञानं संशयविपर्ययरूपम्। ते दुःखाज्ञाने अनन्तमपरिच्छिन्नं फलं येषां ते तथोक्ताः। इत्थं तेषां स्वरूपकारणादि भेदेन ज्ञातानां प्रतिपक्षभावनया योगिनापरिहारः कर्तव्य इत्युपदिष्टं भवति। ।३४। ।

अहिंसा अभ्यासात्वैरं न भविष्यति

**अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः॥३५॥**

**व्या०भा०** –सर्वप्राणिनां भवति॥३५॥

**सूत्रार्थः** – तस्य अहिंसां भावयतः सन्निधौ सहजविरोधिना-मप्यहिनकुलादीनां वैरत्यागो निर्मत्सरतयाऽवस्थानं भवति, हिंस्रा अपि हिंस्रत्वं परित्यजन्तीत्यर्थः। ।३५। ।

सत्याभ्यासवतः किं भवति

**सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्। ।३६। ।**

**व्या०भा०** –धार्मिको भूया इति भवति धार्मिकः। स्वर्गं प्राप्नुहीतिस्वर्गं प्राप्नोति। अमोघास्य वाग्भवति॥३६॥

**सूत्रार्थः** – क्रियमाणा हि क्रिया यागादिकाः फलं स्वर्गादिकं प्रयच्छन्ति। तस्य तु सत्याभ्यासवतो योगिनस्तथा सत्यं प्रकृष्यते, यथाऽकृतायामपि क्रियायां योगीफलमाप्नोति।

तद्वचनाद्यस्य कस्य चिकित्रियामकुर्वतोऽपि क्रियाफलं भवतीत्यर्थः। ।३६। ।

अस्तेयाभ्यासवतः फलम्

**अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्॥३७॥**

**व्या०भा०** –सर्वदिक्स्थान्यस्योपतिष्ठन्ते रत्नानि॥३७॥

**सूत्रार्थः** – अस्तेयं यदाऽभ्यस्यति योगी, तदाऽस्य तत्प्रकर्षान्निरभिलाषस्यापि सर्वतो दिग्भ्यो रत्नानि उपतिष्ठन्ते। ।३७। ।

ब्रह्मचर्याभ्यासस्य फलम्

**ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः॥३८॥**

**व्या०भा०** –यस्य लाभादप्रतिघान्गुणानुत्कर्षयति, सिद्धश्च विनेयेषु ज्ञानमाधातुं समर्थो भवतीति॥३८॥

**सूत्रार्थः** – यः किल ब्रह्मचर्य्यमभ्यस्यति, तस्य तत्प्रकर्षान्निरतिशयं वीर्य्यं सामर्थ्यमाविर्भवति। वीर्य्यानिरोधो हि ब्रह्मचर्यं तस्य प्रकर्षाच्छरीरेन्द्रियमनः सुवीर्य्यप्रकर्षमागच्छति॥३८॥

अपरिग्रहाभ्यासस्य फलम्

**अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः॥३९॥**

**व्या०भा०** – अस्य भवति। कोऽहमासं, कथमहमासं, किंस्विदिदं, कथंस्विदिदम्, के वा भविष्यामः, कथं वा भविष्याम इत्येवमस्य पूर्वान्तपरान्तमध्येष्वात्मभाव जिज्ञासा स्वरूपेणोपावर्तते। एतायमस्थैर्ये सिद्धयः॥३९॥

**सूत्रार्थः** – कथमित्यस्य भावः कथन्ता। जन्मनः कथन्ता 'जन्मकथन्ता', तस्याः सम्बोधः सम्यग्ज्ञानम्। जन्मान्तरे कोऽहमासं कीदृशः किं कार्य्यकारीति जिज्ञासायां सर्वमेव सम्यग्जानातीत्यर्थः। न केवलं भोगसाधनपरिग्रह एव परिग्रहः, किन्तु यावदात्मनः शरीरपरिग्रहोऽपि परिग्रहः,

भोगसाधनत्वाच्छरीरस्य। तस्मिन्सति रागानुबन्धाद्बहिर्मुखायां प्रवृत्तौ न तात्त्विकज्ञानप्रादुर्भावः। यदा पुनः शरीरादि परिग्रहनैरपेक्ष्येण माध्यस्थ्यमवलम्बते, तदा मध्यस्थस्य रागादित्यागात्सम्यग्ज्ञान हेतुर्भवत्येव पूर्वापरजन्मसम्बोधः। ।३९।।

## Summarised Overview

कैवल्यः इत्यस्य विवेचनम्-व्यासभाष्यानुसारेण कृत भोगापवर्गाणां पुरुषार्थशून्यानां यः प्रतिप्रसवः कार्यकारणात्मनां गुणानां तत्कैवल्यम्। स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्त्वाऽनभिसम्बन्धात्पुरुषस्य चितिशक्तिः एवकेवला, तस्याः सदा तथैवावस्थानं कैवल्यम्। योगसूत्रकारः, महर्षिपतञ्जलिः आह- "योगाङ्गानुष्ठानाद् अशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः।" प्रत्येकसाधकानां क्रियायोगस्य समाधियोगस्य च अभ्यासेन इष्टसिद्धिः भवति। क्रियायोगाभ्यासस्य फलं द्विप्रकारकं 1. क्लेशतनूकरणम्, 2. समाधिभावना च भवति। क्रियायोगेन पञ्चप्रकारकाः क्लेशाः क्षीयन्ते एवं प्रसंख्यानं (ज्ञानं) भवति। एवं क्लेशानां तत्त्वमभिधायकर्माशयस्वरूपं अभिहितम्। मानसपटलेसमाधिः इत्यस्य भावना अपि उत्पन्ना भवति। यम-नियमादि-अङ्गानामनुष्ठानेन चित्तस्य वृत्तीनां निरोधे सति पुरुषः पूर्ण-चैतन्यरूपस्य लाभं प्राप्नोति।

यमः – अहिंसा- सत्य- अस्तेय- ब्रह्मचर्य- अपरिग्रहभेदेन यमः पञ्चविधः। परापीडनमहिंसेति कथ्यते। अहिंसकं प्रति न कोऽपि प्राणी वैरी भवति। सर्वेऽपि प्राणिनः तस्मिन्वैररहिता भवन्ति। कथितं च- अहिंसा प्रतिष्ठायां तत्सन्निधौवैरत्यागः। कीदृशस्याप्यसत्यस्याभाषणं सत्यमिति निगद्यते। सत्यभाषणेन भवति वाण्यमोघा। सत्यभाषीयद्वदति तस्य प्रकाशनमात्रेण फलमुपलब्धं जायते। उक्तञ्च- सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्। चौर्यकर्मणस्त्यागोऽस्तेयमित्युदीर्यते। अस्तेयात्सर्वविधसम्पदां लाभो भवति। नास्तेय साधको भवति कुत्रापि रागो तदभावादसौ तु लक्ष्म्या स्वयमेव मृग्यते। कथितं च-अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्। ब्रह्मचर्येण शारीरिकं मानसिकमात्मिकञ्च बलमेधते। तत्साहाय्येन योगेऽन्तरायमन्तरोन्नतिर्भवति। उक्तञ्च- ब्रह्मचर्यप्रतिष्ठायां

वीर्यलाभः। अपरिग्रहात्भूतभाविजन्मज्ञानमुत्पद्यते। लोभवशात्परवस्तुनोऽपरिग्रहणमपरिग्रह इत्यभिधीयते। कथितं च-अपरिग्रहस्थैर्यजन्मकथन्ता सम्बोधः।

## Assignments

1. कर्मस्वरूपं किम् ?
2. ह्लादपरितापफलाः के ?
3. तस्माच्च सर्वकर्मविपाको दुःखरूप एवेत्युक्तं भवति – सन्दर्भानुसारं विशदयत
4. दृश्यस्य स्वरूपं किम्?
5. दृश्यस्य अवस्थाविशेषाः के ?
6. सर्वे दृष्टारो बन्धरहिताः स्युः - विशदयत
7. संयोगस्य कारणं, स्वरूपं च के ?
8. पुरुषः केवल इत्युच्यते - कदा? विशदयत
9. योगाङ्गानि कानि ? लघुप्रबन्धं लिखत
10. किं नाम महाव्रतम्?

SGOU

## Suggested Readings


1. योगदर्शनम् (प्रत्यक्षानुभूतव्याख्या ) – परमहंसस्वामी श्री आङ्गडानन्दजी, श्रीपरमहंसस्वामी श्रीआङ्गडानन्दजी आश्रम
2. The Yogasutra of Patanjali with the commentary of yoga, Bengali Baba. Motilal Banarsidass publishers 1976, 1st Edition
3. पातञ्जलयोगदर्शनम्वाचस्पतिमिश्र विरचित - तत्ववैशारदी
4. പാതഞ്ജലയോഗദർശനംമലയാളവ്യാഖ്യാനസഹിതം – സ്വാമിജ്ഞാനാനന്ദസരസ്വതി.
5. पातञ्जलयोगदर्शनम्श्रीमद्धारेश्वरभोजदेवविरचित:राजमार्ताण्डविवृत्तिसमेता।
6. भारतीयदर्शनपरिचयः - डा.सुशान्त्एस्, 1st edition, August 2015.


## References


1. पतञ्जलियोगसूत्रम् (व्यासभाष्यसहितम्) MunshiramManoharlal Publications. Pvt. Ltd
2. पातञ्जलयोगदर्शनं, भोजविवृतिसहितं, चौखम्बाअमरभारतीप्रकाशन, वाराणसी - २२१००१


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# योगसूत्रे द्वितीयोऽध्यायः४० -५५सूत्राणि, तृतीयोऽध्यायः१-१५सूत्राणि

## Learning Outcomes

- नियमभेदानधिकृत्य विस्तरेण ज्ञानं लभते।
- योगस्य अन्तरङ्गानि कानि इति विषये अवगाहनं लभते।
- परिणामत्रयान् जानाति।

## Background

धारणा-ध्यान-समाधयश्चान्तरङ्गाणि साधनानि सन्ति। बहिरङ्गसाधनानि, अन्तरङ्गसाधनानि च अधिकृत्य अस्मिन्पाठके वयं पठामः। धातोः एवं प्रयोगः साधुभवति। पादचतुष्टयेषु संयममधिकृत्य तृतीये विभूतिपादे विस्तृततया प्रतिपादितयितव्यः। संयमन्नाम "त्रयमेकत्र संयमः" इति सूत्रोक्तप्रकारेण, एकस्मिन्विषये धारणाध्यानसमाधित्रयं प्रवर्तमानं संयमसंज्ञया शास्त्रे व्यवह्रियते। तत्धारणादित्रयं एकत्र एकविषये क्रियमाणं संयम इत्युच्यते इत्यर्थः। धारणा - ध्यान- स्माधिरूपयोगाङ्गत्रयस्य व्यवहाराय स्वशास्त्रे तान्त्रिकींसंज्ञां उच्यते त्रयमेकत्र संयमः इति। योगसाधनेन प्राप्य सिद्धीनां विचारप्रसङ्गे धारणाध्यानसमाधिविशिष्टसंयमस्य विषयसिद्धार्थक्रमशः निरोधसमाधिः एकाग्रता रूपपरिणामत्रयाणां वर्णनं दृश्यते। तेषु निरोधादिपरिणामानां परिणमनकालविषये मतद्वयं समुपलभ्यते। निरोधपरिणामः, समाधिपरिणामः, एकाग्रतापरिणामः इत्येवं रूपे परिणामत्रये संयमे कृते अतीत-अनागतवस्तुसाक्षात्कारो भवति।।

## Keywords

स्वाङ्गजुगुप्सा -सत्वशुद्धिः- सौमनस्यं- सुखलाभः-इन्द्रियजयं- कायेन्द्रियसिद्धिः – ईश्वरप्रणिधानं-स्वाध्यायः - आसनम् - प्राणायामः - धारणा- प्रत्याहारः - ध्यानम् - समाधिः - परिणामत्रयम्।

## Discussion

नियमानां सिद्धयः

**शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः। ।४०। ।**

**व्या०भा०-** स्वाङ्गे जुगुप्सायां शौचमारभमाणः कायावद्यदर्शी कायानभिष्वङ्गो यतिर्भवति। किं च परैरसंसर्गः कायस्वभावावलोकी स्वमपि कायं जिहासुर्मृज्जलादिभिराक्षालयन्नपि कायशुद्धिमपश्यन्कथं परकायैरत्यन्तमेवाप्रयतैः संसृज्येत॥४०॥

**सूत्रार्थः** – यः शौचं भावयति, तस्य स्वाङ्गेष्वपि कारणस्वरूपपर्यालोचनद्वारेण जुगुप्साघृणासमुपजायते। अशुचिरयं कायो नात्राग्रहः कर्तव्य इत्यमुनैव हेतुना परैरन्यैश्चकायवद्भिरसंसर्गः संसर्गाभावः संसर्गपरिवर्जनमित्यर्थः। यः किलस्वमेव कायं जुगुप्सते तत्तद्वद्यदर्शनात्, स कथं परकीयैस्तथाभूतैश्च कायैः संसर्गमनुभवति।।४०। ।

शौचस्य फलान्तरम्

**सत्त्वशुद्धि - सौमनस्यैकाग्रतेन्द्रियजयात्मदर्शनयोग्यत्वानि च।।४१॥**

**व्या०भा०-** भवन्तीति वाक्यशेषः। शुचेः सत्त्वशुद्धिस्ततः सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वं बुद्धिसत्त्वस्य भवतीत्येतच्छौचस्थैर्यादधिगम्यत इति॥४१॥

सूत्रार्थः – भवन्तीति वाक्यशेषः। सत्त्वं प्रकाशसुखाद्यात्मकम्। तस्य शुद्धीरजस्तमोभ्यामनभिभवः। सौमनस्यं खेदाननुभवेनमानसीप्रीतिः। एकाग्रता नियतेन्द्रियविषये चेतसः स्थैर्य्यम्। इन्द्रियजयो विषयपराङ्मुखानामिन्द्रियाणां स्वात्मन्यवस्थानम्। आत्मदर्शने विवेकख्यातिरूपे चित्तस्य योग्यत्वसमर्थत्वम्। शौचाभ्यासवत एव एते सत्त्वशुद्ध्यादयः क्रमेण प्रादुर्भवन्ति। तथाहि- शौचात्सत्त्वशुद्धिः, सत्त्वशुद्धेः सौमनस्यं, सौमनस्यादेकाग्रता, एकाग्रताया इन्द्रियजयः, इन्द्रियजयादात्मदर्शनयोग्यतेति। ।४१॥

सन्तोषाभ्यासस्य फलम्

**सन्तोषादनुत्तमः सुखलाभः॥४२॥**

**व्या०भा०** –तथा चोक्तम्-

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।
तृष्णाक्षयसुखस्यैतेनार्हतः षोडशीं कलाम्॥इति॥४२॥

**सूत्रार्थः** – सन्तोषप्रकर्षेण योगिनस्तथाविधमान्तरं सुखमाविर्भवति, यस्य बाह्यं विषयसुखं शतां शेनापि न समानं भवति। ।४२। ।

**कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः॥४३॥**

तपसःफलम्

**व्या०भा०** – निर्वर्त्यमानमेव तपो हिनस्त्यशुद्ध्यावरणमलम्। तदावरणमलापगमात्कायसिद्धिरणिमाद्या। तथेन्द्रियसिद्धिर्दूराच्छ्रवणदर्शनाद्येति॥४३॥

**सूत्रार्थः** – तपः समभ्यस्य मानं चेतसः क्लेशादि लक्षणाशुद्धिक्षयद्वारेण कायेन्द्रियाणां सिद्धिमुत्कर्षमादधाति। अयमर्थः – चान्द्रायणादिना चित्तक्लेशक्षयः।

तत्क्षयादिन्द्रियाणां सूक्ष्म- व्यवहित- विप्रकृष्टदर्शनादि सामर्थ्यमाविर्भवति, कायस्य यथेच्छमणुत्व-महत्त्वादीनि॥४३॥

स्वाध्यायस्य फलम्

**स्वाध्यायादिष्टदेवतासम्प्रयोगः॥४४॥**

**व्या०भा०** – देवा ऋषयः सिद्धाश्च स्वाध्यायशीलस्य दर्शनं गच्छन्ति कार्ये चास्य वर्तन्त इति॥४४॥

**सूत्रार्थः** – अभिप्रेतमन्त्र जपादिलक्षणे स्वाध्याये प्रकृष्यमाणे योगिन इष्टया अभिप्रेतया देवतया सम्प्रयोगो भवति। सा देवता प्रत्यक्षीभवतीत्यर्थः। ॥४४॥

ईश्वरप्रणिधानस्य फलम्

**समाधिसिद्धिरीश्वरप्रणिधानात् ॥४५॥**

**व्या०भा०**- ईश्वरार्पितसर्वभावस्य समाधिसिद्धिर्यया सर्वमीप्सितमवितथं जानाति देशान्तरे देहान्तरे कालान्तरे च। ततोऽस्य प्रज्ञा यथाभूतं प्रजानातीति॥४५॥

**सूत्रार्थः** - ईश्वरे यत्प्रणिधानं भक्तिविशेषस्तस्मात्समाधेरुक्त-लक्षणस्याविर्भावो भवति। यस्मात्सभगवानीश्वरः प्रसन्नः सन्नन्तरायरूपान्क्लेशान्परिहृत्यसमाधिमुद्बोधयति। ॥४५॥

आसनम्

**स्थिरसुखमासनम्॥४६॥**

**व्या०भा०** -तद्यथापद्मासनं, वीरासनं, भद्रासनं, स्वस्तिकं, दण्डासनं, सोपाश्रयं, पर्यङ्क, क्रौञ्चनिषदनं, हस्ति निषदनमुष्ट्रनिषदनं, समसंस्थानं, स्थिरसुखं यथासुखं चेत्येवमादीनि॥४६॥

**सूत्रार्थः** - आस्यतेऽनेनेत्यासनं पद्मासन-दण्डासन-स्वस्तिकादि। तद्यदा स्थिरं निष्कम्पम्, सुखमनुद्वेजकञ्च भवति तदा योगाङ्गतां भजते।।४६।।

स्थिरसुखप्राप्त्यर्थम् उपायम्

**प्रयत्नशैथिल्यानन्त्यसमापत्तिभ्याम् ॥४७॥**

**व्या०भा०** – भवतीति वाक्यशेषः। प्रयत्नोपरमात्सिध्यत्यासनं येन नाङ्गमेजयो भवति। अनन्तेवासमापन्नं चित्तमासनं निर्वर्तयतीति॥४७॥

**सूत्रार्थः** – तदासनं प्रयत्न शैथिल्येन आनन्त्यसमापत्त्या च स्थिरं सुखं भवतीति सम्बन्धः। यदायदा 'आसनं बध्नामीति' इच्छां करोति, प्रयत्नशैथिल्येऽपि अक्लेशेनैव तदाऽऽसनं सम्पद्यते। यदा आकाशादिगते आनन्त्ये चेतसः समापत्तिः क्रियतेऽवधानेन तादात्म्यमापद्यते, तदा देहाहङ्काराभावान्नासनं दुःखजनकं भवति। अस्मिंश्चासनजये सति समाध्यन्तराय भूतानप्रभवन्ति अङ्गमेजयत्वाद्यः। ।४७। ।

आसनस्य फलम्

**ततो द्वन्द्वानभिघातः॥४८॥**

**व्या०भा०** - शीतोष्णादिभिर्द्वन्द्वैरासनजयान्नाभिभूयते॥४८॥

**सूत्रार्थः** – तस्मिन्नासनजये सति द्वन्द्वैः शीतोष्ण-क्षुत्तृष्णादिभिर्योगी इत्यर्थः॥४८॥

प्राणायामः

**तस्मिन्सति श्वास-प्रश्वासयोर्गतिविच्छेदः प्राणायामः॥४९॥**

**व्या०भा०** – सत्यासनजये बाह्यस्य वायोराचमनं श्वासः। कौष्ठ्यस्य वायोनिःसारणं प्रश्वासः। तयोर्गतिविच्छेद उभयाभावः प्राणायामः॥४९॥

**सूत्रार्थः** – आसनस्थैर्य्ये सति तन्निमित्तकः प्राणायामलक्षणो योगाङ्गविशेषोऽनुष्ठेयो भवति। कीदृशः श्वास-प्रश्वासयोर्गतिविच्छेदलक्षणः। श्वास-प्रश्वासौ कृतलक्षणौ (१।३१)। तयोर्द्वेधा रेचकपूरकद्वारेण बाह्याभ्यन्तरेषु स्थानेषु गतेः प्रवाहस्यविच्छेदोधारणम्, प्राणायाम उच्यते॥४९॥

प्राणायामस्य स्वरूपम्

**स तु बाह्याभ्यन्तरस्तम्भकवृत्तिदेशकालसङ्ख्याभिः परिदृष्टो दीर्घ-सूक्ष्मः। ॥५०॥**

**व्या०भा०** – यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः। यत्र श्वासपूर्वको गत्यभावः स आभ्यन्तरः। तृतीयः स्तम्भवृतिर्यत्रोभयाभावः स कृत्प्रयत्नाद्भवति। यथा तप्तेन्यस्तमुपलेजलं सर्वतः संकोचमापद्यते तथा द्वयोर्युगपद्गत्यभाव इति। त्रयोऽप्येते देशेन परिदृष्टा इयानस्य विषयो देश इति। कालेन परिदृष्टा क्षणानामियत्तावधारणेनावच्छिन्ना इत्यर्थः। संख्याभिः परिदृष्टा एतावद्भिः श्वासप्रश्वासैः प्रथम उद्धातस्तद्वन्निगृहीतस्यैतावद्भि द्वितीय उद्धात एवं तृतीयः। एवं मृदुरेवं मध्य एवं तीव्र इति संख्यापरिदृष्टः। स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः॥५०॥

**सूत्रार्थः** – बाह्यवृत्तिः श्वासो रेचकः। अन्तर्वृत्तिः प्रश्वासः पूरकः। आन्तरस्तम्भकवृत्तिः कुम्भकः, तस्मिन्जलमिव कुम्भे निश्चलतया प्राणा अवस्थाप्यन्त इति कुम्भकः। त्रिविधोऽयं प्राणायामः देशेनकालेन सङ्घय या चोपलक्षितो दीर्घ-सूक्ष्म संज्ञो भवति। देशेनोपलक्षितोयथा 'नासाद्वादशान्तादौ' नासामारभ्यद्वादशाङ् गुलिपर्यन्तमित्यर्थः। कालेनोपलक्षितो यथा षट्त्रिंशन्मात्रादि प्रमाणः। सङ्ख्ययोपलक्षितोयथाइयतोवारान्कृतः, एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातो भवतीति। एतज्ज्ञानाय सङ्घया ग्रहणमुपात्तम्। उद्घातो नाम नाभिमूलात्प्रेरितस्य वायोः शिरस्यभिहननम्॥५०॥

चतुर्थः प्राणायामः

**बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः। ।५१। ।**

**व्या०भा०** – देशकालसंख्याभिर्बाह्यविषयपरिदृष्ट आक्षिप्तः। तथाभ्यन्तरविषयपरिदृष्ट आक्षिप्तः। उभयथा दीर्घसूक्ष्मः।

तत्पूर्वको भूमिजयात्क्रमेणोभयोर्गत्य भावश्चतुर्थः प्राणायामः। तृतीयस्तु विषयानालोचितो गत्यभावः सकृदारब्ध एव, देशकालसंख्याभिः परिदृष्टये दीर्घसूक्ष्मः। चतुर्थस्तु श्वासप्रश्वासयोर्विषयावधारणात्क्रमेण भूमिजयादुभयाक्षेपपूर्वको गत्यभावश्चतुर्थः प्राणायाम इत्ययं विशेषः॥५१॥

**सूत्रार्थः** – प्राणस्य बाह्यो विषयो नासाद्वादशान्तादिः। आभ्यन्तरो विषयो हृदयनाभिचक्रादिः। तौ द्वौ विषयौ आक्षिप्य पर्यालोच्ययः स्तम्भरूपो गतिविच्छेदः स चतुर्थः प्राणायामः। तृतीयस्मात्कुम्भकाख्यादयमस्य बिशेषः। स बाह्याभ्यन्तर विषयावपर्यालोच्य सहसा तप्तोपलनिपतितजलन्यायेन युगपत्स्तम्भवृत्त्या निष्पद्यते। अस्य तु विषयाक्षेपको निरोधः। अयमपि पूर्ववद्देशकालसङ्ख्याभिरुपलक्षितो द्रष्टव्यः। ।५१। ।

**ततः क्षीयते प्रकाशावरणम् ।५२। ।**

चतुर्विधस्य प्राणायामस्य फलम्

**व्या०भा०** - प्राणायामानभ्यस्यतोऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म। यत्तदाचक्षते – महामोहमयेन इन्द्रजालेन प्रकाशशीलं सत्त्वमावृत्यतदेवाकार्ये नियुङ्क्त इति। तदस्य प्रकाशावरणं कर्मसंसारनिबन्धनं प्राणायामाभ्यासाद् दुर्बलं भवति प्रतिक्षणं च क्षीयते। तथा चोक्तम् – तपो न परं प्राणायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति॥५२॥

**सूत्रार्थः** – ततः तस्मात्प्राणायामात्प्रकाशस्य चित्तसत्त्वगतस्य यदावरणं क्लेशरूपं तत्क्षीयते विनश्यतीत्यर्थः। ।५२। ।

**धारणासु च योग्यता मनसः। ।५३। ।**

फलान्तरम्

**व्या०भा०** - प्राणायामाभ्यासादेव, प्रच्छर्दनविधारणाभ्यां वा प्राणस्य (१/३४) इति वचनात्॥५३॥

सूत्रार्थः - धारणावक्ष्यमाणलक्षणाः, तासु प्राणायामैः क्षीणदोषं मनो यत्र यत्र धार्य्यते तत्र तत्र स्थिरं भवति न विक्षेपं भजते। ।५३। ।

प्रत्याहारः

**स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥५४॥**

**व्या०भा०** – स्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इवेति चित्तनिरोधे चित्तवन्निरुद्धानीन्द्रियाणि नेतरेन्द्रियजय वदुपायान्तरमपेक्षन्ते। यथा मधुकरराजं मक्षिका उत्पतन्तमनूत्पतन्ति निविशमानमनुनिविशन्ते तथेन्द्रियाणि चित्तनिरोधे निरुद्धानीत्येष प्रत्याहारः॥५४॥

**सूत्रार्थः** – इन्द्रियाणिस्वस्वविषयेभ्यः प्रत्याह्रियन्ते प्रतिकूलतया आह्रियन्तेऽस्मिन्निति प्रत्याहारः। स च कथं निष्पद्यत इत्याह- चक्षुरादीनामिन्द्रियाणां स्वः स्वोविषयो रूपादिः। तेन सम्प्रयोगः तदाभिमुख्येन वर्त्तनम्तदभावस्तदाभिमुख्यं परित्यज्य स्वरूपमात्रेऽवस्थानम्। तस्मिन्सति चित्तस्वरूपमात्रानुकारिणीन्द्रियाणि भवन्ति, यतश्चित्तमनुवर्त- मानानि मधुकरराजमिव मधुमक्षिकाः सर्वाणीन्द्रियाणि प्रतीयन्ते। अतश्चित्तनिरोधे सर्वाणीन्द्रियाणि प्रत्याहृतानि भवन्ति। तेषां तत्स्वरूपानुकारः प्रत्याहार उक्तः॥५४॥

**ततः परमावश्यतेन्द्रियाणाम्। ।५५। ।**

प्रत्याहारफलम्

**व्या०भा०** – शब्दादिष्वव्यसनमिन्द्रियजय इति केचित्। सक्तिर्व्यसनं व्यस्तत्येनं श्रेयस इति। अविरुद्धाप्रतिपत्तिर्न्याय्या। शब्दादि संप्रयोगः स्वेच्छयेत्यन्ये। रागद्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञानमिन्द्रियजय इति केचित्। चित्तैकाग्र्याप्रतिपत्तिरेवेति जैगीषव्यः। ततश्च परमा तु इयं वश्यतायच्चित्तनिरोधे निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवत्प्रयत्न कृतमुपायान्तरमपेक्षन्ते योगिन इति॥५५॥

**सूत्रार्थः** – अभ्यस्यमाने हि प्रत्याहारे तथा वश्यान्यायतानि इन्द्रियाणि सम्पद्यन्ते, यथा बाह्यविषयाभिमुखतां नीयमानान्यपि न यान्तीत्यर्थः॥५५॥

## अथ तृतीयोऽध्यायः -

धारणा

**देशबन्धश्चित्तस्य धारणा ॥१॥**

**व्या०भा०** - नाभिचक्रे, हृदयपुण्डरीके, मूर्धिनज्योतिषि, नासिकाग्रे, जिह्वाग्र इत्येवमादिषु देशेषु बाह्येवाविषये चित्तस्य वृत्तिमात्रेण बन्ध इति धारणा॥१॥

**सूत्रार्थः** – देशे नाभिचक्रनासाग्रादौ चित्तस्य बन्धो विषयान्तरपरिहारेण यश्चित्तस्य स्थिरीकरणम्, सा चित्तस्य धारणोच्यते। अयमर्थः- मैत्र्यादि चित्तपरिकर्मवासितान्तः करणेन यमनियमवताजितासनेन परिहृतप्राणविक्षेपेण प्रत्याहृतेन्द्रिय ग्रामेण निर्बाधे प्रदेश ऋजुकायेन जितद्वन्द्वेन योगिना नासाग्रादौ सम्प्रज्ञातस्य समाधेरभ्यासाय चित्तस्य स्थिरीकरणं कर्त्तव्यमिति। ।१। ।

**तत्र प्रत्ययैकतानता ध्यानम् ॥२॥**

**व्या०भा०** – तस्मिन्देशे ध्येयालम्बनस्य प्रत्ययस्यैकता न तासदृशः प्रवाहः प्रत्ययान्तरेणा परामृष्टो ध्यानम्॥२॥

**सूत्रार्थः** - तत्रतस्मिन्प्रदेशे, यत्रचित्तंधृतंतत्र, प्रत्ययस्यज्ञानस्य, याएकतानताविसदृशपरिणामपरिहारद्वारेणयदेवधारणायामव लम्बनीकृतम्, तदवलम्बनतयैवनिरन्तरमुत्पत्तिःसाध्यानमुच्यते। ।२। ।

**तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः॥३॥**

समाधिः

व्या०भा० – ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते॥३॥

सूत्रार्थः – तदेवोक्तलक्षणं ध्यानं, यत्रार्थमात्रनिर्भास समर्थाकारसमावेशादुद्भूतार्थरूपं, न्यग्भूतज्ञानस्वरूपत्वेन स्वरूपशून्यतामिवापद्यते, स समाधिरित्युच्यते। सम्यक् आधीयत एकाग्रीक्रियते विक्षेपान्परिहृत्यमनो यत्र ससमाधिः॥३॥

तान्त्रिकीसंज्ञा

**त्रयमेकत्र संयमः॥४॥**

व्या०भा० – तदेतद्धारणाध्यानसमाधित्रयमेकत्र संयमः। एकविषयाणि त्रीणि साधनानि संयम इत्युच्यते। तदस्यत्रयस्य तान्त्रिकी परिभाषासंयम इति॥४॥

सूत्रार्थः – एकस्मिन्विषये धारणा-ध्यान-समाधित्रयं प्रवर्तमानं संयमसंज्ञया शास्त्रे व्यवह्रियते॥४॥

प्रज्ञायाः फलम्

**तज्जयात्प्रज्ञालोकः॥५॥**

व्या०भा० –तस्य संयमस्य जयात्समाधिप्रज्ञाया भवत्यालोको, यथा यथा संयमः स्थिरपदो भवति तथा तथा समाधिप्रज्ञा विशारदी भवति॥५॥

सूत्रार्थः – तस्य संयमस्य जयादभ्यासेन सात्म्योत्पादनात् , प्रज्ञायाज्ञातव्यविवेकरूपायाः, आलोकः प्रसरो भवति, प्रज्ञाज्ञेयं सम्यगवभासयतीत्यर्थः॥५॥

**तस्य भूमिषु विनियोगः॥६॥**

व्या०भा० – तस्य संयमस्य जितभूमेर्यानन्तरा भूमिस्तत्र विनियोगः। न

प्रज्ञायाः उपयोगम्

ह्यजिताधरभूमिरनन्तरभूमिविलङ्घयप्रान्तभूमिषु संयमं लभते। तदभावच्च कुतस्तस्य प्रज्ञालोकः ! ईश्वर-प्रसादाज्जितोत्तरभूमिकस्य च नाधरभूमिषु परचित्तज्ञानादिषु संयमो युक्तः। कस्मात् ? तदर्थस्यान्यत एवावगतत्वात्।

भूमेरस्या इयमनन्तरा भूमिरित्यत्र योग एवोपाध्यायः। कथम् ?

एवं ह्युक्तम् – योगेन योगो ज्ञातव्यो योगो योगात्प्रवर्तते। योऽप्रमत्तस्तुयोगेनसयोगेरमतेचिरम्इति॥६॥

**सूत्रार्थः** - तस्यसंयमस्य, भूमिषुस्थूल-सूक्ष्मावलम्ब भेदेन स्थितासु चित्तवृत्तिषु, विनियोगः कर्त्तव्यः, अधरामधरां चित्तभूमिं जितां जितां ज्ञातोत्तरस्यां भूमौ संयमः कार्य्यः, नह्यानात्मीकृताधरभूमिरुत्तरस्यां भूमौ संयमं कुर्वाणः फलभाग्भवति॥६॥

साधनपादे त्रयाणां योगाङ्गानां परामर्शः कथं न कृतः इत्यत आह

**त्रयमन्तरङ्गं पूर्वेभ्यः॥७॥**

**व्या०भा०** – तदेतद्धरणाध्यानसमाधित्रयमन्तरङ्गं संप्रज्ञातस्य समाधेः पूर्वेभ्यो यमादिभ्यः पञ्चभ्यः साधनेभ्य इति॥७॥

**सूत्रार्थः** – पूर्वेभ्यो यमादिभ्यो योगाङ्गेभ्यः पारम्पर्य्येण समाधेरुपकारकेभ्यो धारणादियोगाङ्गत्रयं संप्रज्ञातस्य समाधेरन्तरङ्गं समाधिस्वरूप निष्पादनात्॥७॥

समाध्यन्तरापेक्षया बहिरङ्गत्वम्

**तदपि बहिरङ्गं निर्बीजस्य॥८॥**

**व्या०भा०** – तदप्यन्तरङ्गं साधनत्रयं निर्बीजस्य योगस्यबहिरङ्गंभवति। कस्मात् ? तदभावेभावादिति॥८॥

**सूत्रार्थः** – निर्बीजस्य निरालम्बनस्य शून्यभावनाऽपरपर्य्यायस्य समाधेरेतदपि योगाङ्गत्रयं बहिरङ्गं, पारम्पर्य्येण उपकारकत्वात्॥८॥

परिणामत्रयम्

**व्युत्थान-निरोधसंस्कारयोरभिभव-प्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः॥८॥**

**व्या०भा०** –व्युत्थानसंस्काराश्चित्तधर्मानतेप्रत्ययात्मका इति प्रत्ययनिरोधेन निरुद्धाः। निरोधसंस्कारा अपि चित्तधर्माः। तयोरभिभव प्रादुर्भावौ। व्युत्थानसंस्कारा हीयन्ते, निरोधसंस्कारा आधीयन्ते। निरोधक्षणं चित्तमन्वेति। तदेकस्य चित्तस्य प्रतिक्षणमिदं संस्कारान्यथा त्वं निरोध परिणामः। तदा संस्कारशेषं चित्तमिति निरोध समाधौ (१।१८) व्याख्यातम्॥९॥

निरोधपरिणामस्य फलम्

**सूत्रार्थः** – व्युत्थानं क्षिप्त-मूढ-विक्षिप्ताख्यं भूमित्रयं, निरोधः प्रकृष्टसत्वस्य अङ्गितया चेतसः परिणामः, ताभ्यां व्युत्थान-निरोधाभ्याम्, यौजनितौसंस्कारौतयोर्यथाक्रममभिभव-प्रादुर्भावौ यदा भवतः; अभिभवो न्यग्भूततया कार्य्यकरणासामार्थ्येनावस्थानम्, प्रादुर्भावो वर्त्तमानेऽध्वनि अभिव्यक्तरूपतया आविर्भावः तदा निरोधक्षणे चित्तस्योभयवृत्तित्वादन्वयो यः स निरोधपरिणाम उच्यते।

अयमर्थः – यदा व्युत्थानसंस्काररूपो धर्मस्तिरोभूतो भवति, निरोधसंस्काररूपश्च आविर्भवति, धर्मिरूपतया च चित्तमुभयत्रान्वयित्वेऽपि निरोधात्मना अवस्थितं प्रतीयते तदा स निरोधपरिणामशब्देन व्यवह्रियते। चलत्वाद्गुणवृत्तस्य यद्यपि चेतसो निश्चलत्वं नास्ति, तथापि एवम्भूतः परिणामः स्थैर्य्यमुच्यते॥९।।

**तस्य प्रशान्तवाहिता संस्कारात्। ।१०।।**

व्या०भा० – निरोधसंस्काराभ्यासपाटवापेक्षा प्रशान्तवाहिता चित्तस्य भवति। तत्संस्कारमान्द्येव्युत्थानधर्मिणा संस्कारेण निरोधधर्मः संस्कारोऽभिभूयत इति॥१०॥

सूत्रार्थः – तस्य चेतसः, उक्तान्निरोधसंस्कारात्प्रशान्तवाहिता भवति; परिहृतविक्षेपतया सदृशप्रवाहपरिणामि चित्तं भवतीत्यर्थः। ।१०। ।

समाधिपरिणामः

**सवार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः॥११॥**

व्या०भा० – सर्वार्थता चित्तधर्मः। एकाग्रतापि चित्तधर्मः। सर्वार्थतायाः क्षयस्तिरोभाव इत्यर्थः। एकाग्रताया उदय आविर्भाव इत्यर्थः। तयोर्धर्मित्वेनानुगतं चित्तम्। तदिदं चित्तमपायोपजनयोः स्वात्मभूतयोर्धर्मयोरनुगतं समाधीयते सचित्तस्य समाधि परिणामः॥११॥

सूत्रार्थः – सर्वार्थताचलत्वान्नानाविधार्थ ग्रहणम्, चित्तस्य विक्षेपो धर्मः। एकस्मिन्नेवालम्बने सदृशपरिणामिता एकाग्रता, सापि चित्तस्य धर्मः। तयोर्यथाक्रमं क्षयोदयौ, सर्वार्थता लक्षणस्य धर्मस्य क्षयोऽत्यन्ताभिभवः, एकाग्रता लक्षणस्य धर्मस्य प्रादुर्भावोऽभिव्यक्तिः, चित्तस्योद्रिक्तसत्त्वस्यान्वयित-याऽवस्थानं समाधिपरिणाम इत्युच्यते। पूर्वस्मात्परिणामा-दस्यायं विशेषः- तत्र संस्कारलक्षणयोः धर्मयोरभिभव प्रादुर्भावौ, पूर्वस्य व्युत्थानसंस्कारस्वरूपस्य धर्मस्यन्यग्भावः, उत्तरस्य निरोधसंस्काररूपस्योद्भवोऽनभिभूतत्वेनावस्थानम् ; इह तु क्षयोदयाविति। सर्वार्थतारूपस्य विक्षपेस्यात्यन्ततिरस्कारादनुत्पत्तिरतीतेऽध्यनि प्रवेशः क्षयः, एकाग्रतालक्षणस्य धर्मस्योद्भवोवर्त्तमानेऽध्वनि प्रकटत्वम्॥११॥

ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः॥१२॥

व्या०भा०-समाहितचित्तस्य पूर्वप्रत्ययः शान्त उत्तरस्तत्सदृश उदितः। समाधिचित्तमुभयोरनुगतं पुनस्तथैवाऽसमाधि भ्रेषादिति। स खल्वयं धर्मिणश्चित्तस्यैकाग्रतापरिणामः॥१२॥

एकाग्रता परिणामः

सूत्रार्थः – समाहितस्यैव चित्तस्यैकप्रत्ययोवृत्तिविशेषः शान्तः, अतीतमध्वानं प्रविष्टः। अपरस्तु उदितो वर्त्तमानेऽध्वनि स्फुरितः। द्वावपि समाहितचित्तत्वेन तुल्यावेकरूपालम्बनत्वेन सदृशौ प्रत्ययौ, उभयत्रापि समाहितस्यैव चित्तस्यान्वयित्वेनावस्थानम्, स एकाग्रता-परिणाम इत्युच्यते॥१२॥

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः॥१३॥

चित्तपरिणामोक्तं रूपमन्यत्रापि अतिदिशति

व्या०भा० – एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेण भूतेन्द्रियेषु धर्मपरिणामो लक्षणपरिणामोऽवस्थापरिणामश्चोक्तो वेदितव्यः। तत्र व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामः। लक्षणपरिणामश्च निरोधस्त्रिलक्षणस्त्रिभिरध्वभिर्युक्तः। स खल्वनागत लक्षणमध्वानं प्रथमं हित्वाधर्मत्वमनतिक्रान्तो वर्तमानलक्षणं प्रतिपन्नो यत्रास्य स्वरूपेणाभिव्यक्तिः। एषोऽस्य द्वितीयोऽध्वा। न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तः।

तथावस्था परिणामः। तत्र निरोधक्षणेषु निरोधसंस्कारा बलवन्तो भवन्ति दुर्बलाव्युत्थानसंस्कारा इति। एष धर्माणामवस्थापरिणामः। तत्र धर्मिणो धर्मैः परिणामो धर्माणां त्र्यध्वानां लक्षणैः परिणामो लक्षणानामप्यवस्थाभिः परिणाम इति। एवं धर्मलक्षणावस्थापरिणामैः शून्यं न क्षणमपि

गुणवृत्तमवतिष्ठते। चलं च गुणवृत्तम्। एतेन भूतेन्द्रियेषु धर्मधर्मिभेदात्त्रिविधः परिणामो वेदितव्यः।

तत्रेदमुदाहरणं मृद्धर्मीपिण्डाकाराद्धर्माद्धर्मान्तरमुपसंपद्य मानोधर्मतः परिणमते घटाकार इति। घटाकारोऽनागतं लक्षणं हि त्वावर्तमानलक्षणं प्रतिपद्यत इति लक्षणतः परिणमते। घटोनव पुराणतां प्रतिक्षणमनुभवन्नवस्थापरिणामं प्रतिपद्यत इति। धर्मिणोऽपि धर्मान्तरमवस्था, धर्मस्यापि लक्षणान्तरमवस्थेत्येक एव द्रव्यपरिणामो भेदेनोपदर्शित इति। एवं पदार्थान्तरेष्वपि योज्यमिति। त एते धर्मलक्षणावस्थापरिणामा धर्मिस्वरूपमनतिक्रान्ता इत्येक एव परिणामः सर्वानमून्विशेषानभिप्लवते। अथ कोऽयं परिणामः? अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणामः॥१३॥

सूत्रार्थः – एतेन त्रिविधेनोक्तेन चित्तपरिणामेन, भूतेषु स्थूल-सूक्ष्मेषु, इन्द्रियेषु बुद्धिकर्मान्तःकरणभेदे नावस्थितेषु, धर्म-लक्षणावस्थाभेदेन त्रिविधः परिणामो व्याख्यातोऽवगन्तव्यः।

अवस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरापत्तिः धर्मपरिणामः; यथा-मृल्लक्षणस्य धर्मिणः पिण्डरूपधर्मपरित्यागेन घटरूपधर्मान्तरस्वीकारो धर्मपरिणाम इत्युच्यते। लक्षणपरिणामो यथा – तस्यैव घटस्यानागतो ध्वपरित्यागेन वर्त्तमानाध्वस्वीकारः। तत्परित्यागेनातीता ध्वपरिग्रहः। अवस्थापरिणामो यथा- तस्यैव घटस्य प्रथमद्वितीययोः सदृशयोः क्षणयोरन्वयित्वेन, यतश्चलं गुणवृत्तं नापरिणममानं क्षणमप्यास्ते। ।१३। ।

**शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी॥१४॥**

धर्मिणः लक्षणम्

**व्या० भा०** –योग्यतावच्छिन्नाधर्मिणः शक्तिरेव धर्मः। स च फलप्रसवभेदानुमितसद्भाव एकस्यान्योऽन्यश्च परिदृष्टः। तत्र वर्तमानः स्वव्यापारमनुभवन्धर्मो धर्मान्तरेभ्यः शान्तेभ्यश्चाव्यपदेश्येभ्यश्च भिद्यते। यदा तु सामान्येन समन्वागतो भवति तदा धर्मिस्वरूपमात्रत्वात्कोऽसौ केन भिद्यते। तत्र ये खलुधर्मिणो धर्माः शान्ता उदिता अव्यपदेश्याश्चेति, तत्र शान्ताये कृत्वा व्यापारानुपरताः। सव्यापारा उदिताः, ते चानागतस्य लक्षणस्य समनन्तराः। वर्तमानस्यानन्तरा अतीताः। किमर्थमतीतस्यानन्तरा न भवन्ति वर्तमानाः? पूर्वपश्चिमताया अभावात्। यथानागत-वर्तमानयोः पूर्वपश्चिमता, नैवमतीतस्य। तस्मान्नातीतस्यास्ति समनन्तरः। तदनागत एव समनन्तरोभवति वर्तमानस्येति।

अथाव्यपदेश्याः के ? सर्वं सर्वात्मकमिति। यत्रोक्तम्- जलभूम्योः पारिणामिकं रसादिवैश्वरूप्यं स्थावरेषु दृष्टम्, तथा स्थावराणां जङ्गमेषु जङ्गमानां स्थावरेष्वित्येवं जात्यनुच्छेदेन सर्वं सर्वात्मकमिति।

देशकालाकारनिमित्तोपबन्धान्न खलु समानकालमात्मनाम् अभिव्यक्तिरिति। य एतेष्वभिव्यक्तानभिव्यक्तेषु धर्मेष्वनुपाती सामान्यविशेषात्मासोऽन्वयी धर्मी। यस्य तु धर्ममात्रमेवेदं निरन्वयं तस्य भोगाभावः। कस्मात् ? अन्येन विज्ञानेन कृतस्य कर्मणोऽन्यत्कथं भोक्तृत्वेनाधिक्रियेत। तत्स्मृत्यभावश्च, नान्यदृष्टस्य स्मरणमन्यस्यास्तीति। वस्तु प्रत्यभिज्ञानाच्च स्थितोऽन्वयी धर्मी यो धर्मान्यथात्वमभ्युपगतः प्रत्यभिज्ञायते। तस्मान्नेदं धर्ममात्रं निरन्वयमिति॥१४॥

**सूत्रार्थः** – शान्ताये कृतस्वस्वव्यापारा अतीतेऽध्वनि अनुप्रविष्ठाः। उदिता ये अनागतमध्वानं परित्यज्य

वर्त्तमानेऽध्वनिस्वव्यापारंकु र्वन्ति। अव्यपदेश्या ये शक्तिरूपेण स्थिताव्यपदेष्टुं न शक्यन्ते, यथा सर्वं सर्वात्मकमित्येवमादयः। नियतकार्य्यकरणरूपयोग्यतयावच्छिन्ना शक्तिरेवेह धर्मशब्देना अभिधीयते।

तं त्रिविधमपि धर्मं योऽनुपतति अनुवर्त्तते, अन्ययित्वेन स्वीकरोति स शान्तोदिताव्यपदेश्य धर्मानुपाती धर्मीति उच्यते; यथा-सुवर्णं रुचकरूपधर्मपरित्यागेन स्वस्तिकरूप धर्मान्तरपरिग्रहे सुवर्णरूपतयाऽनुवर्त्तमानम्, तेषु धर्मेषु कथञ्चिद्भिन्नेषु धर्मिरूपतया सामान्यात्मना धर्मरूपतया विशेषात्मना स्थितमन्वयित्वेनावभासते। ॥१४॥

## क्रमान्यत्वं परिणामान्यत्वे हेतुः। ।१५। ।

एकस्य धर्मिणः कथमनेके परिणामाः

व्या॰भा॰ – एकस्य धर्मिण एक एव परिणाम इति प्रसक्ते क्रमान्यत्वं परिणामान्यत्वे हेतुर्भवतीति। तद्यथा चूर्णमृत्पिण्डमृद्घटमृत्कपालमृत्कणमृदिति च क्रमः। योयस्य धर्मस्य समनन्तरोधर्मः स तस्य क्रमः। पिण्डः प्रच्यवतेघट उपजायत इति धर्मपरिणामक्रमः। लक्षण-परिणामक्रमो घटस्यानागतभावाद्वर्तमान-भावक्रमः। तथा पिण्डस्य वर्तमानभावादतीत भावक्रमः। नातीतस्यास्ति क्रमः। कस्मात् ? पूर्वपरतायां सत्यां समनन्तरत्वम्, सा तु नास्त्यतीतस्य। तस्माद्द्वयोरेव लक्षणयोः क्रमः।

तथावस्थापरिणाम क्रमोऽपि घटस्याभिनवस्य प्रान्ते पुराणता दृश्यते। सा च क्षणपरम्परानुपातिना क्रमेणाभिव्यज्यमानापरां व्यक्तिमापद्यत इति। धर्मलक्षणाभ्यां च विशिष्टोऽयं तृतीयः परिणाम इति। त एते क्रमाधर्मधर्मिभेदे सति प्रतिलब्धस्वरूपाः। धर्मोऽपि धर्मीभवत्यन्यधर्मस्वरूपापेक्षयेति। यदा तु परमार्थतो

धर्मिण्यभेदोपचारस्तद्वारेण स एवाभिधीयते धर्मस्तदायमेकत्वेनैव क्रमः प्रत्यवभासते॥१५॥

**सूत्रार्थः** –धर्माणामुक्तलक्षणानां यः क्रमस्तस्य यत्प्रतिक्षणमन्यत्वं परिदृश्यमानं परिणामस्योक्त-लक्षणस्यान्यत्वे, नानाविधत्वे हेतुर्लिङ्गं ज्ञापकं भवति। अयमर्थः- योऽयं नियतः क्रमः मृच्यूर्णाद्मृत्पिण्डः, ततः कपालानि, तेभ्यश्च घट इत्येवं क्रमरूपः परिदृश्यमानः परिणामस्य अन्यत्वमावेदयति। तस्मिन्नेव धर्मिणि यो लक्षणपरिणामस्य अवस्थापरिणामस्य च क्रमः, सोऽपि अनेनैव न्यायेन परिणामान्यत्वे गमकोऽवगन्तव्यः।

सर्व एव भावानि यतेनैव क्रमेण प्रतिक्षणं परिणम्यमानाः परिदृश्यन्ते; अतः सिद्धं क्रमान्यत्वात्परिणामान्यत्वम्। सर्वेषां चित्तादीनां परिणममानानां केचिद्धर्माः प्रत्यक्षेणैवोपलभ्यन्ते, यथा-सुखादयः संस्थानादयश्च केचिदेकान्तेनानुमानगम्याः, यथा-धर्म-संस्कार-शक्तिप्रभृतयः। धर्मिणश्च भिन्नाभिन्नरूपतया सर्वत्रा नुगमः। ।१५। ।

## Summarised Overview

यम- नियम- आसन- प्राणायाम – प्रत्याहरादीनि पञ्चाङ्गानि बहिरङ्गानि सन्ति। धारणा- ध्यान – समाधीतित्रीणि अन्तरङ्गाणि भवन्ति। यतो हि एतेषामन्तःकरणेन साकमेव सम्बन्धो विद्यते। अतः एतेषामन्तरङ्गत्वम्। महर्षिणा पतञ्जलिना त्रयाणां कृते संयमः इत्युच्यते। तद्यथा त्रयमेकत्र संयमः (३/४)। अष्टाङ्गयोगद्वारा प्रमाण- विपर्यय- विकल्प- निद्रा- स्मृत्यादि पञ्चप्रवृत्तीनां निरोधं कृत्वा योगसमाधौ प्रविशति योगी। शौच- सन्तोष- तपः- स्वाध्याय- ईश्वरप्रणिधानादयः पञ्चनियमाः भवन्ति। शौचं द्विविधम्- बाह्यशौचम्, आभ्यन्तरशौचम्। प्राप्तवस्तुनः अधिकाभिलाषाभावःसन्तोषः। सन्तोषद्वारा लोकोत्तरसुखस्य प्राप्तिर्भवति। धर्मरक्षार्थं कृच्छ्रचान्द्रायणादिव्रतपालनं स्वाध्यायः।

भगवन्नामस्मरणजपादिरपि स्वाध्यायः। इष्टदेवस्य साक्षाद्दर्शनं स्वाध्यायस्य फलम्। कायेन वाचा मनसा इन्द्रियैर्वा फलाभिसन्धिवर्जितमीश्वरस्मरणम् ईश्वरसमर्पणं वा ईश्वरप्रणिधानम्। ईश्वरप्रणिधानस्य फलं भवति समाधिसिद्धिः।

सुखपूर्वकं दीर्घकालपर्यन्तमुपवेशनमासनमित्युच्यते। यथा- पद्मासनम्, सिद्धासनम् इत्यादयः। द्वन्द्वसहिष्णुता, प्राणायामयोग्यता, अनात्मवस्तुनि उदासीनता च आसनशुद्धेः फलानि भवन्ति। आसनस्य लक्षणम् एवम् अस्ति स्थिरं सुखम् आसनम्। आसनानाम् अभ्यासेन चित्तं स्थिरं भवति, शरीरं च सुखं प्राप्नोति। आसनानि चतुरशीति अभिमतानि।

श्वासप्रश्वासयोः गतेः विच्छेदः प्राणायामः। प्राणायामः त्रिविधः- रेचकः, पूरकः, कुम्भकश्चेति। नाडीशोधनं भवति प्राणायामस्य मुख्योपयोगः। यमनियमाभ्यां संयुक्तः सन्पुरुषः यदि प्राणायाममाचरेत्तर्हिनाड्यः शुद्धाः भवन्ति। प्राणायामेन पापस्य अज्ञानस्य च क्षयो भवति। मनः स्थिरं भवति। रोगाणां विनाशाय प्राणायामस्यापि आवश्यकता वर्तते। स्वस्मिन्विषये अनासक्तानाम् इन्द्रियाणां चित्तरूपे अवस्थितिः प्रत्याहारः। एकस्मिन्देशे (स्थाने) चित्तस्य स्थिरीकरणं धारणा। नाभिचक्रे, नासाग्रे, हृदयपुण्डरीके वा चित्तस्य एकाग्रताविधानं भवति धारणा। चित्तस्य निश्चलीभावो धारणाधारणं विदुः (२९) इति त्रिशिखाब्राह्मणोपनिषदि वर्णितमस्ति। गङ्गाप्रवाहवत्तैलधारावद्वा अविच्छिन्नरुपेण ध्येयवस्तुनि चित्तस्यसंयोगः स्थिरोभावः ध्यानम्। यदा ध्यानं ध्याता ध्येयश्च एते त्रयः, एकीभूयध्येयरूपे प्रतियन्ते सा अवस्था भवति समाधिः।

## Assignments

1. अन्तरङ्गाः के ? विशदयत।
2. परिणामत्रयं किम् ?
3. चतुर्थः प्राणायामः कः ? तस्य फलं च लिखत।
4. प्रज्ञायाः फलं, उपयोगं च लिखत।
5. नियमानधिकृत्य लघुप्रबन्धं रचयत।

## Suggested Readings


1. योगदर्शनम् (प्रत्यक्षानुभूतव्याख्या ) – परमहंसस्वामी श्री आङ्गडानन्दजी, श्री परमहंसस्वामी श्री आङ्गडानन्दजी आश्रम
2. The Yogasutra of Patanjali with the commentary of yoga, Bengali Baba. Motilal Banarsidass publishers 1976, 1st Edition
3. पातञ्जलयोगदर्शनम्वाचस्पतिमिश्रविरचित - तत्ववैशारदी
4. പാതഞ്ജലയോഗദർശനംമലയാളവ്യാഖ്യാനസഹിതം – സ്വാമിജ്ഞാനാനന്ദസരസ്വതി.
5. पातञ्जलयोगदर्शनम्श्रीमद्धारेश्वरभोजदेवविरचितः राजमार्ताण्ड विवृत्ति समेता।
6. भारतीयदर्शनपरिचयः - डा.सुशान्त्एस्, 1st edition, August 2015.


## References


1. पतञ्जलियोगसूत्रम् (व्यासभाष्यसहितम्) MunshiramManoharlal Publications. Pvt. Ltd
2. पातञ्जलयोगदर्शनं, भोजविवृतिसहितं, चौखम्बाअमरभारतीप्रकाशन, वाराणसी - २२१००१


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

Model Question Paper SET – A

Model Question Paper

(SET – A)

**SREENARAYANAGURU OPEN UNIVERSITY**

**Reg.No................** **QP CODE..................**

**Name..................**

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE -- M23SN09DC- सांख्यं योगं च**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

सर्वेप्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृत लेखने देवनागरी लिपि उपयोक्तव्या।

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

**SECTION- A**

(प्रथमो भागः)

**I.** एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत। **(5x2=10)**

**(Answer any five Questions in a Paragraph)**

1. अद्वैतदर्शनस्य प्रमुखभेदाः के?
2. किं नाम व्यक्तम् ?
3. व्यक्तमव्यक्तम् नाम किं
4. सत्कार्यवादं लिखत।
5. चतुर्विंशतितत्वानां मेलनेन त्रिधा विशेषवस्तूनि उत्पद्यन्ते - कानि ?
6. भावाः त्रिविधाः । के ?
7. चित्तविक्षेपाः के ?
8. कति क्लेशाः सन्ति ? के च ते ।



SGOU

## SECTION –B
## (द्वितीयोभागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत। (6 x 5=30)**

**(Answer any Six Questions in a page)**

9. सांख्यमते प्रमाणानि विशदयत।
10. सांख्यकारिकायां दुखःत्रयं प्रतिपादयत।
11. पुरुषास्तित्वं प्रतिपादयत।
12. सृष्टिप्रक्रियां निरूपयत।
13. बुद्धेः सात्त्विकरूपान् लिखत।
14. सांख्यसम्मतं सूक्ष्मशरीरं संक्षेपेण निरूपयत ।
15. सांख्यकारिकोक्तरीत्या प्रत्ययसर्गः निरूपयत ।
16. नातः परं सूक्ष्ममस्तीत्युक्तं - विशदयत ।
17. पुरुषः केवल इत्युच्यते - कदा? सन्दर्भानुसारं लिखत ।
18. अन्तरङ्गाः के ? विशदयत ।

## SECTION –C
## (तृतीयो भागः)

**III. केषाञ्चित्द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। (2x15=30)**

**(Write an essay on any two of the following)**

19. भारतीयदर्शनं संक्षेपेण लिखत ।
20. साख्यकारिकायां प्रकृतितत्वं निरूपयत।
21. संक्षेपेण सूक्ष्मशरीर -संसरणप्रक्रियाम् उपस्थापयतु ।
22. योगाङ्गानि अधिकृत्य उपन्यस्यत ।

SGOU

Model Question Paper SET – B

**Model Question Paper**
**(SET – B)**

**SREENARAYANAGURU OPEN UNIVERSITY**

**Reg.No: .............** **QP CODE..................**

**Name..................**

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**
**DISCIPLINE CORE - M23SN09DC-सांख्यंयोगंच**

**(CBCS- PG)**
**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

---

**सर्वेप्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

**SECTION-A**
**(प्रथमोभागः)**

**I.** **एकखण्डिकया केषाञ्चित्पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5x2=10)**

**(Answer any five Questions in a Paragraph)**

1. 'व्यक्ताव्यक्तज्ञाः' के?
2. विकारो नाम किम् ?
3. विशेषाविशेषविषयाणि कानि?
4. त्रयोदशविधं करणं लिखत।
5. बन्धत्रैविध्यं लिखत ।
6. सिद्धिभेदाः के ?
7. किं नाम महाव्रतम् ?
8. परिणामत्रयं किम् ?

## SECTION –B
## (द्वितीयोभागः)

II. **एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**
**(Answer any Six Questions in a page)**

9. जैनदर्शने रत्नत्रयानि कानि? लिखत।
10. सांख्यकारिकायां पञ्चविंशतितत्वानि विशदयत।
11. सांख्यमते प्रमाणानि विशदयत।
12. साख्यकारिकायाम् इन्द्रियाणां तत्वज्ञानं विशदयत।
13. व्यक्ताव्यक्तयोर्वैधर्म्यं साधर्म्यं निरूपयत।
14. उभयविधसर्गावश्यकत्वं विशदयत ।
15. भौतिकसर्गं (भूतादिसर्गं) संक्षेपेण निरूपयत ।
16. सर्गस्य दुःखहेतुत्वं विशदयत ।
17. समाधिद्वैविध्यं विशदयत ।
18. समाध्यवस्थायां, चाञ्चल्यावस्थायां च चित्तस्य स्वरूपमधिकृत्य उपन्यस्यत ।

## SECTION –C
## (तृतीयो भागः)

**III.** **केषाञ्चिद्द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**
**(Write an essay on any two of the following)**

19. पुरुषास्तित्वं पुरुषबहुत्वं च प्रतिपादयत।
20. आस्तिकदर्शनानि लिखत।
21. सांख्यकारिकोक्तदिशा मोक्षस्वरूपं (अपवर्गः) निरूपयत ।
22. समापत्तेः चातुर्विध्यं विशदयत ।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

सांख्यं योगं च

COURSE CODE: M23SN09DC

SGOU

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-985080-8-9
9 788198 508089